आगे वे कर्म आठ हैं जिनसे संसारी जीव बंध हैं ऐसा कहते हैं;—श्री-गुरु अपने शिष्य मुनिको कहते हैं कि [**हे योगिन्**] हे योगी [**तानि पुनः कर्माणि**] वे फिर कर्म [**जीवानां अष्टौ एव**] जीवोंके आठ ही [**भवंति**] होते हैं [**यैः एव झंपिताः**] जिन कर्मोंसे ही आच्छादित (ढकेहुए) [**जीवाः**] ये जीव [**आत्मस्वभावं**] अपने सम्यक्त्वादि आठगुणरूप स्वभावको [**नैव लभंते**] नहीं पाते ॥ अब उन्हीं आठ गुणोंका व्याख्यान करते हैं "सम्मत्त" इत्यादि—इसका अर्थ ऐसा है कि शुद्ध आत्मादि पदार्थोंमें विपरीत श्रद्धानरहित जो परिणाम उसको क्षायिक सम्यक्त्व कहते हैं, तीन लोक तीन कालके पदार्थोंको एक ही समयमें विशेषरूप सबको जानें वह केवलज्ञान है, सब पदार्थोंको केवलदृष्टिसे एक ही समयमें देखै वह केवल दर्शन है । उसी केवलज्ञानमें अनंतज्ञायक (जाननेकी) शक्ति वह अनंतवीर्य है, अतींद्रियज्ञानकर अमूर्तीक सूक्ष्मपदार्थोंको जानना आप चार ज्ञानके धारियोंसे न जाना जावे वह सूक्ष्मत्व है, एक जीवके अवगाह क्षेत्रमें (जगहमें) अनंते जीव समाजायें ऐसी अवकाश देनेकी सामर्थ्य वह अवगाहन गुण है, सर्वथा गुरुता और लघुताका अभाव

वेदनीयकर्मोदयजनितसमस्तबाधारहितत्वादव्याबाधगुणश्चेति । इदं सम्यक्त्वादिगुणाष्टकं संसारावस्थायां किमपि केनापि कर्मणा प्रच्छादितं तिष्ठति यथा तथा कथ्यते । सम्यक्त्वं मिथ्यात्वकर्मणा प्रच्छादितं, केवलज्ञानं केवलज्ञानावरणेन झंपितं, केवलदर्शनं केवलदर्शनावरणेन झंपितं, अनंतवीर्यं वीर्यांतरायेण प्रच्छादितं, सूक्ष्मत्वमायुष्ककर्मणा प्रच्छादितं । कस्मादितिचेत् । विवक्षितायुःकर्मोदयेन भवांतरे प्राप्ते सत्यतींद्रियज्ञानविषयं सूक्ष्मत्वं त्यक्त्वा पश्चादिंद्रियज्ञानविषयो भवतीत्यर्थः । अवगाहनत्वं शरीरनामकर्मोदयेन प्रच्छादितं, सिद्धावस्थायोग्यं विशिष्टागुरुलघुत्वं नामकर्मोदयेन प्रच्छादितं । अथवा गुरुत्वशब्देनोच्चगोत्रजनितं महत्त्वं भण्यते, लघुत्वशब्देन नीचगोत्रजनितं तुच्छत्वमिति, तदुभयकारणभूतेन गोत्रकर्मोदयेन विशिष्टागुरुलघुत्वं प्रच्छाद्यत इति । अव्याबाधगुणत्वं वेदनीयकर्मोदयेनेति संक्षेपेणाष्टगुणानां कर्मभिराच्छादनं ज्ञातव्यमिति । तदेव गुणाष्टकं मुक्तावस्थायां स्वकीयस्वकीयकर्मप्रच्छादनाभावे व्यक्तं भवतीति संक्षेपेणाष्टगुणाः कथिताः । विशेषेण पुनरमूर्तत्वनिर्नामगोत्रादयः साधारणासाधारणरूपानंतगुणाः यथासंभवमागमाविरोधेन ज्ञातव्या इति । अत्र सम्यक्त्वादिशुद्धगुणस्वरूपः शुद्धात्मैवोपादेय इति भावार्थः ॥ ६१ ॥

अर्थात् न गुरु न लघु—उसे अगुरुलघु कहते हैं और वेदनीयकर्मके उदयके अभावकर उत्पन्न हुआ समस्त बाधारहित जो निराबाध गुण उसे अव्याबाध कहते हैं । ये सम्यक्त्वादि आठगुण जो सिद्धोंके हैं वे संसारअवस्थामें किस २ कर्मसे ढंके हुए है वोही कहते हैं—सम्यक्त्व गुण मिथ्यात्वनाम दर्शनमोहनीयकर्मसे आच्छादित है, केवलज्ञानावरणसे केवलज्ञान ढका हुआ है, केवलदर्शनावरणसे केवलदर्शन ढका है. वीर्यांतरायकर्मसे अनंतवीर्य ढका है, आयुःकर्मसे सूक्ष्मत्वगुण ढका है, क्योंकि आयुकर्मके उदयसे जब परभवको जाता है वहां इंद्रियज्ञानका धारक होता है अतींद्रियज्ञानका अभाव होता है इस कारण कुछ एक स्थूलवस्तुओंको तो जानता है सूक्ष्मको नहीं जानता, शरीर नामकर्मके उदयसे अवगाहन गुण आच्छादित है, सिद्धावस्थाके योग्य विशेषरूप अगुरुलघुगुण नामकर्मके उदयसे अथवा गोत्रकर्मके उदयसे ढका गया है क्योंकि गोत्रकर्मके उदयसे जब नीच गोत्र पाया तब उसमें तुच्छ या लघु कहलाया और उच्चगोत्रमें बड़ा अर्थात् गुरु कह लाया और वेदनीय कर्मके उदयसे अव्याबाध गुण ढका गया क्योंकि उसके उदय साताअसातारूप संसारीक सुखदुःखका भोक्ता हुआ । इस प्रकार आठ गुण आठ कर्मोंसे ढके गये इसलिये यह जीव संसारमें भ्रमा । जब कर्मका आवरण मिट जाता है तब सिद्धपदमें ये आठ गुण प्रगट होते हैं। यह संक्षेपसे आठ गुणोंका कथन किया। और विशेषतासे अमूर्तत्व निर्नामगोत्रादिक अनंतगुण यथासंभव शास्त्रप्रमाणकर जानने । तात्पर्य यह है कि सम्यक्त्वादि निज शुद्धगुणस्वरूप जो शुद्धात्मा वही उपादेय है ॥ ६१ ॥



अथ विषयकषायासक्तानां जीवानां ये कर्मपरमाणवः [illegible] तत्कर्मेति कथयति;—

विसयकसायहिं रंगियहं, जे अणुया लग्गंति ।
जीवपएसहं मोहियहं, ते जिण कम्म भणंति ॥ ६२ ॥

विषयकषायैः रंगितानां ये अणवः लगंति ।
जीवप्रदेशेषु मोहितानां तान् जिनाः कर्म भणंति ॥ ६२ ॥

विसयकसायहिं रंगियहं जे अणुया लग्गंति विषयकषायै रंगितानां रक्तानां ये परमाणवो लग्ना भवंति **जीवपएसिहिं मोहियहं ते जिण कम्म भणंति ।** केषु लग्ना भवंति । जीवप्रदेशेषु । केषां । मोहितानां जीवानां तान् कर्मस्कंधान् जिनाः कर्मेति कथयंति । तथाहि । शुद्धात्मानुभूतिविलक्षणैर्विषयकषायै रक्तानां स्वसंवित्त्यभावोपार्जित-मोहकर्मोदयपरिणतानां च जीवानाम् कर्म्मवर्गणायोग्यस्कंधास्तैलम्रक्षितानां मलपर्यायवद-ष्टविधज्ञानावरणादिकर्मरूपेण परिणमंतीत्यर्थः ॥ अत्र य एव विषयकषायकाले कर्मोपार्जनं करोति स एव परमात्मा वीतरागनिर्विकल्पसमाधिकाले साक्षादुपादेयो भवतीति तात्पर्यार्थः ॥ ६२ ॥ इति कर्मस्वरूपकथनमुख्यत्वेन सूत्रचतुष्टयं गतं ।

अथापींद्रियचित्तसमस्तविभावचतुर्गतिसंतापाः शुद्धनिश्चयनयेन कर्मजनिता इत्यभिप्रायं मनसि धृत्वा सूत्रं कथयंति;—

आगे विषयकषायोंमें लीन जीवोंके जो कर्मपरमाणुओंके समूह बंधते हैं वे कर्म कहे जाते हैं ऐसा कहते हैं;—[**विषयकषायैः**] विषयकषायोंसे [**रंगितानां**] रागी [**मोहितानां**] मोही जीवोंके [**जीवप्रदेशेषु**] जीवके प्रदेशोंमें [**ये अणवः**] जो परमाणु [**लगंति**] लगते हैं बंधते हैं [**तान्**] उन परमाणुओंके स्कंधों (समूहों) को [**जिनाः**] जिनेन्द्रदेव [**कर्म**] कर्म [**भणंति**] कहते हैं ॥ भावार्थ—शुद्ध आत्माकी अनुभूतिसे भिन्न जो विषयकषाय उनसे रंगे हुए आत्मज्ञानके अभावसे उपार्जन किये हुए मोहकर्मके उदयकर परिणत हुए ऐसे रागी द्वेषी मोही संसारी जीवोंके कर्मवर्गणायोग्य जो पुद्गलस्कंद हैं वे ज्ञानावरणादि आठ प्रकार कर्मरूप होकर परिणमते हैं । जैसे तेलकर चिकने शरीरमें धूलि लगकर मैलरूप होके परिणमती है वैसे ही रागी द्वेषी मोही जीवोंके विषयकषायदशामें पुद्गलवर्गणा कर्मरूप होके परिणमती हैं । जो कर्मोंका उपार्जन करते हैं वही जब वीतराग निर्विकल्पसमाधिके समय कर्मोंका क्षय करते हैं तब आराधने योग्य हैं यह तात्पर्य हुआ ॥ ६२ ॥

इसप्रकार कर्मस्वरूपके कथनकी मुख्यताकर चार दोहा कहे । आगे पांचइंद्रिय, मन, समस्तविभाव और चार गतिके दुःख ये सब शुद्धनिश्चयनयकर कर्मसे उपजे हैं जीवके

पंचवि इंदिय अण्णु मणु, अण्णुवि सयलविभाव ।
जीवहं कम्मइं जणिय जिय, अण्णुवि चउगइताव ॥ ६३ ॥

पंचैव इंद्रियाणि अन्यत् मनः अन्यदपि सकलविभावः ।
जीवानां कर्मणा जनिता जीव अन्यदपि चतुर्गतितापाः ॥ ६३ ॥

पंचवि इंदिय अण्णु मणु अण्णुवि सयलविभाव पंचेंद्रियाणि अन्यन्मनः अन्यदपि पुनरपि समस्तविभावः **जीवहं कम्मइं जणिय जिय अण्णुवि चउगइताव** एते जीवानां कर्मणा जनिता हे जीव, न केवलमेते अन्यदपि पुनरपि चतुर्गतिसंतापास्ते कर्मजनिता इति । तद्यथा । अतींद्रियात् शुद्धात्मनो यानि विपरीतानि पंचेंद्रियाणि शुभाशुभसंकल्पविकल्परहितात्मनो विपरीतमनेकसंकल्पविकल्पजालरूपं मनः, ये च शुद्धात्मतत्त्वानुभूतेर्विलक्षणाः समस्तविभावपर्यायाः वीतरागपरमानंदसुखामृतप्रतिकूलाः समस्तचतुर्गतिसंतापाः दुःखदाहाश्चेति सर्वेऽप्येते अशुद्धनिश्चयनयेन स्वसंवेद्याभावोपार्जितेन कर्मणा निर्मिता जीवानामिति । अत्र परमात्मद्रव्यात्प्रतिकूलं यत्पंचेंद्रियादिसमस्तविकल्पजालं तद्धेयं तद्विपरीतं स्वशुद्धात्मतत्त्वं पंचेंद्रियविषयाभिलाषादिसमस्तविकल्परहितं परमसमाधिकाले साक्षादुपादेयमिति भावार्थः ॥ ६३ ॥

नहीं हैं यह अभिप्राय मनमें रखकर दोहासूत्र कहते हैं;—[**पंचैव**] पांचोंही [**इंद्रियाणि**] इंद्रियां [**अन्यत्**] भिन्न हैं [**मनः**] मन [**अपि**] और [**सकलविभावः**] रागादि सब विभाव परिणाम [**अन्यत्**] अन्य हैं [**चतुर्गतितापाः अपि**] तथा चारों गतियोंके दुःखभी [**अन्यत्**] अन्य हैं [**जीव**] हे जीव ये सब [**जीवानां**] जीवोंके [**कर्मणा**] कर्मकर [**जनिताः**] उपजे हैं जीवसे भिन्न हैं ऐसा जान । **भावार्थ**—इंद्रियरहित शुद्धात्मासे विपरीत जो स्पर्शन आदि पांच इंद्रियां, शुभ अशुभ संकल्पविकल्पसे रहित आत्मासे विपरीत अनेकसंकल्पविकल्पसमूहरूप जो मन और शुद्धात्मतत्त्वकी अनुभूतिसे भिन्न जो रागद्वेषमोहादिरूप सब विभाव ये सब आत्मासे जुदे हैं तथा वीतरागपरमानंद सुखरूप अमृतसे परान्मुख जो समस्त चतुर्गतिके दुःख महान् दुःखदायी वे सब जीवपदार्थसे भिन्न हैं । ये सभी अशुद्धनिश्चयनयकर आत्मज्ञानके अभावसे उपार्जन किये हुए कर्मोंसे जीवके उत्पन्न हुए हैं । इसलिये ये सब अपने नहीं हैं कर्म जनित हैं । यहांपर परमात्मद्रव्यसे विपरीत जो पांच इंद्रियोंको आदि लेकर सब विकल्पजाल हैं वे तो त्यागने योग्य हैं, उससे विपरीत पांच इंद्रियोंके विषयोंकी अभिलाषाको आदि लेकर सब विकल्पजालोंसे रहित अपना शुद्धात्मतत्त्व वही परमसमाधिके समय साक्षात् उपादेय है । यह तात्पर्य जानना ॥ ६३ ॥

अथ सांसारिकसमस्तसुखदुःखानि शुद्धनिश्चयनयेन जीवानां कर्म जनयतीति निरूपयति;—

दुक्खुवि सुक्खुवि बहुविहउ, जीवहं कम्मु जणेइ ।
अप्पा देखइ मुणइ पर, णिच्छउ एउ भणेइ ॥ ६४ ॥

दुःखमपि सुखमपि बहुविधं जीवानां कर्म जनयति ।
आत्मा पश्यति मनुते परं निश्चयः एवं भणति ॥ ६४ ॥

दुक्खुवि सुक्खुवि बहुविहउ जीवहं कम्मु जणेइ दुःखमपि सुखमपि । कथंभूतं । बहुविधं जीवानां कर्म जनयति । **अप्पा देखइ मुणइ पर णिच्छउ एउ भणेइ** आत्मा पुनः पश्यति जानाति परं नियमेन निश्चयनयः एवं ब्रुवते इति । तथाहि—अनाकुलत्वलक्षणपारमार्थिकवीतरागसौख्यान प्रतिकूलं सांसारिकसुखदुःखं यद्यप्यशुद्धनिश्चयनयेन जीवजनितं तथापि शुद्धनिश्चयेन कर्मजनितं भवति । आत्मा पुनर्वीतरागनिर्विकल्पसमाधिस्थः सन् वस्तु वस्तुस्वरूपेण पश्यति जानाति च न च रागादिकं करोति । अत्र पारमार्थिकसुखाद्विपरीतं सांसारिकसुखदुःखविकल्पजालं हेयमिति तात्पर्यार्थः ॥ ६४ ॥

अथ निश्चयेन बंधमोक्षौ कर्म करोतीति प्रतिपादयति;—

बंधुवि मोक्खुवि सयलु जिय, जीवहं कम्मु जणेइ ।
अप्पा किंपिवि कुणइ णवि, णिच्छउ एउ भणेइ ॥ ६५ ॥

आगे संसारके सब सुखदुःख शुद्धनिश्चयनयसे शुभ अशुभ कर्मोंकर उत्पन्न होते हैं और कर्मोंको ही उपजाते हैं जीवके नहीं हैं ऐसा कहते हैं;—[**जीवानां**] जीवोंके [**बहुविधं**] अनेक तरहके [**दुःखमपि सुखं अपि**] दुःख और सुख दोनों ही [**कर्म**] कर्म ही [**जनयति**] उपजाता है । [**आत्मा**] और आत्मा [**पश्यति**] उपयोगमई होनसे देखता है [**परं मनुते**] और केवल जानता है [**एवं**] इस प्रकार [**निश्चयः**] निश्चयनय [**भणति**] कहता है अर्थात् निश्चयनयसे भगवानने ऐसा कहा है । **भावार्थ**—आकुलतारहित परमार्थिक वीतरागसुखसे परान्मुख (उलटो) जो संसारके सुखदुःख यद्यपि अशुद्ध निश्चयनयकर जीवसंबंधी हैं तौभी शुद्धनिश्चयनयकर जीवने उपजाये नहीं हैं इसलिये जीवके नहीं हैं कर्मसंयोगकर उत्पन्न हुए हैं । और आत्मा तो वीतरागनिर्विकल्पसमाधिमें स्थिर हुआ वस्तुको वस्तुके स्वरूप देखता है जानता है रागादिकरूप नहीं होता उपयोगरूप है ज्ञाता द्रष्टा है परम आनंदरूप है । यहां पारमार्थिक सुखसे उलटा जो इंद्रीजनित संसारका सुखदुःख आदि विकल्पसमूह है वह त्यागने योग्य है ऐसा भगवानने कहा है यह तात्पर्य है ॥ ६४ ॥

आगे निश्चयनयकर बंध और मोक्ष कर्मजनित ही हैं कर्मके योगसे बंध और कर्मके

बंधमपि मोक्षमपि सकलं जीव जीवानां कर्म जनयति ।
आत्मा किमपि करोति नैव निश्चय एवं भणति ॥ ६५ ॥

बंधुवि मोक्खुवि सयलु जिय जीवहं कम्मु जणेइ बंधमपि मोक्षमपि समस्तं हे जीव जीवानां कर्म कर्तृ जनयति **अप्पा किंपिवि कुणइ णवि णिच्छउ एउ भणेइ** आत्मा किमपि न करोति बंधमोक्षस्वरूपं निश्चय एवं भणति । तद्यथा । अनुपचरितासद्भूतव्यवहारेण द्रव्यबंधं तथैवाशुद्धनिश्चयेन भावबंधं तथा नयद्वयेन द्रव्यभावमोक्षमपि यद्यपि जीवः करोति तथापि शुद्धपारिणामिकपरमभावग्राहकेन शुद्धनिश्चयनयेन न करोत्येव भणति । कोसौ । निश्चय इति । अत्र य एव शुद्धनिश्चयेन बंधमोक्षौ न करोति स एव शुद्धात्मोपादेय इति भावार्थः ॥ ६५ ॥

अथ स्थलसंख्याबाह्यं प्रक्षेपकं कथयति;—

सो णत्थित्ति पएसो चउरासीजोणिलक्खमज्झम्मि ।
जिणवयणं ण लहंतो जत्थ ण डुलुडुल्लिओ जीवो ॥ ६६ ॥ क्षे०

स नास्त्यत्र प्रदेशः चतुरशीतियोनिलक्षमध्ये ।
जिनवचनं न लभमानः यत्र न भ्रमितः जीवः ॥ ६६ ॥

सो णत्थित्ति पएसो स प्रदेशो नास्त्यत्र जगति । स किं । **चउरासी जोणिलक्खमज्झम्मि जिणवयणं ण लहंतो जत्थ ण डुलुडुल्लिओ जीवो** चतुरशीतियोनिलक्षेषु मध्ये

वियोगसे मोक्ष है ऐसा कहते हैं;—[**हे जीव**] हे जीव [**बंधमपि**] बंधको [**मोक्षमपि**] और मोक्षको [**सकलं**] सबको [**जीवानां**] जीवोंके [**कर्म**] कर्म ही [**जनयति**] करता है [**आत्मा**] आत्मा [**किमपि**] कुछ भी [**नैव करोति**] नहीं करता [**निश्चयः**] निश्चयनय [**एवं**] ऐसा [**भणति**] कहता है अर्थात् निश्चयनयसे भगवानने ऐसा कहा है । **भावार्थ**—अनादिकालकी संबंधवाली अयथार्थस्वरूप अनुपचरितासद्भूतव्यवहारनयसे ज्ञानावरणादि द्रव्य कर्मबंध और अशुद्धनिश्चयनयसे रागादि भावकर्मके बंधको तथा दोनों नयोंसे द्रव्यकर्म भावकर्मकी मुक्तिको यद्यपि जीव करता है तौभी शुद्धपारिणामिकपरमभावके ग्रहण करनेवाले शुद्धनिश्चयनयसे नहीं करताहै बंध और मोक्षसे रहित है ऐसा भगवानने कहा है । यहां जो शुद्धनिश्चयनयकर बंध और मोक्षका कर्ता नहीं वही शुद्धात्मा आराधने योग्य है ॥ ६५ ॥

आगे दोहासूत्रोंकी स्थलसंख्यासे बाहर उक्तंच स्वरूप प्रक्षेपकको कहते हैं;—[**अत्र**] इस जगतमें [**सः कः अपि**] ऐसा कोई भी [**प्रदेशः नास्ति**] प्रदेश (स्थान) नहीं है कि [**यत्र**] जिस जगह [**चतुरशीतियोनिलक्षमध्ये**] चौरासीलाख योनिमें होकर [**जि-**

भूत्वा जिनवचनमलभमानो यत्र न भ्रमितो जीव इति । तथाहि । भेदाभेदरत्नत्रयप्रतिपादकं जिनवचनमलभमानः सन्नयं जीवोऽनादिकाले यत्र चतुरशीतियोनिलक्षेषु मध्ये भूत्वा न भ्रमितः सोत्र जगति कोपि प्रदेशो नास्ति इति । अत्र यदेव भेदाभेदरत्नत्रयप्रतिपादकं जिनवचनमलभमानो भ्रमितो जीवस्तदेवोपादेयात्मसुखप्रतिपादकत्वादुपादेयमिति तात्पर्यार्थः ॥ ६६ ॥

अथात्मा पंगुवत् स्वयं न याति न चैति कर्मैव नयत्यानयति चेति कथयति;—

अप्पा पंगुहु अणुहरइ, अप्पु ण जाइ ण एइ ।
भुवणत्तयहं वि मज्झि जिय, विहि आणइं विहि णेइ ॥ ६७ ॥

आत्मा पंगोः अनुहरति आत्मा न याति न आयाति ।
भुवनत्रयस्य अपि मध्ये जीव विधिः आनयति विधिः नयति ॥ ६७ ॥

अप्पा पंगुहु अणुहरइ अप्पुण जाइ ण एइ आत्मा पंगोरनुहरति सदृशो भवति अयमात्मा न याति न चागच्छति । क । **भुवणत्तयहंवि मज्झि जिय विहि आणइ विहि णेइ** भुवनत्रयस्यापि मध्ये हे जीव विधिरानयति विधिर्नयतीति । तद्यथा । अयमात्मा शुद्धनिश्चयेनानंतवीर्यत्वात शुभाशुभकर्मरूपनिगलद्वयरहितोपि व्यवहारेण अनादिसंसारे स्वशुद्धात्मभावनाप्रतिबंधकेन मनोवचनकायत्रयेणोपार्जितेन कर्मणा निर्मितेन पुण्यपापनिगलद्वयेन दृढतरं बद्धः सन पंगुवद्भूत्वा स्वयं न याति न चागच्छति स एवात्मा परमात्मोपलंभप्रतिपक्षभूतेन विधिशब्दवाच्येन कर्मणा भुवनत्रये नीयते तथैवानीयते चेति । अत्र

नवचनं अलभमानः] जिनवचनको नहीं प्राप्त करताहुआ [**जीवः**] यह जीव [**न भ्रमितः**] नहीं भटका । **भावार्थ**—इस जगतमें कोई ऐसा स्थान नहीं रहा कि जहांपर यह जीव निश्चय व्यवहार रत्नत्रयको कहनेवाले जिनवचनको नहीं पाता हुआ अनादिकालसे चौरासीलाखयोनिमें होकर न घूमा हो अर्थात् जिनवचनकी प्रतीति न करनेसे सबजगह और सब योनियोंमें भ्रमणकिया जन्म मरण किये । यहां यह तात्पर्य है कि जिनवचनके न पानेसे यह जीव जगतमें भ्रमा इसलिये जिनवचन ही आराधने योग्य हैं ॥ ६६ ॥

आगे आत्मा पांगलेकी तरह आप न तो कहीं जाता है और न आता है कर्मही इसको ले जाते हैं और ले आते हैं ऐसा कहते हैं;—[**हे जीव**] हे जीव [**आत्मा**] यह आत्मा [**पंगोः अनुहरति**] पांगलेके समान है [**आत्मा**] आप [**न याति**] न कहीं जाता है [**न आयाति**] न आता है [**भुवनत्रयस्य अपि मध्ये**] तीनों लोकमें इस जीवको [**विधिः**] कर्म ही [**नयति**] ले जाता है [**विधिः**] कर्म ही [**आनयति**] ले आता है । **भावार्थ**—यह आत्मा शुद्ध निश्चयनयसे अनंतवीर्य (बल)का धारण कर-

वीतरागसदानंदैकरूपात्सर्वप्रकारोपादेयभूतात्परमात्मनो यद्भिन्नं शुभाशुभकर्मद्वयं तद्धेयमिति भावार्थः ॥ ६७ ॥ इति कर्मशक्तिस्वरूपकथनस्थले सूत्राष्टकं गतं ।

अत ऊर्ध्वं भेदाभेदभावनामुख्यतया पृथक् पृथक् स्वतंत्रसूत्रनवकं कथयति;—

अप्पा अप्पुजि परु जि परु, अप्पा परु जि ण होइ ।
परु जि कयाइवि अप्पु णवि, णियमिं पभणहिं जोइ ॥ ६८ ॥

आत्मा आत्मा एव परः एव परः आत्मा परः एव न भवति ।
पर एव कदाचिदपि आत्मा नैव नियमेन प्रभणंति योगिनः ॥ ६८ ॥

अप्पा अप्पु जि परु जि परु, अप्पा परु जि ण होइ आत्मात्मैव पर एव परः आत्मा पर एव न भवति **परु जि कयाइवि अप्पु णवि णियमें पभणहिं जोइ** पर एव कदाचिदप्यात्मा नैव भवति नियमेन निश्चयेन भणंति कथयंति। के कथयंति। परमयोगिन इति। तथाहि। शुद्धात्मा केवलज्ञानादिस्वभावः शुद्धात्मात्मैव परः कामक्रोधादिस्वभावः पर एव पूर्वोक्तः। परमात्माभिधानं तदैकस्वस्वभावं त्यक्त्वा कामक्रोधादिरूपो न भवति। कामक्रोधादिरूपः परः क्वापि काले शुद्धात्मा न भवतीति परमयोगिनः कथयंति। अत्र मोक्षसुखादुपादेयभूतादभिन्नः कामक्रोधादिभ्यो भिन्नो यः शुद्धात्मा स एवोपादेय इति तात्पर्यार्थः ॥ ६८ ॥

नेवाला होनेसे शुभ अशुभकर्मरूपबंधनसे रहित है तौभी व्यवहारनयसे इस अनादि संसारमें निजशुद्धात्माकी भावनासे विमुख जो मन वचन काय इन तीनोंसे उपार्जे कर्मोंकर उत्पन्न हुए पुण्यपापरूप बंधनोंकर अच्छीतरह बंधा हुआ पांगलेके समान आप न कहीं जाता है न कहीं आता है। जैसे बंदीवान आपसे न कहीं जाता है और न कहीं आता है चौकीदारोंकर ले गया जाता है और आता है आप तो पांगलेके समान है । वही आत्मा परमात्माकी प्राप्तिके रोकनेवाले चतुर्गतिरूपसंसारके कारणस्वरूप कर्मोंकर तीन जगतमें गमन आगमन करता है एक गतिसे दूसरी गतिमें जाता है । यहां सारांश यह है कि वीतराग परम आनंदरूप तथा सबतरह उपादेयरूप परमात्मासे (अपने स्वरूपसे) भिन्न जो शुभ अशुभ कर्म हैं वे त्यागने योग्य हैं ॥ ६७ ॥

इस प्रकार कर्मकी शक्तिके स्वरूपके कहनेकी मुख्यतासे आठवें स्थलमें आठ दोहा कहे। इससे आगे भेदाभेदरत्नत्रयकी भावनाकी मुख्यतासे जुदे २ स्वतंत्र नौ सूत्र कहते हैं;—[**आत्मा**] निजवस्तु [**आत्मा एव**] आत्मा ही है [**परः**] देहादि पदार्थ [**पर एव**] पर ही हैं [**आत्मा**] आत्मा तो [**परः न एव**] परद्रव्य नहीं [**भवति**] होता [**पर एव**] और परद्रव्य भी [**कदाचिदपि**] कभी [**आत्मा न एव**] आत्मा नहीं होता ऐसा [**नियमेन**] निश्चयकर [**योगिनः**] योगीश्वर [**प्रभणंति**] कहते हैं। **भावार्थ**—शुद्धात्मा तो केवलज्ञानादि स्वभाव है जडरूप नहीं है उपाधिरूप नहीं है

अथ शुद्धनिश्चयेनोत्पत्तिर्मरणं बंधमोक्षौ न करोत्यात्मेति प्रतिपादयति;—

णवि उप्पज्जइ णवि मरइ, बंधु ण मोक्खु करेइ ।
जिउ परमत्थें जोइया, जिणवरु एउ भणेइ ॥ ६९ ॥

नापि उत्पद्यते नापि म्रियते बंधं न मोक्षं करोति ।
जीवः परमार्थेन योगिन् जिनवरः एवं भणति ॥ ६९ ॥

नाप्युत्पद्यते नापि म्रियते बंधमोक्षं च न करोति । कोसौ कर्ता । जीवः । केन । परमार्थेन हे योगिन् जिनवर एवं ब्रूते कथयति । तथाहि । यद्यप्यात्मा शुद्धात्मानुभूत्यभावे सति शुभाशुभोपयोगाभ्यां परिणम्य जीवितमरणशुभाशुभबंधान् करोति । शुद्धात्मानुभूतिसद्भावे तु शुद्धोपयोगेन परिणम्य मोक्षं च करोति तथापि शुद्धपारिणामिकपरमभावग्राहकेण शुद्धद्रव्यार्थिकनयेन न करोति । अत्राह शिष्यः । यदि शुद्धद्रव्यार्थिकलक्षणेन शुद्धनिश्चयेन मोक्षं च न करोति तर्हि शुद्धनयेन मोक्षो नास्तीति तदर्थमनुष्ठानं वृथा । परिहारमाह । मोक्षो हि बंधपूर्वकः स च बंधः शुद्धनिश्चयेन नास्ति तेन कारणेन बंधप्रतिपक्षभूतो मोक्षः सोपि शुद्धनिश्चयेन नास्ति यदि पुनः शुद्धनिश्चयेन बंधो भवति तदा

शुद्धात्मस्वरूपही है । पर जो कामक्रोधादि पर वस्तु भावकर्म द्रव्यकर्म नोकर्म हैं वे पर ही हैं अपने नहीं हैं, जो यह आत्मा संसार अवस्थामें यद्यपि अशुद्धनिश्चयनयकर कामक्रोधादिरूप हो गया है तौभी परमभावके ग्राहक शुद्धनिश्चयनयकर अपने ज्ञानादि निजभावको छोड़कर कामक्रोधादिरूप नहीं होता अर्थात् निजभावरूप ही है । ये रागादिविभावपरिणाम उपाधिक हैं परके संबंधसे हैं निजभाव नहीं है इसलिये आत्मा कभी इन रागादिरूप नहीं होता ऐसा योगीश्वर कहते हैं । यहां उपादेयरूप मोक्षसुख (अतींद्रिय सुख) से तन्मय और काम क्रोधादिकसे भिन्न जो शुद्धात्मा है वही उपादेय है ऐसा अभिप्राय है ॥ ६८ ॥

आगे शुद्धनिश्चयनयकर आत्मा जन्म मरण बंध और मोक्षको नहीं करता है जैसा है वैसा ही है ऐसा निरूपण करते हैं;—[**हे योगिन्**] हे योगीश्वर [**परमार्थेन**] निश्चयनयकर विचारा जावे तो [**जीवः**] यह जीव [**नापि उत्पद्यते**] न तो उत्पन्न होता है [**नापि म्रियते**] न मरता है [**च**] और [**न बंधं मोक्षं**] न बंध मोक्षको [**करोति**] करता है अर्थात् शुद्ध निश्चयसे बंधमोक्षसे रहित है [**एवं**] ऐसा [**जिनवरः**] जिनेन्द्रदेव [**भणति**] कहते हैं । **भावार्थ**—यद्यपि यह आत्मा शुद्धात्मानुभूतिके अभावके होनेपर शुभअशुभ उपयोगोंसे परिणमनकरके जीवन मरण शुभअशुभकर्मबंधको करता है और शुद्धात्मानुभूतिके प्रगट होनेपर शुद्धोपयोगसे परिणत होकर मोक्षको करता है, तौभी शुद्ध पारिणामिक परमभावग्राहक शुद्धद्रव्यार्थिकनयकर न बंधका कर्ता है और

सर्वदैव बंध एव । अस्मिन्नर्थे दृष्टांतमाह । एकः कोपि पुरुषः शृंखलाबद्धस्तिष्ठति द्वितीयस्तु बंधनरहितस्तिष्ठति । यस्य बंधभावो मुक्त इति व्यवहारो घटते, द्वितीयं प्रति मोक्षो ज्ञातो भवत इति यदि भण्यते तदा कोपं करोति । कस्माद्बंधाभावे मोक्षवचनं कथं घटत इति । तथा जीवस्यापि शुद्धनिश्चयेन बंधाभावे मुक्तवचनं न घटते इति । अत्र वीतरागनिर्विकल्पसमाधिरतो मुक्तजीवसदृशः स्वशुद्धात्मोपादेय इति भावार्थः ॥ ६९ ॥

अथ निश्चयनयेन जीवस्योद्भवजरामरणरोगलिंगवर्णसंज्ञा नास्तीति कथयंति;—

अत्थि ण उब्भउ जरमरणु, रोयवि लिंगवि वण्ण ।
णियमिं अप्पु वियाणि तुहुं, जीवहं एक्कवि सण्ण ॥ ७० ॥

अस्ति न उद्भवः जरामरणः रोगाः अपि लिंगान्यपि वर्णाः ।
नियमेन आत्मन् विजानीहि त्वं जीवस्य एकापि संज्ञा ॥ ७० ॥

अत्थि ण उब्भउ जरमरणु रोयवि लिंगवि वण्ण अस्ति न न विद्यते । किं किं नास्ति । उब्भउ उत्पत्तिः जरामरणरोगा अपि लिंगान्यपि वर्णाः **णियमिं अप्पु वियाणि**

न मोक्षका कर्ता है । ऐसा कथनसुनकर शिष्यने प्रश्न किया कि हे प्रभो शुद्धद्रव्यार्थिकस्वरूप शुद्धनिश्चयनयकर मोक्षकाभी कर्ता नहीं है तो ऐसा समझना चाहिये कि शुद्धनयकर मोक्षही नहीं है जब मोक्ष नहीं तब मोक्षके लिये यत्न करना वृथा है । उसका उत्तर कहते हैं—मोक्ष है वह बंधपूर्वक है और बंध है वह शुद्धनिश्चयनयकर होता ही नहीं इसकारण बंधके अभावरूप मोक्ष है वह भी शुद्धनिश्चयनयकर नहीं है । जो शुद्धनिश्चयनयसे बंध होता तो हमेशा बंधा ही रहता कभी बंधका अभाव न होता । इसके बारेमें दृष्टांत कहते हैं—कोई एक पुरुष सांकलसे बंध रहा है और कोई एक पुरुष बंध रहित है उनमेंसे जो पहले बंधा था उसको तो 'मुक्त' (छूटा) ऐसा कहना ठीक मालूम पडता है और दूसरा जो बंधा ही नहीं उसको जो 'आप छूट गये' ऐसा कहा जाय तो वह क्रोध करै जो मैं कब बंधाथा सो यह मुझे 'छूटा' कहता है, बंधा होवै वह छूटै इसलिये बंधेको तो मोक्ष कहना ठीक है और बंधा ही न हो उसे छूटा कैसे कहसकते हैं । उसी प्रकार यह जीव शुद्धनिश्चयनयकर बंधा हुआ नहीं है इसकारण मुक्त कहना ठीक नहीं है । बंध भी व्यवहारनयकर और मुक्ति भी व्यवहारनयकर है, शुद्धनिश्चयनयकर न बंध है न मोक्ष है और अशुद्धनयकर बंध है इसलिये बंधके नाशका यत्न भी अवश्य करना चाहिये । यहां यह अभिप्राय है कि सिद्धसमान यह अपना शुद्धात्मा वीतरागनिर्विकल्पसमाधिमें लीन पुरुषोंको उपादेय है अन्य सब हेय हैं ॥ ६९ ॥

आगे निश्चयनयकर जीवके जन्म जरा मरण रोग लिंग वर्ण और संज्ञा नहीं है आत्मा

तुहुं जीवहं एकवि सण्ण नियमेन निश्चयेन हे आत्मन् हे जीव विजानीहि त्वं । कस्य नास्ति । जीवस्य न केवलमेतन्नास्ति संज्ञापि नास्तीति । अत्र संज्ञाशब्देनाहारादिसंज्ञा नामसंज्ञा वा ग्राह्या । तथाहि । वीतरागनिर्विकल्पसमाधेर्विपरीतैः क्रोधमानमायालोभप्रभृतिविभावपरिणामैर्यान्युपार्जितानि कर्माणि तदुदयजनितान्युद्भवादीनि शुद्धनिश्चयेन न संति जीवस्य । ते कस्मान्न संति । केवलज्ञानाद्यनंतगुणैः कृत्वा निश्चयेनानादिसंतानागतोद्भवादिभ्यो भिन्नत्वादिति । अत्र उपादेयरूपानंतसुखाविनाभूतशुद्धजीवात्तच्छकाशाद्यानि भिन्नान्युद्भवादीनि तानि हेयानीति तात्पर्यार्थः ॥ ७० ॥

यद्युद्भवादीनि स्वरूपाणि शुद्धनिश्चयेन जीवस्य न संति तर्हि कस्य संतीति प्रश्ने देहस्य भवंतीति प्रतिपादयति;—

देहहं उब्भउ जरमरणु, देहहं वण्णु विचित्तु ।
देहहं रोय वियाणि तुहुं, देहहं लिंगु विचित्तु ॥ ७१ ॥

देहस्य उद्भवः जरा मरणं देहस्य वर्णः विचित्रः ।
देहस्य रोगान् विजानीहि त्वं देहस्य लिंगं विचित्रं ॥ ७१ ॥

देहस्य भवति । किं किं । **उब्भउ** उत्पत्तिः जरामरणं च वर्णो विचित्रः । वर्णशब्देनात्र

इन सब विकारोंसे रहित है ऐसा कहते हैं;—[हे **आत्मन्**] हे जीव आत्माराम [**जीवस्य**] जीवके [**उद्भवः न**] जन्म नहीं [**अस्ति**] है [**जरामरणः**] जरा मरण [**रोगा अपि**] रोगभी [**लिंगान्यपि**] चिन्ह भी [**वर्णाः**] वर्ण [**एका संज्ञा अपि**] आहारादिक एकभी संज्ञा वा नाम नहीं है ऐसा [**त्वं**] तू [**नियमेन**] निश्चयकर [**विजानीहि**] जान । **भावार्थ**—वीतरागनिर्विकल्पसमाधिसे विपरीत जो क्रोध मान माया लोभ आदि विभाव परिणाम उनकर उपार्जन किये कर्मोंके उदयसे उत्पन्न हुए जन्ममरण आदि अनेक विकार हैं वे शुद्धनिश्चयनयकर जीवके नहीं हैं, क्योंकि निश्चयनयकर आत्मा केवलज्ञानादि अनंत गुणोंकर पूर्ण है और अनादिसंतानसे प्राप्त जन्म जरा मरण रोग शोक भय, स्त्री पुरुष नपुंसकलिंग, सफेद काला वगैरः वर्ण, आहार भय मैथुन परिग्रहरूप संज्ञा—इन सबोंसे भिन्न है । यहां उपादेयरूप अनंतसुखका धाम जो शुद्धजीव उससे भिन्न जन्मादिक हैं वे सब त्याज्य हैं एक आत्मा ही उपादेय है यह तात्पर्य जानना ॥ ७० ॥

आगे जो शुद्धनिश्चयनयकर जन्ममरणादि जीवके नहीं हैं तो किसके हैं ऐसा शिष्यके प्रश्न करनेपर समाधान यह है कि ये सब देहके हैं ऐसा कथन करते हैं;— श्रीगुरु कहते हैं कि हे शिष्य [**त्वं**] तू [**देहस्य**] देहके [**उद्भवः**] जन्म [**जरा मरणं**] जरा मरण होते हैं अर्थात् नया शरीर धरना विद्यमान शरीर छोड़ना वृद्ध

पूर्वसूत्रे च श्वेतादि ब्राह्मणादि वा गृह्यते तस्यैव देहस्य रोगान् विजानीहीति लिंगमपि लिंगशब्देनात्र पूर्वसूत्रे च स्त्रीपुंनपुंसकलिंगं यतिलिंगं वा ग्राह्यं चित्तं मनश्चेति । तद्यथा— शुद्धात्मसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयभावनाप्रतिकूलै रागद्वेषमोहैर्यान्युपार्जितानि कर्माणि तदुदयसंपन्ना जन्ममरणादिधर्मा यद्यपि व्यवहारनयेन जीवस्य संति तथापि निश्चयनयेन देहस्येति ज्ञातव्यं । अत्र देहादिममत्वरूपविकल्पजालं त्यक्त्वा यदा वीतराग-सदानंदैकरूपेण सर्वप्रकारोपादेयभूतेन परिणमति तदा स्वशुद्धात्मैवोपादेय इति भावार्थः॥७१

अथ देहस्य जरामरणं दृष्ट्वा मा भयं जीव कार्षीरिति निरूपयति;—

देहहं पेक्खवि जरमरणु, मा भउ जीव करेहि ।
जो अजरामरु बंभु परु, सो अप्पाणु मुणेहि ॥ ७२ ॥

देहस्य दृष्ट्वा जरामरणं मा भयं जीव कार्षीः ।
यः अजरामरः ब्रह्म परः तं आत्मानं मन्यस्व ॥ ७२ ॥

देहहं पेक्खवि जरमरणु मा भउ जीव करेहि देहसंबंधि दृष्ट्वा । किं । जरामरणं मा भयं कार्षीः हे जीव । अयमर्थो यद्यपि व्यवहारेण जीवस्य जरामरणं तथापि शुद्धनिश्चयेन देहस्य न च जीवस्येति मत्वा भयं मा कार्षीः । तर्हि किं कुरु । **जो अजरामरु बंभु परु सो अप्पाणु मुणेहि** यः कश्चिदजरामरो जरामरणरहितब्रह्मशब्दवाच्यः शुद्धात्मा ।

अवस्था होना ये सब देहके जानो [**देहस्य**] देहके [**विचित्रः वर्णः**] अनेकतरहके सफेद श्याम हरे पीले लालरूप पांचवर्ण अथवा ब्राह्मण क्षत्रिय वैश्य शूद्र ये चार वर्ण [**देहस्य**] देहके [**रोगान्**] वात पित्त कफ आदि अनेक रोग [**देहस्य**] देहके [**विचित्रं लिंगं**] अनेक प्रकारके स्त्रीलिंग पुरुषलिंग नपुंसकलिंग रूप चिन्हको अथवा यतिके लिंगको और द्रव्यमनको [**विजानीहि**] जान । **भावार्थ**—शुद्धात्माका सच्चा श्रद्धान ज्ञान आचरणरूप अभेद रत्नत्रयकी भावनासे विमुख जो रागद्वेषमोह उनकर उपार्जे जो कर्म उनसे उपजे जन्ममरणादिविकार हैं वे सब यद्यपि व्यवहारनयसे जीवके हैं तौभी निश्चयनयकर जीवके नहीं हैं देहसंबंधी हैं ऐसा जानना चाहिये । यहांपर देहादिकमें ममतारूप विकल्पजालको छोड़कर जिससमय यह जीव वीतराग सदा आनंदरूप सबतरह उपादेयरूप निजभावोंकर परिणमता है तब अपना यह शुद्धात्मा ही उपादेय है ऐसा अभिप्राय जानो ॥ ७१ ॥

आगे ऐसा कहते हैं कि हे जीव तू जरा मरण देहके जानकर डर मत करै;— [**हे जीव**] हे आत्माराम तू [**देहस्य**] देहके [**जरामरणं**] बुढापा मरनेको [**दृष्ट्वा**] देखकर [**भयं**] डर [**मा कार्षीः**] मत करै [**यः**] जो [**अजरामरः**] अजर अमर

कथंभूतः । परः सर्वोत्कृष्टस्तमित्थंभूतं परं ब्रह्मस्वभावमात्मानं जानीहि पंचेंद्रियविषयप्रभृतिसमस्तविकल्पजालं मुक्त्वा परमसमाधौ स्थित्वा तमेव भावयेति भावार्थः ॥ ७२ ॥

अथ देहे छिद्यमानेपि भिद्यमानेपि शुद्धात्मानं भावयेत्यभिप्रायं मनसि धृत्वा सूत्रं प्रतिपादयति;—

छिज्जउ भिज्जउ जाउ खउ, जोइय एहु सरीरु ।
अप्पा भावहि णिम्मलउ, जिं पावहि भवतीरु ॥ ७३ ॥

छिद्यतां भिद्यतां यातु क्षयं योगिन् इदं शरीरम् ।
आत्मानं भावय निर्मलं येन प्राप्नोसि भवतीरं ॥ ७३ ॥

छिज्जउ भिज्जउ जाउ खउ जोइय एहु सरीरु छिद्यतां वा द्विधा भवतु भिद्यतां वा छिद्री भवतु क्षयं वा यातु हे योगिन् इदं शरीरं तथापि त्वं किं कुरु । **अप्पा भावहि णिम्मलउ** आत्मानं वीतरागचिदानंदैकस्वभावं भावय । किं विशिष्टं । निर्मलं भावकर्मद्रव्यकर्मनोकर्मरहितं । येन किं भवति । **जिं पावहि भवतीरु** येन परमात्मध्यानेन प्राप्नोसि लभसे त्वं हे जीव । किं । भवतीरं संसारसागरावसानमिति । अत्र योसौ देहस्य छेदनादिव्यापारेपि रागद्वेषादिक्षोभमकुर्वन् सन् शुद्धात्मानं भावयतीति संपादनादर्वाङ्मोक्षं स गच्छतीति भावार्थः ॥ ७३ ॥

[**परः ब्रह्म**] परम ब्रह्म शुद्धस्वभाव है [**तं**] उसको तू [**आत्मानं**] आत्मा [**मन्यस्व**] जान । **भावार्थ**—यद्यपि व्यवहार नयसे जीवके जरा मरण हैं तौभी शुद्धनिश्चयनयकर जीवके नहीं हैं देहके हैं ऐसा जानकर भय मत करै तू अपने चित्तमें ऐसा समझ कि जो कोई जरा मरणरहित अखंड पर ब्रह्म है वैसा ही मेरा स्वरूप है शुद्धात्मा सबसे उत्कृष्ट है ऐसा तू अपना स्वभाव जान । पांच इंद्रियोंके विषयोंको आदिदे समस्त विकल्पजालोंको छोड़कर परमसमाधिमें स्थिर होकर निज आत्माको ही ध्याय यह तात्पर्य हुआ ॥ ७२ ॥

आगे जो देह छिद जावे भिद जावे क्षय हो जावे तौभी तू भय मत करै केवल शुद्ध आत्माका ध्यानकर ऐसा अभिप्राय मनमें रखकर सूत्र कहते हैं—[**हे योगिन्**] हे योगी [**इदं शरीरं**] यह शरीर [**छिद्यतां**] छिदजावै दो टुकडे हो जावें [**भिद्यतां**] अथवा भिद जावै छेदसहित हो जावै [**क्षयं यातु**] नाशको प्राप्त होवै तौभी तू भय मतकरै मनमें खेद मत लावै [**निर्मलं आत्मानं**] अपने निर्मल आत्माका ही [**भावय**] ध्यानकर अर्थात् वीतराग चिदानंद शुद्धस्वभाव तथा भावकर्म द्रव्यकर्म नोकर्मसे रहित अपने आत्माका चिंतवन कर [**येन**] जिस परमात्माके ध्यानसे तू [**भवतीरं**] भवसागरका पार [**प्राप्नोसि**] पावै । **भावार्थ**—जो देहके छेदनादि कार्य होते भी रागद्वेषादि वि-

अथ कर्मकृतभावानचेतनं द्रव्यं च निश्चयनयेन जीवाद्भिन्नं जानीहीति कथयति;—

कम्महं केरा भावडा, अण्णु अचेयणु दव्वु ।
जीवसहावहं भिण्णु जिय, णियमिं बुज्झहि सव्वु ॥ ७४ ॥

कर्मणः कृता भावाः अन्यत् अचेतनं द्रव्यं ।
जीवस्वभावात् भिन्नं जीव नियमेन बुध्यस्व सर्वं ॥ ७४ ॥

कम्महं केरा भावडा अण्णु अचेयणु दव्वु कर्मसंबंधिनो रागादि भावानन्यं चाचेतनं देहादिद्रव्यं एतत्पूर्वोक्तं **अप्पसहावहं भिण्णु जिय** विशुद्धज्ञानदर्शनस्वरूपादात्मस्वभावान्निश्चयेन भिन्नं पृथग्भूतं हे जीव **णियमिं बुज्झहि सव्वु** नियमेन निश्चयेन बुध्यस्व जानीहि सर्वं समस्तमिति । अत्र मिथ्यात्वाविरतिप्रमादकषाययोगनिवृत्तिपरिणामकाले शुद्धात्मोपादेय इति तात्पर्यार्थः ॥ ७४ ॥

अथ ज्ञानमयपरमात्मनः सकाशादन्यत्परद्रव्यं मुक्त्वा शुद्धात्मानं भावयेति निरूपयति;-

अप्पा मेल्लिवि णाणमउ, अण्णु परायउ भाउ ।
सो छंडेविणु जीव तुहुं, भावहि अप्पसहाउ ॥ ७५ ॥

आत्मानं मुक्त्वा ज्ञानमयं अन्यः परः भावः ।
तं छंडयित्वा जीव त्वं भावय आत्मस्वभावं ॥ ७५ ॥

अप्पा मिल्लिवि णाणमउ अण्णु परायउ भाउ आत्मानं मुक्त्वा । किं विशिष्टं । ज्ञानमयं केवलज्ञानांतर्भूतानंतगुणराशिं निश्चयात् अन्यो भिन्नोऽभ्यंतरे मिथ्यात्वरागादि

कल्प नहीं करता निर्विकल्प भावको प्राप्त हुआ शुद्ध आत्माको ध्यावता है वह थोड़े ही समयमें मोक्षको पाता है ॥ ७३ ॥

आगे ऐसा कहते हैं जो कर्मजनितरागादिभाव और शरीरादि पर वस्तु हैं वे चेतन द्रव्य न होनेसे निश्चयनयकर जीवसे भिन्न हैं ऐसा जानो;—[**हे जीव**] हे जीव [**कर्मणः कृता भावाः**] कर्मोंकर जन्य रागादिक भाव और [**अन्यत्**] दूसरा [**अचेतनं द्रव्यं**] शरीरादिक अचेतन पदार्थ [**सर्वं**] इन सबको [**नियमेन**] निश्चयसे [**जीवस्वभावात्**] जीवके स्वभावसे [**भिन्नं**] जुदे [**बुध्यस्व**] जानो अर्थात् ये सब कर्मके उदयसे उत्पन्न हुए हैं आत्माका स्वभाव निर्मलज्ञानदर्शनमई है । **भावार्थ**—यह है कि जो मिथ्यात्व अविरत प्रमाद कषाय योगोंकी निवृत्तिरूप परिणाम हैं उस समय शुद्ध आत्मा ही उपादेय है ॥ ७४ ॥

आगे ज्ञानमई परमात्मासे भिन्न परद्रव्यको छोड़कर तू शुद्धात्माका ध्यानकर ऐसा कहते हैं;—[**हे जीव**] हे जीव [**त्वं**] तू [**ज्ञानमयं**] ज्ञानमई [**आत्मानं**] आ-

बहिर्विषये देहादिपरभावः **सो छंडेविणु जीव तुहुं भावहि अप्पसहाउ** तं पूर्वोक्तं शुद्धात्मनो विलक्षणं परभावं छंडयित्वा त्यक्त्वा हे जीव त्वं भावय । कं । स्वशुद्धात्मस्वभावं । किं विशिष्टं । केवलज्ञानाद्यनंतचतुष्टयव्यक्तिरूपकार्यसमयसारसाधकमभेदरत्नत्रयात्मककारणसमयसारपरिणतमिति । अत्र तमेवोपादेयं जानीहीत्यभिप्रायः ॥ ७५ ॥

अथ निश्चयेनाष्टकर्मसर्वदोषरहितं सम्यग्दर्शनज्ञानचारित्रसहितमात्मानं जानीहीति कथयति;—

अट्ठहं कम्महं बाहिरउ, सयलहं दोसइं चत्तु ।
दंसणणाणचरित्तमउ, अप्पा भावि णिरुत्तु ॥ ७६ ॥

अष्टाभ्यः कर्मभ्यः बाह्यं सकलैः दोषैः त्यक्तं ।
दर्शनज्ञानचारित्रमयं आत्मानं भावय निश्चितं ॥ ७६ ॥

अट्ठहं कम्महं बाहिरउ सयलहं दोसहं चत्तु अष्टकर्मभ्यो बाह्यं शुद्धनिश्चयेन ज्ञानावरणाद्यष्टकर्मभ्यो भिन्नं मिथ्यात्वरागादिभावकर्मरूपसर्वदोषैस्त्यक्तं । पुनश्च किं विशिष्टं । **दंसणणाणचरित्तमउ** दर्शनज्ञानचारित्रमयं शुद्धोपयोगाविनाभूतैः स्वशुद्धात्मसम्यग्दर्शनज्ञानचारित्रैर्निर्वृत्तं **अप्पा भावि णिरुत्तु** तमित्थंभूतमात्मानं भावय । दृष्टश्रुतानुभूतभोगाकांक्षारूपनिदानबंधादिसमस्तविभावपरिणामान त्यक्त्वा भावयेत्यर्थः । णिरुत्तु निश्चितं । अत्र निर्वाणसुखादुपादेयभूतादभिन्नः समस्तभावकर्मद्रव्यकर्मभ्यो भिन्नो योसौ शुद्धात्मा स एवाभेदरत्नत्रयपरिणतानां भव्यानामुपादेय इति भावार्थः ॥ ७६ ॥ एवं त्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्ये पृथक् पृथक् स्वतंत्रं भेदभावनास्थलसूत्रनवकं गतं ।

त्माको [**मुक्त्वा**] छोड़कर [**अन्यः परः भावः**] अन्य जो दूसरे भाव हैं [**तं**] उनको [**छंडयित्वा**] छोडकर [**आत्मस्वभावं**] अपने शुद्धात्मस्वभावको [**भावय**] चिंतवनकर **भावार्थ**—केवलज्ञानादि अनंतगुणोंकी राशि आत्मासे जुदे जो मिथ्यात्वरागादि अंदरके भाव तथा देहादि बाहिरके पर भाव ऐसे जो शुद्धात्मासे विलक्षण परभाव हैं उनको छोड़कर केवल ज्ञानादि अनंतचतुष्टयरूप कार्यसमयसारका साधक जो अभेदरत्नयरूप कारण समयसार है उस रूप परिणत हुए अपने शुद्धात्मस्वभावको चिंतवन कर और उसीको उपादेय समझ, ऐसा हुआ ॥ ७५ ॥

आगे निश्चयनयकर आठ कर्म और सब दोषोंरहित सम्यग्दर्शन ज्ञान चरित्रमई आत्माको तू जान ऐसा कहते हैं;—[**अष्टाभ्यः कर्मभ्यः**] शुद्धनिश्चयनयकर ज्ञानावरणादि आठ कर्मोंसे [**बाह्यं**] रहित [**सकलैः दोषैः**] मिथ्यात्वरागादि सब विकारोंसे [**त्यक्तं**] रहित [**दर्शनज्ञानचारित्रमयं**] शुद्धोपयोगके साथ रहनेवाले अपने सम्यग्दर्शन ज्ञान चारित्ररूप भावस्वरूप [**आत्मानं**] आत्माको [**निश्चितं**] निश्चयकर [**भावय**] चिंत-

तदनंतरं निश्चयसम्यग्दृष्टिमुख्यत्वेन स्वतंत्रसूत्रमेकं कथयति;—

अप्पिं अप्पु मुणंतु जिउ, सम्मादिट्ठि हवेइ ।
सम्माइट्ठिउ जीवडउ, लहु कम्मइ मुच्चेइ ॥ ७७ ॥

आत्मना आत्मानं जानन् जीवः सम्यग्दृष्टिः भवति
सम्यग्दृष्टिः जीवः लघु कर्मणा मुच्यते ॥ ७७ ॥

अप्पिं अप्पु मुणंतु जिउ सम्मादिट्ठि हवेइ आत्मनात्मानं जानन् सन् जीवो वीतरागस्वसंवेदनज्ञानपरिणतेनांतरात्मना स्वशुद्धात्मानं जानन्ननुभवन् सन् जीवः कर्ता वीतरागसम्यग्दृष्टिर्भवति । निश्चयसम्यक्त्वभावनायां फलं कथ्यते **सम्माइट्ठिउ जीवडउ लहु कम्मइ मुच्चेइ** सम्यग्दृष्टिः जीवो लघु शीघ्रं ज्ञानावरणादिकर्मणा मुच्यते इति । अत्र येनैव कारणेन वीतरागसम्यग्दृष्टिः किल कर्मणा शीघ्रं मुच्यते तेनैव कारणेन वीतरागचारित्रानुकूलं शुद्धात्मानुभूत्यविनाभूतं वीतरागसम्यक्त्वमेव भावनीयमित्यभिप्रायः । तथाचोक्तं श्रीकुंदकुंदाचार्यैर्मोक्षप्राभृते निश्चयसम्यक्त्वलक्षणं—"सद्दव्वरवो सवणो सम्मादिट्ठी हवेइ णियमेण । सम्मत्तपरिणदो उण खवेइ दुट्ठट्ठ कम्माइं" ॥ ७७ ॥

बन कर । **भावार्थ**—देखे सुने अनुभवे भोगोंकी अभिलाषारूप सब विभाव परिणामोंको छोड़कर निजस्वरूपका ध्यानकर । यहां उपादेयरूप अतींद्रियसुखसे तन्मई और सब भावकर्म द्रव्यकर्म नोकर्मसे जुदा जो शुद्धात्मा है वही अभेद रत्नत्रयको धारण करनेवाले निकटभव्योंको उपादेय है ऐसा तात्पर्य हुआ ॥ ७६ ॥

ऐसें तीन प्रकार आत्माके कहनेवाले प्रथम महाधिकारमें जुदे जुदे स्वतंत्र भेदभावनाके स्थलमें नौ दोहासूत्र कहे । आगे निश्चयकर सम्यग्दृष्टीकी मुख्यतासे स्वतंत्र एक दोहासूत्र कहते हैं;—[**आत्मानं**] अपनेको [**आत्मना**] अपनेसे [**जानन्**] जानता हुआ यह [**जीवः**] जीव [**सम्यग्दृष्टिः**] सम्यग्दृष्टि [**भवति**] होता है [**सम्यग्दृष्टिः जीवः**] और सम्यग्दृष्टि हुआसंता [**लघु**] जल्दी [**कर्मणा**] कर्मोंसे [**मुच्यते**] छूट जाता है ॥ **भावार्थ**—यह आत्मा वीतराग स्वसंवेदनज्ञानमें परिणत हुआ अंतरात्मा होकर अपनेको अनुभवता हुआ वीतराग सम्यग्दृष्टि होता है तब सम्यग्दृष्टि होनेके कारणसे ज्ञानवरणादि कर्मोंकर शीघ्र ही छूट जाता है रहित हो जाता है । यहां जिस हेतु वीतराग सम्यग्दृष्टि होनेसे यह जीव कर्मोंसे छूटकर सिद्ध हो जाता है इसीकारण वीतराग चारित्रके अनुकूल जो शुद्धात्मानुभूतिरूप वीतराग सम्यक्त्व है वही ध्यावने योग्य है ऐसा अभिप्राय हुआ । ऐसा ही कथन श्रीकुंदकुंदाचार्यने मोक्षपाहुडिग्रंथमें निश्चयसम्यक्त्वके लक्षणमें किया है "सद्दव्वरओ" इत्यादि—उसका अर्थ यह है कि आत्मस्वरूपमें मगन

अत ऊर्ध्वं मिथ्यादृष्टिलक्षणकथनमुख्यत्वेन सूत्राष्टकं कथ्यते तद्यथा;—

पज्जयरत्तउ जीवडउ, मिच्छादिट्ठि हवेइ ।
बंधइ बहुविहकम्मडा, जे संसारु भमेइ ॥ ७८ ॥

पर्यायरक्तो जीवः मिथ्यादृष्टिः भवति ।
बध्नाति बहुविधकर्माणि यैः संसारं भ्रमति ॥ ७८ ॥

पज्जयरत्तउ जीवडउ मिच्छादिट्ठि हवेइ पर्यायरक्तो जीवो मिथ्यादृष्टिर्भवति परमात्मानुभूतिरुचिप्रतिपक्षभूताभिनिवेशरूपा व्यावहारिकमूढत्रयादिपंचविंशतिमलांतर्भाविनी मिथ्या वितथा व्यलीका च सा दृष्टिरभिप्रायो रुचिः प्रत्ययः श्रद्धानं यस्य स भवति मिथ्यादृष्टिः । स च किं विशिष्टः । नरनारकादिविभावपर्यायरतः । तस्य मिथ्यापरिणामस्य फलं कथ्यते । **बंधइ बहुविहकम्मडा जे संसारु भमेइ** बध्नाति बहुविधकर्माणि यैः संसारं भ्रमति येन मिथ्यात्वपरिणामेन शुद्धात्मोपलब्धेः प्रतिपक्षभूतानि बहुविधकर्माणि बध्नाति तैश्च कर्मभिर्द्रव्यक्षेत्रकालभवभावरूपं पंचप्रकारं संसारं परिभ्रमतीति । तथा चोक्तं मोक्षप्राभृते निश्चयमिथ्यादृष्टिलक्षणं । "जो पुणु परदव्वरओ मिच्छाइट्ठी हवेइ सो साहू । मिच्छत्तपरिणदो उण वज्झदि दुट्ठट्ठकम्मेहिं" ॥ पुनश्चोक्तं तैरेव । "जे पज्जएसु णिरदा जीवा परसमइगत्ति णिद्दिट्ठा । आदसहावम्मि ठिदा ते सगसमया मुणेयव्वा" ॥ अत्र स्वसंवित्तिरूपाद्वीतरागसम्यक्त्वात् प्रतिपक्षभूतं मिथ्यात्वं हेयमिति भावार्थः ॥ ७८ ॥

हुआ जो यति वह निश्चयकर सम्यग्दृष्टि होता है फिर वह सम्यग्दृष्टि सम्यक्त्वरूप परिणमता हुआ दुष्ट आठ कर्मोंको क्षय करता है ॥ ७७ ॥

इसके बाद मिथ्यादृष्टिके लक्षणके कथनकी मुख्यतासे आठ दोहा कहते हैं;—[**पर्यायरक्तः जीवः**] शरीर आदि पर्यायमें लीन हुआ जो अज्ञानी जीव है वह [**मिथ्यादृष्टिः**] मिथ्यादृष्टि [**भवति**] होता है और फिर वह [**बहुविधकर्माणि**] अनेक प्रकारके कर्मोंको [**बध्नाति**] बांधता है [**यैः**] जिनसे कि [**संसारं**] संसारमें [**भ्रमति**] भ्रमण करता है । **भावार्थ**—परमात्माकी अनुभूतिरूप श्रद्धासे विमुख जो आठ मद आठ मल छह अनायतन तीन मूढता इन पच्चीस दोषोंकर सहित अतत्त्वश्रद्धानरूप मिथ्यात्व परिणाम जिसके है वह मिथ्यादृष्टि कहलाता है । वह मिथ्यादृष्टि नर नारकादि विभाव पर्यायोंमें लीन रहता है । उस मिथ्यात्व परिणामसे शुद्धात्माके अनुभवसे परान्मुख अनेक तरहके कर्मोंको बांधता है जिनसे कि द्रव्य क्षेत्र काल भव भावरूपी पांच प्रकारके संसारमें भटकता है । ऐसा कोई शरीर नहीं जो इसने न धारण किया हो, ऐसा कोई क्षेत्र नहीं है कि जहां न उपजा हो और मरण किया हो, ऐसा कोई काल नहीं है कि जिसमें इसने जन्म मरण न किये हों, ऐसा कोई भव नहीं जो इसने पाया

अथ मिथ्यात्वोपार्जितकर्मशक्तिं कथयति;—

कम्मइं दिढघणचिक्कणइं, गरुवइं वज्जसमाइं ।
णाणवियक्खणु जीवडउ, उप्पहि पाडहि ताइं ॥ ७९ ॥

कर्माणि दृढघनचिक्कणानि गुरुकाणि वज्रसमानि ।
ज्ञानविचक्षणं जीवं उत्पथे पातयंति तानि ॥ ७९ ॥

कम्मइं दिढघणचिक्कणइं गरुवइं वज्जसमाइं कर्माणि भवंति । किं विशिष्टानि । दृढानि बलिष्टानि घनानि निबिडानि चिक्कणान्यपनेतुमशक्यानि विनाशयितुमशक्यानि गुरुकानि महांति वज्रसमान्यभेद्यानि च । इत्थंभूतानि कर्माणि किं कुर्वंति । **णाणवियक्खणु जीवडउ उप्पहिं पाडइं ताइं** ज्ञानविचक्षणं जीवमुत्पथे पातयंति । तानि कर्माणि युगपल्लोकालोकप्रकाशकेवलज्ञानाद्यनंतगुणविचक्षणं दक्षं जीवमभेदरत्नत्रयलक्षणान्निश्चयमोक्षमार्गात्प्रतिपक्षभूत उन्मार्गे पातयंतीति । अत्रायमेवाभेदरत्नत्रयरूपो निश्चयमोक्षमार्ग उपादेय इत्यभिप्रायः ॥ ७९ ॥

न हो और ऐसे अशुद्धभाव नहीं हैं जो इसके न हुए हों । इस तरह अनंत परावर्तन इसने किये हैं । ऐसाही कथन मोक्षपाहुडमें निश्चय मिथ्यादृष्टिके लक्षणमें श्रीकुंदकुंदाचार्यने कहा है—"जो पुण" इत्यादि । इसका अर्थ यह है कि जो अज्ञानी जीव द्रव्यकर्म भावकर्म नोकर्मरूप परद्रव्यमें लीन हो रहे हैं वो साधुके व्रत धारण करनेपर भी मिथ्यादृष्टि ही हैं सम्यग्दृष्टि नहीं और मिथ्यात्वकर परिणमते दुःखदेनेवाले आठ कर्मोंको बांधते हैं । फिर भी उन आचार्योंने ही मोक्षपाहुडमें कहा है—"जे पज्जयेसु" इत्यादि । उसका अर्थ यह है कि जो नर नारकादि पर्यायोंमें मगन होरहे हैं वे जीव परपर्यायमें रत मिथ्यादृष्टि हैं ऐसा भगवानने कहा हैं और जो उपयोग लक्षणरूप निजभावमें तिष्ठ रहे हैं वे स्वसमयरूप सम्यग्दृष्टि हैं ऐसा जानो । सारांश यह है कि जो परपर्यायमें रत हैं वे तो परसमय (मिथ्यादृष्टि) हैं और जो आत्मस्वभावमें लगे हुए हैं वे स्वसमय (सम्यग्दृष्टि) हैं मिथ्यादृष्टि नहीं हैं । यहांपर आत्मज्ञानरूपी वीतराग सम्यक्त्वसे परान्मुख जो मिथ्यात्व है वह त्यागने योग्य है ॥ ७८ ॥

आगे मिथ्यात्वकर अनेक प्रकार उपार्जन किये कर्मोंसे यह जीव संसार वनमें भ्रमता है उस कर्मशक्तिको कहते हैं;—[**तानि कर्माणि**] वे ज्ञानावरणादि कर्म [**ज्ञानविचक्षणं**] ज्ञानादि गुणसे चतुर [**जीवं**] इस जीवको [**उत्पथे**] खोटे मार्गमें [**पातयंति**] पटकते (डालते) हैं । कैसे हैं वे कर्म! [**दृढघनचिक्कणानि**] बलवान हैं, बहुत हैं विनाशकरनेको अशक्य हैं इसलिये चिकने हैं [**गुरुकाणि**] भारी हैं [**वज्रसमानि**] और वज्रके समान अभेद्य हैं । **भावार्थ**—यह जीव एकसमयमें लोकालोकके

अथ मिथ्यापरिणत्या जीवो विपरीतं तत्त्वं जानातीति निरूपयति;—

जिउ मिच्छत्तें परिणमिउं, विवरिउ तच्चु मुणेइ ।
कम्मविणिम्मियभावडा, ते अप्पाणु भणेइ ॥ ८० ॥

जीवः मिथ्यात्वेन परिणतः विपरीतं तत्त्वं मनुते ।
कर्मविनिर्मितभावान् तान् आत्मानं भणति ॥ ८० ॥

जिउ मिच्छत्तें परिणमिउ विवरिउ तच्चु मुणेइ जीवो मिथ्यात्वेन परिणतः सन् विपरीतं तत्त्वं जानाति शुद्धात्मानुभूतिरुचिविलक्षणेन मिथ्यात्वेन परिणतः सन् जीवः परमात्मादितत्त्वं च यथावत् वस्तुस्वरूपमपि विपरीतं मिथ्यात्वरागादिपरिणतं जानाति । ततश्च किं करोति । **कम्मविणिम्मियभावडा ते अप्पाणु भणेइ** कर्मविनिर्मितान् भावान् तमात्मानं भणति विशिष्टभेदज्ञानाभावाद्गौरस्थूलकृपादिकर्मजनितदेहधर्मात्मानं जानातीत्यर्थः । अत्र तेभ्यः कर्मजनितभावेभ्यो भिन्नो रागादिनिवृत्तिकाले स्वशुद्धात्मैवोपादेय इति तात्पर्यं ॥ ८० ॥

प्रकाशनेवाले केवलज्ञान आदिक अनंत गुणोंसे बुद्धिमान चतुर है तौभी इस जीवको वे संसारके कारण कर्म ज्ञानादि गुणोंका आच्छादनकरके अभेदरत्नत्रयरूप निश्चयमोक्षमार्गसे विपरीत खोटे मार्गमें डालते हैं अर्थात् मोक्षमार्गसे भुलाकर भववनमें भटकाते हैं । यहां यह अभिप्राय है कि संसारके कारण जो कर्म और उनके कारण मिथ्यात्वरागादि परिणाम हैं वे सब हेय हैं तथा अभेदरत्नत्रयरूप निश्चय मोक्षमार्ग है वह उपादेय है ॥ ७९ ॥

आगे मिथ्यात्वपरिणतिसे यह जीव तत्त्वको यथार्थ नहीं जानता विपरीत जानता है ऐसा कहते हैं;—[**जीवः**] यह जीव [**मिथ्यात्वेन परिणतः**] अतत्त्वश्रद्धानरूप परिणया [**तत्त्वं**] आत्माको आदि लेकर तत्त्वोंके स्वरूपको [**विपरीतं**] अन्यका अन्य [**मनुते**] श्रद्धान करता है यथार्थ नहीं जानता । वस्तुका स्वरूप तो जैसा है वैसा ही है तौभी वह मिथ्याती जीव वस्तुके स्वरूपको विपरीत जानता है अपना जो शुद्धज्ञानादिसहित स्वरूप है उसको मिथ्यात्वरागादिरूप जानता है । उससे क्या करता है! [**कर्मविनिर्मितभावान्**] कर्मोंकर रचे गये जो शरीरादि परभाव हैं [**तान्**] उनको [**आत्मानं**] अपने [**भणति**] कहता है अर्थात् भेदविज्ञानके अभावसे गोरा श्याम स्थूल कृश इत्यादि कर्मजनित देहके स्वरूपको अपने जानता है इसीसे संसारमें भ्रमण करता है । **भावार्थ**—यहां पर कर्मोंसे उपार्जन किये भावोंसे भिन्न जो शुद्ध आत्मा है वही जिस समय रागादि दूर होते हैं उससमय उपादेय है क्योंकि तभी शुद्ध आत्माका ज्ञान होता है ऐसा हुआ ॥ ८० ॥

अथानंतरं तत्पूर्वोक्तकर्मजनितभावान् येन मिथ्यापरिणामेन कृत्वा बहिरात्मात्मनि योजयति तं परिणामं सूत्रपंचकेन विवृणोति;—

हउं गोरो हउं सामलउ, हउं जि विभिण्णउ वण्णु ।
हउं तणु अंगउं थूलु हउं, एहउं मूढउ मण्णु ॥ ८१ ॥

अहं गौरः अहं श्यामः अहमेव विभिन्नः वर्णः ।
अहं तन्वगः स्थूलः अहं एवं मूढं मन्यस्व ॥ ८१ ॥

अहं गौरो गौरवर्णः अहं श्यामः श्यामवर्णः । अहमेव भिन्नो नानावर्णः मिश्रवर्णः । क । वर्णविषये रूपविषये । पुनश्च कथंभूतोहं । तन्वंगः कृशांग । पुनश्च कथंभूतोहं । स्थूलः स्थूलशरीरः । इत्थंभूतं मूढात्मानं मन्यस्व । एवं पूर्वोक्तमिथ्यापरिणामपरिणतं जीवं मूढात्मानं जानीहीति । अयमत्र भावार्थः । निश्चयनयेनात्मनो भिन्नान् । कर्मजनितान् गौरस्थूलादिभावान् सर्वथा हेयभूतानपि सर्वप्रकारोपादेयभूते वीतरागनित्यानंदैकस्वभावे शुद्धजीवे यो योजयति स विषयकषायाधीनतया स्वशुद्धात्मानुभूतेश्च्युतः सन् मूढात्मा भवतीति ॥ ८१ ॥ अथ ।

हउं वरु बंभणु वइसु हउं, हउं खत्तिउ हउं सेसु ।
पुरिसु णउंसउ इत्थि हउं, मण्णइ मूढु विसेसु ॥ ८२ ॥

अहं वरः ब्राह्मणः वैश्यः अहं अहं क्षत्रियः अहं शेषः ।
पुरुषः नपुंसकः स्त्री अहं मन्यते मूढः विशेषं ॥ ८२ ॥

हउं वरु बंभणु वइसु हउं हउं खत्तिउ हउं सेसु अहं वरो विशिष्टो ब्राह्मणः अहं वैश्यो

इसके बाद उन पूर्व कथित कर्मजनित भावोंको जिस मिथ्यात्व परिणामसे बहिरात्मा अपने मानता है और वो अपने हैं नहीं ऐसे परिणामोंको पांच दोहासूत्रोंमें कहते हैं;— [**अहं**] मैं [**गौरः**] गोरा हूं [**अहं**] मैं [**श्यामः**] काला हूं [**अहमेव**] मैं ही [**विभिन्नः वर्णः**] अनेकवर्णवाला हूं [**अहं**] मैं [**तन्वंगः**] कृश (पतले) शरीरवाला हूं [**अहं**] मैं [**स्थूलः**] मोटा हूं [**एवं**] इसप्रकार मिथ्यात्वपरिणामकर परिणत मिथ्यादृष्टि जीवको तू [**मूढं**] मूढ [**मन्यस्व**] मान । **भावार्थ**—यह है कि निश्चय नयसे आत्मासे भिन्न जो कर्मजनित गौर स्थूलादि भाव हैं वे सर्वथा त्याज्य हैं और सर्व प्रकार आराधने योग्य वीतराग नित्यानंदस्वभाव जो शुद्धजीव है वह इनसे भिन्न है तौ भी जो पुरुष विषय कषायोंके आधीन होकर शरीरके भावोंको अपने जानता है वह अपनी शुद्धात्मानुभूतिसे रहित हुआ मूढात्मा है ॥ ८१ ॥

आगे फिर भी मिथ्यादृष्टिके लक्षण कहते हैं;—[**मूढः**] मिथ्यादृष्टि अपनेको [**विशेषं मनुते**] ऐसा विशेष मानता है कि [**अहं**] मैं [**वरः ब्राह्मणः**] सबमें श्रेष्ठ ब्राह्मण

वणिक् अहं क्षत्रियोहं शेषः शूद्रादिः । पुनश्च कथंभूतः । **पुरिसु णउंसउ इत्थि हउं मण्णइ मूढु विसेसु** पुरुषो नपुंसकः स्त्रीलिंगोहं मन्यते मूढो विशेषं ब्राह्मणादिविशेषमिति । इदमत्र तात्पर्यं । यन्निश्चयनयेन परमात्मनो भिन्नानपि कर्मजनितान् ब्राह्मणादिभेदान सर्वप्रकारेण हेयभूतानपि निश्चयनयेनोपादेयभूते वीतरागसदानंदैकस्वभावे स्वशुद्धात्मनि योजयति संबंधान् करोति । कोसौ कथंभूतो । ज्ञानपरिणतः स्वशुद्धात्मतत्त्वभावनारहितो मूढात्मेति ॥ ८२ ॥ अथ ।

तरुणउ वूढउ रूयडउ, सूरउ पंडिउ दिव्वु ।
खवणउं वंदउं सेवडउ, मूढउ मण्णइ सव्वु ॥ ८३ ॥

तरुणः वृद्धः रूपस्वी शूरः पंडितः दिव्यः ।
क्षपणकः वंदकः श्वेतपटः मूढः मन्यते सर्वम् ॥ ८३ ॥

तरुणउ वूढउ रूयडउ सूरउ पंडिउ दिव्वु तरुणो यौवनस्थोहं वृद्धोहं रूपस्व्यहं शूरः सुभटोहं पंडितोहं दिव्योहं । पुनश्च किंविशिष्टः । **खवणउं वंदउं सेवडउ** क्षपणको दिगंबरोहं वंदको बौद्धोहं श्वेतपटादिलिंगधारकोहमिति मूढात्मा सर्वं मन्यत इति । अयमत्र तात्पर्यार्थः । यद्यपि व्यवहारेणाभिन्नान् तथापि निश्चयेन वीतरागसहजानंदैकस्वभावात्परमात्मनः भिन्नान् कर्मोदयोत्पन्नान् तरुणवृद्धादिविभावपर्यायान् हेयानपि साक्षादुपादेयभूते स्वशुद्धात्मतत्त्वे योजयति । कोसौ । ख्यातिपूजालाभादिविभावपरिणामाधीनतया परमात्मभावनाच्युतः सन् मूढात्मेति ॥ ८३ ॥ अथ ।

हूं [**अहं**] मैं [**वैश्यः**] वणिक् हूं [**अहं**] मैं [**क्षत्रियः**] क्षत्री हूं [**अहं**] मैं [**शेषः**] इनके सिवाय शूद्र हूं [**अहं**] मैं [**पुरुषः नपुंसकः स्त्री**] पुरुष हूं नपुंसक हूं और स्त्री हूं । इसप्रकार शरीरके भावोंको मूर्ख अपने मानता है । सो ये सब शरीरके हैं आत्माके नहीं हैं । **भावार्थ**—यहां पर ऐसा है कि निश्चयनयसे ये ब्राह्मणादि भेद कर्मजनित हैं परमात्माके नहीं है इसलिये सब तरह आत्मज्ञानीके त्याज्यरूप हैं तौ भी जो निश्चयनयकर आराधने योग्य वीतराग सदा आनंदस्वभाव निज शुद्धात्मामें इन भेदोंको लगाता है अर्थात् अपने को ब्राह्मण क्षत्री वैश्य शूद्र मानता है स्त्री पुरुष नपुंसक मानता है वह कर्मोंका बंध करता है वही अज्ञानसे परिणत हुआ निजशुद्धात्मतत्त्वकी भावनासे रहित हुआ मूढात्मा है ज्ञानवान् नहीं है ॥ ८२ ॥

आगे फिर मूढके लक्षण कहते हैं;—[**तरुणः**] मैं जवान हूं [**वृद्धः**] वुड्ढा हूं [**रूपस्वी**] रूपवान् हूं [**शूरः**] शूरवीर हूं [**पंडितः**] पंडित हूं [**दिव्यः**] सबमें श्रेष्ठ हूं [**क्षपणकः**] दिगंबर हूं [**वंदकः**] बौद्धमतका आचार्य हूं [**श्वेतपटः**] और मैं श्वेतांबर हूं इत्यादि [**सर्वं**] सब शरीरके भेदोंको [**मूढः**] मूर्ख [**मन्यते**] अपने मानता

जणणी जणणुवि कंत घरु, पुत्तुवि मित्तुवि दव्वु ।
मायाजालुवि अप्पणउं, मूढउ मण्णइ सव्वु ॥ ८४ ॥

जननी जननः अपि कांता गृहं पुत्रोपि मित्रमपि द्रव्यं ।
मायाजालमपि आत्मनः मूढः मन्यते सर्वं ॥ ८४ ॥

जणणी जणणुवि कंत घरु पुत्तुवि मित्तुवि दव्वु जननी माता जननः पितापि कांता भार्या गृहं पुत्रोपि मित्रमपि द्रव्यं सुवर्णादि यत्तत्सर्वं **मायाजालुवि अप्पणउ मूढउ मण्णइ सव्वु** मायाजालमप्यसत्यमपि कृत्रिममपि आत्मीयं स्वकीयं मन्यते । कोसौ । मूढो मूढात्मा । कतिसंख्योपेतमपि । सर्वमपीति । अयमत्र भावार्थः । जनन्यादिकं परस्वरूपमपि शुद्धात्मनो भिन्नमपि हेयस्याशेषनारकादिदुःखस्य कारणत्वाद्धेयमपि साक्षादुपादेयभूतानाकुलत्वलक्षणपारमार्थिकसौख्यादभिन्ने वीतरागपरमानंदैकस्वभावे शुद्धात्मतत्त्वे योजयति । स कः । मनोवचनकायव्यापारपरिणतः स्वशुद्धात्मद्रव्यभावनाशून्यो मूढात्मेति ॥ ८४ ॥ अथ ।

है । ये भेद जीवके नहीं हैं । **भावार्थ**—यहांपर यह है कि यद्यपि व्यवहार नयकर ये सब तरुण वृद्धादि शरीरके भेद आत्माके कहे जाते हैं तौ भी निश्चयनयकर वीतराग सहजानंद एक स्वभाव जो परमात्मा उससे भिन्न हैं । ये तरुणादि विभावपर्याय कर्मके उदयकर उत्पन्न हुए हैं इसलिये त्यागने योग्य हैं तौ भी उनको साक्षात् उपादेयरूप निज शुद्धात्मतत्त्वमें जो लगाता है अर्थात् आत्माके मानता है वह अज्ञानी जीव बडाई प्रतिष्ठा धनका लाभ इत्यादि विभावपरिणामोंके आधीन होकर परमात्माकी भावनासे रहित हुआ मूढात्मा है वह जीवके ही भाव मानता है ॥ ८३ ॥

आगे फिर भी मूढके लक्षण कहते हैं;—[**जननी**] माता [**जननः**] पिता [**अपि**] और [**कांता**] स्त्री [**गृहं**] घर [**पुत्रः अपि**] और बेटा बेटी [**मित्रमपि**] मित्र वगैरः सब कुटुम्बजन बहिन भांनजी नाना मामा भाई बंध और [**द्रव्यं**] रत्न माणिक मोती सुवर्ण चांदी धन धान्य द्विपद वांदी धाय नौकर चौपाये गाय बैल घोडा घोडी ऊंट हाथी रथ पालकी वहली ये [**सर्वं**] सब [**मायाजालमपि**] असत्य हैं कर्मजनित हैं तौ भी [**मूढः**] अज्ञानी जीव [**आत्मीयं**] अपने [**मन्यते**] मानता है । **भावार्थ**—ये माता पिता आदि सब कुटुंबजन परस्वरूप भी हैं सब स्वारथके हैं, शुद्धात्मासे भिन्न भी हैं शरीर संबंधी हैं हेयरूप संसारीक नारकादिदुःखोंके कारण होनेसे त्याज्य भी हैं उनको जो जीव साक्षात् उपादेयरूप अनाकुलतास्वरूप परमार्थिक सुखसे अभिन्न वीतराग परमानंदरूप एकस्वभाववाले शुद्धात्मद्रव्यमें लगाता है अर्थात् अपने मानता है वह मन वचन कायरूप परिणत हुआ शुद्ध अपने आत्मद्रव्यकी भावनासे शून्य (रहित) मूढात्मा है

दुक्खहं कारणि जे विसय, ते सुहहेउ रमेइ ।
मिच्छाइट्ठिउ जीवडउ, इत्थु ण काइ करेइ ॥ ८५ ॥

दुःखस्य कारणं ये विषयाः तान् सुखहेतून् रमते ।
मिथ्यादृष्टिः जीवः अत्र न किं करोति ॥ ८५ ॥

दुःखहं कारणि जे विसय ते सुहहेउ रमेइ दुःखस्य कारणं ये विषयास्तान् विषयान् सुखहेतून् मत्त्वा रमते । स कः । **मिच्छाइट्ठिउ जीवडउ** मिथ्यादृष्टिर्जीवः **इत्थु ण काइं करेइ** अत्र जगति योसौ दुःखरूपविषयान् निश्चयनयेन सुखरूपान् मन्यते स मिथ्यादृष्टिः किमकृत्यं पापं न करोति अपि तु सर्वं करोत्येवेति । अत्र तात्पर्यं । मिथ्यादृष्टिर्जीवो वीतरागनिर्विकल्पसमाधिसमुत्पन्नपरमानंदपरमसमरसीभावरूपसुखरसापेक्षया निश्चयेन दुःखरूपानपि विषयान् सुखहेतून् मत्वा अनुभवतीत्यर्थः ॥ ८५ ॥ एवं त्रिविधात्मप्रतिपादकप्रथममहाधिकारमध्ये "जिउ मिच्छत्तें" इत्यादिसूत्राष्टकेन **मिथ्यादृष्टिपरिणतिव्याख्यानस्थलं** समाप्तं ।

तदनंतरं सम्यग्दृष्टिभावनाव्याख्यानमुख्यत्वेन "कालु लहेविणु" इत्यादि सूत्राष्टकं कथ्यते अथ;—

कालु लहेविणु जोइया, जिमु जिमु मोहु गलेइ ।
तिमु तिमु दंसणु लहइ जिउ, णियमें अप्पु मुणेइ ॥ ८६ ॥

कालं लब्ध्वा योगिन् यथा यथा मोहः गलति ।
तथा तथा दर्शनं लभते जीवः नियमेन आत्मानं मनुते ॥ ८६ ॥

ऐसा जानो, अर्थात् अतींद्रियसुखरूप आत्मामें पर वस्तुका क्या प्रयोजन है । जो पर वस्तुको अपना मानता है वही मूर्ख है ॥ ८४ ॥

अब और भी मूढका लक्षण कहते हैं;—[**दुःखस्य**] दुःखके [**कारणं**] कारण [**ये**] जो [**विषयाः**] पांच इंद्रियोंके विषय हैं [**तान्**] उनको [**सुखहेतून्**] सुखके कारण जानकर [**रमते**] रमण करता है वह [**मिथ्यादृष्टिः जीवः**] मिथ्यादृष्टि जीव [**अत्र**] इस संसारमें [**किं न करोति**] क्या पाप नहीं करता सभी पाप करता है अर्थात् जीवोंकी हिंसा करता है झूठ बोलता है दूसरेका धन हरता है दूसरेकी स्त्री सेवन करता है अति तृष्णा करता है बहुत आरंभ करता है खेती करता है खोटे २ व्यसन सेवता है जो न करनेके काम हैं उनको करता है । **भावार्थ**—मिथ्यादृष्टि जीव वीतराग निर्विकल्प परमसमाधिसे उत्पन्न परमानंद परमसमरसीभावरूप सुखसे परान्मुख हुआ निश्चयकर महा दुःखरूप विषयोंको सुखके कारण समझकर सेवन करता है सो इनमें सुख नहीं हैं ॥ ८५ ॥

कालु लहेविणु जोइया जिमु जिमु मोहु गलेइ कालं लब्ध्वा हे योगिन् यथा यथा मोहो विगलति **तिमु तिमु दंसणु लहइ जिउ** तथा तथा दर्शनं सम्यक्त्वं लभते जीवः । तदनंतरं किं करोति । **णियमें अप्पु मुणेइ** नियमेनात्मानं मनुते जानातीत्यर्थः । तथाहि— एकेंद्रियविकलेंद्रियपंचेंद्रियसंज्ञिपर्याप्तमनुष्यदेशकुलशुद्धात्मोपदेशादीनामुत्तरोत्तरदुर्लभक्रमेण दुःप्राप्तान् काललब्धिः कथंचित्काकतालीयन्यायेन तां लब्ध्वा परमागमकथितमार्गेण मिथ्यात्वादिभेदभिन्नपरमात्मोपलंभप्रतिपत्तेर्यथा यथा मोहो विगलति तथा तथा शुद्धात्मैवोपादेय इति रुचिरूपं सम्यक्त्वं लभते । शुद्धात्मकर्मणोर्भेदज्ञानेन शुद्धात्मतत्त्वं मनुते जानातीति । अत्र यस्यैवोपादेयभूतस्य शुद्धात्मनो रुचिपरिणामेन निश्चयसम्यग्दृष्टिर्जातो जीव स एवोपादेय इति भावार्थः ॥ ८६ ॥

अत ऊर्ध्वं पूर्वोक्तन्यायेन सम्यग्दृष्टिर्भूत्वा मिथ्यादृष्टिभावनायाः प्रतिपक्षभूतां यादृशीं भेदभावनां करोति तादृशीं क्रमेण सूत्रसप्तकेन विवृणोति;—

अप्पा गोरउ किण्हु णवि, अप्पा रत्तु ण होइ ।
अप्पा सुहुमुवि थूलु णवि, णाणिउ णाणें जोइ ॥ ८७ ॥

आत्मा गौरः कृष्णः नापि आत्मा रक्तः न भवति ।
आत्मा सूक्ष्मोपि स्थूलः नैव ज्ञानी ज्ञानेन पश्यति ॥ ८७ ॥

इस प्रकार तीनतरहके आत्माके कहनेवाले पहले महा अधिकारमें "जिउ मिच्छत्तें" इत्यादि आठ दोहाओंसे मिथ्यादृष्टिकी परिणतिका व्याख्यान समाप्त किया । इसके आगे सम्यग्दृष्टिकी भावनाके व्याख्यानकी मुख्यतासे "काल लहेविणु" इत्यादि आठ दोहासूत्र कहते हैं;—[**हे योगिन्**] हे योगी [**कालं लब्ध्वा**] काल पाकर [**यथा यथा**] जैसा जैसा [**मोहः**] मोह [**गलति**] गलता है कम होता जाता है [**तथा तथा**] तैसा तैसा [**जीवः**] यह जीव [**दर्शनं**] सम्यग्दर्शनको [**लभते**] पाता है फिर [**नियमेन**] निश्चयसे [**आत्मानं**] अपने स्वरूपको [**मनुते**] जानता है । **भावार्थ**—एकेंद्रीसे विकलत्रय (दो इंद्री ते इंद्री चौ इंद्री) होना दुर्लभ है, विकलत्रयसे पंचेंद्री, पंचेंद्रीसे सैनी पर्याप्त, उससे मनुष्य होना कठिन है । मनुष्यमें भी आर्यक्षेत्र उत्तमकुल शुद्धात्माका उपदेश आदि मिलना बहुत कठिन है । और किसीतरह "काकतालीय न्यायसे" काललब्धिको पाकर सब दुर्लभ सामग्री मिलनेपर भी जैन शास्त्रोक्त मार्गकर मिथ्यात्वादिके दूर हो जानेसे आत्मस्वरूपकी प्राप्ति होते हुए जैसा जैसा मोह क्षीण होता जाता है वैसे २ शुद्ध आत्मा ही उपादेय है ऐसी रुचिरूप सम्यक्त्व होता है । शुद्ध आत्मा और कर्मको जुदे २ जानता है । जिस शुद्धात्माकी रुचिरूप परिणामसे यह जीव निश्चयसम्यग्दृष्टि होता है वही उपादेय है यह तात्पर्य हुआ ॥ ८६ ॥

आत्मा गौरो न भवति कृष्णो न भवति रक्तो न भवति आत्मा सूक्ष्मोपि न भवति स्थूलोपि नैव । तर्हि किंविशिष्टः । ज्ञानी ज्ञानस्वरूपः ज्ञानेन करणभूतेन पश्यति । अथवा "णाणिउ जाणइ जोइं" इति पाठांतरं, ज्ञानी योसौ योगी स जानात्यात्मानं । अथवा ज्ञानी ज्ञानस्वरूपेण आत्मा । कोसौ जानाति । योगीति । तथाहि—कृष्णगौरादिकधर्मान् व्यवहारेण जीवसंबंधानपि तथापि शुद्धात्मनो भिन्नान् कर्मजनितान् हेयान् वीतरागस्वसंवेदनज्ञानी स्वशुद्धात्मतत्त्वे तान् न योजयति संबंधान्न करोतीति भावार्थः ॥ ८७ ॥ अथ ।

अप्पा वंभणु वइसु णवि, णवि खत्तिउ णवि सेसु ।
पुरिसु णउंसउ इत्थि णवि, णाणिउ मुणइं असेसु ॥ ८८ ॥

आत्मा ब्राह्मणः वैश्यः नापि नापि क्षत्रियः नापि शेषः ।
पुरुषः नपुंसकः स्त्री नापि ज्ञानी मनुते अशेषं ॥ ८८ ॥

अप्पा वंभणु वइसु णवि णवि खत्तिउ णवि सेसु पुरिसु णउंसउ इत्थि णवि आत्मा ब्राह्मणो न भवति वैश्योपि नैव नापि क्षत्रियो नापि शेषः शूद्रादिः पुरुषनपुंसकस्त्रीलिंगरूपोपि नैव । तर्हि किं विशिष्टः । **णाणिउ मुणइ असेसु** ज्ञानी ज्ञानस्वरूप आत्मा ज्ञानी सन् । किं करोति । मनुते जानाति । कं । अशेषं वस्तुजातं वस्तुसमूहमिति । तद्यथा । यानेव ब्राह्मणादिवर्णभेदान् पुल्लिंगादिलिंगभेदान् व्यवहारेण परमात्मपदार्थादभिन्नान् शुद्धनिश्चयेन भिन्नान् साक्षाद्धेयभूतान् वीतरागनिर्विकल्पसमाधिच्युतो बहिरात्मा

इसके बाद पूर्वकथित रीतिसे सम्यग्दृष्टि होकर मिथ्यात्वकी भावनासे विपरीत जैसी भेदविज्ञानकी भावनाको करता है वैसी भेदविज्ञानभावनाका स्वरूप क्रमसे सातदोहासूत्रोंमें कहते हैं;—[**आत्मा**] आत्मा [**गौरः कृष्णः नापि**] सफेद नहीं है काला नहीं है [**आत्मा**] आत्मा [**रक्तः**] लाल [**न भवति**] नहीं है [**आत्मा**] आत्मा [**सूक्ष्मः अपि स्थूलः नैव**] सूक्ष्म भी नहीं है और स्थूल भी नहीं है [**ज्ञानी**] ज्ञानस्वरूप है [**ज्ञानेन**] ज्ञानदृष्टिसे [**पश्यति**] देखा जाता है अथवा ज्ञानी पुरुष योगी ही ज्ञानकर आत्माको जानता है । **भावार्थ**—ये स्वेत काले आदि धर्म व्यवहारनयकर शरीरके संबंधसे जीवके कहे जाते हैं तौभी शुद्धनिश्चयनयकर शुद्धात्मासे जुदे हैं कर्मजनित हैं त्यागने योग्य हैं । जो वीतरागस्वसंवेदन ज्ञानी है वह निजशुद्धात्मतत्त्वमें इन धर्मोंको नहीं लगाता अर्थात् इनको अपने नहीं समझता है ॥ ८७ ॥

आगे ब्राह्मणादिवर्ण आत्माके नहीं हैं ऐसा वर्णन करते हैं;-[**आत्मा**] आत्मा [**ब्राह्मणः वैश्यः नापि**] ब्राह्मण नहीं है वैश्य भी नहीं है [**क्षत्रियः नापि**] क्षत्री भी नहीं है [**शेषः**] बाकी शूद्र भी [**नापि**] नहीं है [**पुरुषः नपुंसकः स्त्री नापि**] पुरुष नपुंसक स्त्रीलिंगरूप भी नहीं है [**ज्ञानी**] ज्ञानस्वरूप हुआ [**अशेषं**] समस्त वस्तुओंको ज्ञानसे [**मनुते**]

स्वात्मनि योजयति तानेव तद्विपरीतभावनारतोंतरात्मा स्वशुद्धात्मस्वरूपेण योजयतीति तात्पर्यार्थः ॥ ८८ ॥ अथ ।

अप्पा वंदउ खवणु णवि, अप्पा गुरउ ण होइ ।
अप्पा लिंगिउ एकु णवि, णाणिउ जाणइ जोइ ॥ ८९ ॥

आत्मा वंदकः क्षपणः नापि आत्मा गुरवः न भवति ।
आत्मा लिंगी एकः नापि ज्ञानी जानाति योगी ॥ ८९ ॥

आत्मा वंदको बौद्धो न भवति आत्मा क्षपणको दिगंबरो न भवति आत्मा गुरवशब्दवाच्यः श्वेतांबरो न भवति । आत्मा एकदंडित्रिदंडिहंसपरमहंससंज्ञाः संन्यासी शिखी मुंडी योगदंडाक्षमालातिलककुलकघोषप्रभृतिवेषधारी नैकोपि कश्चिदपि लिंगी न भवति । तर्हि कथंभूतो भवति । ज्ञानी । तमात्मानं कोसौ जानाति योगी ध्यानीति । तथाहि—यद्यप्यात्मा व्यवहारेण वंदकादिलिंगी भण्यते तथापि शुद्धनिश्चयनयेनैकोपि लिंगी न भवतीति । अयमत्र भावार्थः । देहाश्रितं द्रव्यलिंगमुपचरितासद्भूतव्यवहारेण जीवस्वरूपं भण्यते वीतरागनिर्विकल्पसमाधिरूपं भावलिंगं तु यद्यपि शुद्धात्मस्वरूपसाधकत्वादुपचारेण शुद्धजीवस्वरूपं भण्यते तथापि सूक्ष्मशुद्धनिश्चयेन न भण्यत इति ॥ ८९ ॥ अथ ।

जानता है । **भावार्थ**—जो ब्राह्मणादिवर्णभेद हैं और पुरुषलिंगादि तीन लिंग हैं वे यद्यपि व्यवहारनयकर देहके संबंधसे जीवके कहे जाते हैं तौभी शुद्धनिश्चयनयकर आत्मासे भिन्न हैं और साक्षात् त्यागने योग्य हैं उनको वीतरागनिर्विकल्पसमाधिसे रहित मिथ्यादृष्टि जीव अपने जानता है और उन्हींको मिथ्यात्वसे रहित सम्यग्दृष्टि जीव अपने नहीं समझता । आपको तो ज्ञानस्वभावरूप जानता है ॥ ८८ ॥

आगे वंदक क्षपणकादि भेद भी जीवके नहीं हैं ऐसा कहते हैं;—[**आत्मा**] आत्मा [**वंदकः क्षपणः नापि**] बौद्धका आचार्य नहीं है दिगंबर भी नहीं है [**आत्मा**] आत्मा [**गुरवः न भवति**] श्वेताम्बर भी नहीं है [**आत्मा**] आत्मा [**एकः अपि**] कोई भी [**लिंगी**] वेशका धारी [**न**] नहीं है अर्थात् एक दंडी त्रिदंडी हंस परमहंस संन्यासी जटाधारी मुंडित रुद्राक्षकी माला तिलक कुलक घोष वगैरः भेषोंमें कोई भी भेषधारी नहीं है एक [**ज्ञानी**] ज्ञानस्वरूप हैं उस आत्माको [**योगी**] ध्यानी मुनि ध्यानारूढ होकर [**जानाति**] जानता है ध्यान करता है ॥ **भावार्थ**—यद्यपि व्यवहारनयकर यह आत्मा बंदकादि अनेक भेषोंको धरता है तौभी शुद्धनिश्चय नयकर कोई भी भेष जीवके नहीं है देहके हैं । यहां देहके आश्रयसे जो द्रव्यलिंग है वह उपचरितासद्भूतव्यवहारनयकर जीवका स्वरूप कहा जाता है तौभी निश्चयनयकर जीवका स्वरूप नहीं

अप्पा गुरु णवि सिस्सु णवि, णवि सामिउ णवि भिच्चु ।
सूरउ कायरु होइ णवि, णवि उत्तमु णवि णिच्चु ॥ ९० ॥

आत्मा गुरुः नैव शिष्यः नापि नैव स्वामी नैव भृत्यः ।
शूरः कातरः भवति नैव नैव उत्तमः नैव नीचः ॥ ९० ॥

आत्मा गुरुर्नैव भवति शिष्योपि न भवति नैव स्वामी नैव भृत्यः शूरो न भवति कातरो हीनसत्त्वो नैव भवति नैवोत्तमोत्तमकुलप्रसूतः नैव नीचो नीचकुलप्रसूत इति । तद्यथा । गुरुशिष्यादिसंबंधान् यद्यपि व्यवहारेण जीवस्वरूपस्तथापि शुद्धनिश्चयेन परमात्मद्रव्याद्भिन्नान् हेयभूतान् वीतरागपरमानंदैकस्वशुद्धात्मोपलब्धेश्च्युतो बहिरात्मा स्वात्मसंबंधान् करोति तानेव वीतरागनिर्विकल्पसमाधिस्थो अंतरात्मा परस्वरूपान् जानातीति भावार्थः ॥ ९० ॥ अथ ।

अप्पा माणुसु देउ णवि, अप्पा तिरिउ ण होइ ।
अप्पा णारउ कहिंवि णवि, णाणिउ जाणइं जोइ ॥ ९१ ॥

आत्मा मनुष्यः देवः नापि आत्मा तिर्यक् न भवति ।
आत्मा नारकः क्वापि नैव ज्ञानी जानाति योगी ॥ ९१ ॥

अप्पा माणुसु देउ णवि अप्पा तिरिउ ण होइ अप्पा णारउ कहिंवि णवि

है क्योंकि जब देह ही जीवकी नहीं तो भेष कैसे होसकता है इसलिये द्रव्यलिंगतो सर्वथा ही नहीं है और वीतरागनिर्विकल्पसमाधिरूप भावलिंग यद्यपि शुद्धात्मस्वरूपका साधक है इसलिये उपचारनयकर जीवका स्वरूप कहा जाता है तौभी परमसूक्ष्म शुद्धनिश्चयनयकर भावलिंग भी जीवका नहीं है । भावलिंग साधनरूप है वह भी परम अवस्थाका साधक नहीं है ॥ ८९ ॥

आगे यह गुरु शिष्यादिक भी नहीं है;—[**आत्मा**] आत्मा [**गुरुः नैव**] गुरु नहीं है [**शिष्यः नापि**] शिष्य भी नहीं है [**स्वामी नैव**] स्वामी नहीं है [**भृत्यः नैव**] नौकर नहीं हैं [**शूरः कातरः नैव**] सूरवीर नहीं है बलहीन नहीं है [**उत्तमः नैव**] ऊंचकुली नहीं है [**नीचः नैव भवति**] और नीचकुली भी नहीं है ॥ **भावार्थ**— ये सब गुरु शिष्य स्वामी सेवकादि संबंध यद्यपि व्यवहारनयसे जीवके स्वरूप हैं तौ भी शुद्ध निश्चयनयसे शुद्ध आत्मासे जुदे हैं आत्माके नहीं हैं त्यागने योग्य हैं इन भेदोंको वीतरागपरमानंद निज शुद्धात्माकी प्राप्तिसे रहित बहिरात्मा मिथ्यादृष्टि जीव अपने समझता है और इन्हीं भेदोंको वीतरागनिर्विकल्पसमाधिमें रहता हुआ अंतरात्मा सम्यग्दृष्टि-जीव पररूप (दूसरे) जानता है ॥ ९० ॥

आत्मा मनुष्यो न भवति देवो नैव भवति आत्मा तिर्यग्योनिर्न भवति आत्मा नारकः क्वापि काले न भवति । तर्हि किंविशिष्टो भवति । **णाणिउं जाणइं जोइ** ज्ञानी ज्ञानरूपो भवति । तमात्मानं कोसौ जानाति । योगी, योगी कोर्थः । त्रिगुप्तिनिर्विकल्पसमाधिस्थ इति । तथाहि । विशुद्धज्ञानदर्शनस्वभावपरमात्मतत्त्वभावनाप्रतिपक्षभूतैः रागद्वेषादिविभावपरिणामजालैर्यान्युपार्जितानि कर्माणि तदुदयजनितान् मनुष्यादिविभावपर्यायान् भेदाभेदरत्नत्रयभावनाच्युतो बहिरात्मा स्वात्मतत्त्वे योजयति । तद्विपरीतोंतरात्मशब्दवाच्यो ज्ञानी पृथक् जानातीत्यभिप्रायः ॥ ९१ ॥ अथ ।

अप्पा पंडिउ मुक्खु णवि, णवि ईसरु णवि णीसु ।
तरुणउ वूढउ वालु णवि, अण्णुवि कम्मविसेसु ॥ ९२ ॥

आत्मा पंडितः मूर्खः नैव नैव ईश्वरः नैव निःस्वः ।
तरुणः वृद्धः बालः नापि अन्य एव कर्मविशेषः ॥ ९२ ॥

अप्पा पंडिउ मुक्खु णवि णवि ईसरु णवि णीसु तरुणउ वूढउ वालु णवि आत्मा पंडितो न भवति मूर्खो नैव ईश्वरः समर्थो नैव निःस्वो दरिद्रः तरुणो वृद्धो बालोपि नैव । पंडितादिस्वरूपं यद्यात्मस्वभावो न भवति । तर्हि किं भवति । **अण्णुवि कम्मविसेसु** अन्य एव कर्मजनितोयं विभावपर्यायविशेष इति । तद्यथा । पंडितादिसंबंधान् यद्यपि व्यवहारनयेन जीवस्वभावान् तथापि शुद्धनिश्चयेन शुद्धात्मद्रव्याद्भिन्नान् सर्वप्रकारेण

आगे आत्माका स्वरूप कहते हैं;—[**आत्मा**] जीव पदार्थ [**मनुष्यः देवः नापि**] न तो मनुष्य है न देव है [**आत्मा**] आत्मा [**तिर्यक् न भवति**] तिर्यंच पशु भी नहीं है [**आत्मा**] आत्मा [**नारकः**] नारकी भी [**क्वापि नैव**] कभी नहीं अर्थात् किसीप्रकार भी पररूप नहीं है परंतु [**ज्ञानी**] ज्ञानस्वरूप है उसको [**योगी**] मुनिराज तीन गुप्तिका धारक और निर्विकल्पसमाधिमें लीन हुआ [**जानाति**] जानता है ॥ **भावार्थ**—निर्मल ज्ञान दर्शन स्वभाव जो परमात्मतत्त्व उसकी भावनासे उलटे रागद्वेषादि विभाव परिणामोंसे उपार्जन किये जो शुभाशुभ कर्म हैं उनके उदयसे उत्पन्न हुई मनुष्यादि विभावपर्यायोंको भेदाभेदस्वरूप रत्नत्रयकी भावनासे रहित हुआ मिथ्यादृष्टि जीव अपने जानता है और इस अज्ञानसे रहित सम्यग्दृष्टि ज्ञानी जीव उन मनुष्यादि पर्यायोंको अपनेसे जुदा जानता है ॥ ९१ ॥

आगे फिर आत्माका स्वरूप कहते हैं;—[**आत्मा**] चिद्रूप आत्मा [**पंडितः**] विद्यावान व [**मूर्खः**] मूर्ख [**नैव**] नहीं है [**ईश्वरः**] धनवान् सब बातोंमें समर्थ भी [**नैव**] नहीं है [**निस्वः**] दरिद्री भी [**नैव**] नहीं हैं [**तरुणः वृद्धः बालः नापि**] जवान बूढा और बालक भी नहीं है [**अन्य एव कर्मविशेषः**] ये सब पर्यायें आत्मासे

हेयभूतान् वीतरागस्वसंवेदनज्ञानभावनारहितोपि बहिरात्मा स्वस्मिन्नियोजयति तानेव पंडितादिविभावपर्यायांस्तद्विपरीतो योसौ चांतरात्मा परस्मिन् कर्मणि नियोजयतीति तात्पर्यार्थः ॥ ९२ ॥ अथ ।

पुण्णुवि पाउवि कालु णहु, धम्मा धम्मुवि काउ ।
एक्कुवि अप्पा होइ णवि, मेल्लिवि चेयणभाउ ॥ ९३ ॥

पुण्यमपि पापमपि कालः नभः धर्माधर्मोपि कायः ।
एकमपि आत्मा भवति नैव मुक्त्वा चेतनभावं ॥ ९३ ॥

पुण्णुवि पाउवि कालु णहु धम्माधम्मुवि काउ पुण्यमपि पापमपि कालं नभः आकाशं धर्माधर्ममपि कायः शरीरं **एक्कुवि अप्पा होइ णवि मेल्लिवि चेयण भाउ** इदं पूर्वोक्तमेकमप्यात्मा न भवति । किं कृत्वा । मुक्त्वा । किं चेतनभावमिति । तथाहि । व्यवहारनयेनात्मनः सकाशादभिन्नान् शुद्धनिश्चयेन भिन्नान् हेयभूतान् पुण्यपापादिधर्माधर्मोन्मिथ्यात्वरागादिपरिणतो बहिरात्मा स्वात्मनि योजयति तानेव पुण्यपापादिसमस्तसंकल्पविकल्पपरिहारभावनारूपे स्वशुद्धात्मद्रव्ये सम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मके परमसमाधौ स्थितोंतरात्मा शुद्धात्मनः सकाशात् पृथक् जानातीति तात्पर्यार्थः ॥ ९३ ॥ एवं त्रिविधात्मप्रतिपादकमहाधिकारमध्ये मिथ्यादृष्टिभावनाविपरीतेन सम्यग्दृष्टिभावनास्थितेन सूत्राष्टकं समाप्तं ।

अथानंतरं सामान्यभेदभावनामुख्यत्वेन "अप्पा संजमु" इत्यादि प्रक्षेपकान् विहायैकत्रिंशत्सूत्रपर्यंतमुपसंहाररूपा चूलिका कथ्यते । तद्यथा ।

जुदे कर्मके विशेष हैं अर्थात् कर्मसे उत्पन्न हुए विभावपर्याय हैं ॥ **भावार्थ**—यद्यपि शरीरके संबंधसे पंडित वगैरः भेद व्यवहारनयसे जीवके कहे जाते हैं तौभी शुद्धनिश्चयनयकर शुद्धात्मद्रव्यसे भिन्न हैं और सर्वथा त्यागने योग्य हैं । इन भेदोंको वीतरागस्वसंवेदनज्ञानकी भावनासे रहित मिथ्यादृष्टि जीव अपने जानता है और इन्हीं पंडितादि विभावपर्यायोंको अज्ञानसे रहित सम्यग्दृष्टि जीव अपनेसे जुदे कर्मजनित जानता है ॥९२॥

आगे आत्माका चेतनभाव वर्णन करते हैं;—[**पुण्यमपि**] पुण्यरूप शुभकर्म [**पापमपि**] पापरूप अशुभकर्म [**कालः**] अतीत अनागत वर्तमान काल [**नभः**] आकाश [**धर्माधर्मोपि**] धर्मद्रव्य अधर्मद्रव्य [**कायः**] शरीर, इनमेंसे [**एक अपि**] एक भी [**आत्मा**] आत्मा [**नैव भवति**] नहीं है [**चेतनभावं मुक्त्वा**] चेतनभावको छोड़कर अर्थात् एक चेतनभाव ही अपना है ॥ **भावार्थ**—व्यवहारनयकर यद्यपि पुन्यपापादि आत्मासे अभिन्न हैं तौभी शुद्धनिश्चयनयकर भिन्न हैं और त्यागने योग्य हैं उन परभावोंको मिथ्यात्वरागादिरूप परिणत हुआ बहिरात्मा अपने जानता है और उन्हींको

यदि पुण्यपापादिरूपः परमात्मा न भवति तर्हि कीदृशो भवतीति प्रश्ने प्रत्युत्तरमाह;—

अप्पा संजमु सीलु तउ, अप्पा दंसणु णाणु ।
अप्पा सासयमोक्खपउ, जाणंतउ अप्पाणु ॥ ९४ ॥

आत्मा संयमः शीलं तपः आत्मा दर्शनं ज्ञानं ।
आत्मा शाश्वतमोक्षपदं जानन् आत्मानं ॥ ९४ ॥

अप्पा संजमु सीलु तउ अप्पा दंसणु णाणु अप्पा सासय मोक्खपउ आत्मा संयमो भवति शीलं भवति तपश्चरणं भवति आत्मा दर्शनं भवति ज्ञानं भवति शाश्वतमोक्षपदं च भवति। अथवा पाठांतरं "सासयमुक्खपहुं" शाश्वतमोक्षस्य पंथा मार्गः अथवा "सासयसुक्खपउ" शाश्वतसौख्यपदं स्वरूपं च भवति । किं कुर्वन् सन् । **जाणंतउ अप्पाणु** जानन्ननुभवन् । कं । आत्मानमिति । तद्यथा । बहिरंगेंद्रियसंयमप्राणसंयमबलेन साध्यसाधकभावेन निश्चयेन स्वशुद्धात्मनि संयमनात् स्थितिकरणात् **संयमो** भवति बहिरंगसहकारिकारणभूतेन कामक्रोधविवर्जनलक्षणेन व्रतपरिरक्षणशीलेन निश्चयेनाभ्यंतरे स्वशुद्धात्मद्रव्यनिर्मलानुभवनेन **शीलं** भवति । बहिरंगेन सहकारिकारणभूतानशनादिद्वादशविधतपश्चरणेन निश्चयनयेनाभ्यंतरे समस्तपरद्रव्येच्छानिरोधेन परमात्मस्वभावे प्रतपनाद्विजयनात्**तपश्चरणं**

पुण्यपापादि समस्त संकल्पविकल्परहित निजशुद्धात्मद्रव्यमें सम्यक् श्रद्धान ज्ञान चारित्ररूप अभेदरत्नत्रयस्वरूप परम समाधिमें तिष्ठता सम्यग्दृष्टि जीव शुद्धात्मासे जुदे जानता है ॥ ९३ ॥

ऐसें बहिरात्मा अंतरात्मा परमात्मारूप तीनप्रकारके आत्माका जिसमें कथन है ऐसे पहले अधिकारमें मिथ्यादृष्टिकी भावनासे रहित जो सम्यग्दृष्टिकी भावना उसकी मुख्यतासे आठ दोहासूत्र कहे । आगे भेदविज्ञानकी मुख्यतासे "अप्पा संजमु" इत्यादि इकतीस दोहापर्यंत क्षेपकसूत्रोंको छोड़कर पहला अधिकार पूर्ण करते हुए व्याख्यान करते हैं उसमें भी जो शिष्यने प्रश्न किया कि यदि पुण्यपापादिरूप आत्मा नहीं है तो कैसा है ऐसे प्रश्नका श्रीगुरु समाधान करते हैं;—[**आत्मा**] निजगुणपर्यायका धारक ज्ञानस्वरूप चिदानंद ही [**संयम**] संयम है [**शीलः तपः**] शील है तप है [**आत्मा**] आत्मा [**दर्शनं ज्ञानं**] दर्शन ज्ञान है और [**आत्मानं जानन्**] अपनेको जानता अनुभवता हुआ [**आत्मा**] आत्मा [**शाश्वतमोक्षपदं**] अविनाशी सुखका स्थान मोक्षका मार्ग है । इसी कथनको विशेषताकर कहते हैं । **भावार्थ**—पांच इंद्रियां और मनका रोकना व छह कायके जीवोंकी दया स्वरूप ऐसे इंद्रिय संयम तथा प्राणसंयम इन दोनोंके बलसे साध्यसाधक भावकर निश्चयसे अपने शुद्धात्मस्वरूपमें स्थिर होनेसे आत्माको **संयम** कहा गया है, बहिरंग सहकारी निश्चयशीलका कारणरूप जो कामक्रोधादिके

भवति । स्वशुद्धात्मैवोपादेय इति रुचिकरणान्निश्चयसम्यक्त्वं भवति । वीतरागस्वसंवेदनज्ञानानुभवनान्निश्चयज्ञानं भवति । मिथ्यात्वरागादिसमस्तविकल्पजालत्यागेन परमात्मतत्त्वे परमसमरसीभावपरिणमनाच्च मोक्षमार्गो भवतीति । अत्र बहिरंगद्रव्येंद्रियसंयमादिप्रतिपादनादभ्यंतरे शुद्धात्मानुभूतिरूपभावसंयमादिपरिणमनादुपादेयसुखसाधकत्वादात्मैवोपादेय इति तात्पर्यार्थः ॥ ९४ ॥

अथ स्वशुद्धात्मसंवित्तिं विहाय निश्चयनयेनान्यद्दर्शनज्ञानचारित्रं नास्तीत्यभिप्रायं मनसि संप्रधार्य सूत्रं कथयति;—

अण्णु जि दंसणु अत्थि णवि, अण्णुवि अत्थि ण णाणु ।
अण्णु जि चरणु ण अत्थि जिय, मिल्लिवि अप्पा जाणु ॥ ९५ ॥

अन्यत् एव दर्शनं अस्ति नापि अन्यदपि अस्ति न ज्ञानं ।
अन्यत् एव चरणं न अस्ति जीव मुक्त्वा आत्मानं जानीहि ॥ ९५ ॥

अण्णु जि दंसणु अत्थि णवि अण्णुजि अत्थि ण णाणु अण्णु जि चरणु ण अत्थि जिय अन्यदेव दर्शनं नास्ति अन्यदेव ज्ञानं नास्ति अन्यदेव चरणं नास्ति हे जीव । किंकृत्वा । **मिल्लिवि अप्पा जाणु** मुक्त्वा त्यक्त्वा । कं । आत्मानं जानीहीति । तथाहि । यद्यपि षड्द्रव्यपंचास्तिकायसप्ततत्त्वनवपदार्थाः साध्यसाधकभावेन निश्चयसम्यक्त्वहेतुत्वा-

---

त्यागरूप व्रतकी रक्षा वह व्यवहारशील है और निश्चयकर अंतरंगमें अपने शुद्धात्मद्रव्यका निर्मल अनुभव वह शील कहा जाता है सो शीलरूप आत्मा ही कहा गया है, बाह्य सहकारी कारणभूत जो अनशनादि बारह प्रकारका तप है उससे तथा निश्चयकर अंतरंगमें सब परद्रव्यकी इच्छाके रोकनेसे परमात्मस्वभाव (निजस्वभाव) में प्रतापरूप तिष्ठ रहा है इसकारण और समस्तविभावपरिणामोंके जीतनेसे आत्मा ही 'तपश्चरण' है और आत्मा ही निजस्वरूपकी रुचिरूप सम्यक्त्व है वह सर्वथा उपादेयरूप है इससे सम्यग्दर्शन भी आत्मा ही है अन्य कोई नहीं है, वीतरागस्वसंवेदन ज्ञानके अनुभवसे आत्मा ही निश्चयज्ञानरूप है और मिथ्यात्वरागादिसमस्तविकल्पजालके त्यागकर परमात्मतत्त्वमें परमसमरसीभावके परिणमनसे आत्मा ही मोक्षमार्ग है । तात्पर्य यह है कि बहिरंग द्रव्येंद्रियसंयमादिके पालनेसे अंतरंगमें शुद्धात्माके अनुभवरूप भावसंयमादिकके परिणमनसे उपादेयसुख जो अतींद्रियसुख उसके साधकपनेसे आत्मा ही उपादेय है ॥ ९४ ॥

आगे निजशुद्धात्मस्वरूपको छोड़कर निश्चयनयसे दूसरा कोई दर्शन ज्ञान चारित्र नहीं है इस अभिप्रायको मनमें रखकर गाथासूत्र कहते हैं;—[हे **जीव**] हे जीव [**आत्मानं**] आत्माको [**मुक्त्वा**] छोड़कर [**अन्यदपि**] दूसरा कोईभी [**दर्शनं**] दर्शन [**न एव**] नहीं है [**अन्यदपि**] अन्य कोई [**ज्ञानं न अस्ति**] ज्ञान नहीं है

व्यवहारेण सम्यक्त्वं भवति तथापि निश्चयेन वीतरागपरमानंदैकस्वभावः शुद्धात्मोपादेय इति रुचिरूपपरिणामपरिणतशुद्धात्मैव निश्चयसम्यक्त्वं च भवति । यद्यपि निश्चयस्वसंवेदनज्ञानसाधकत्वात्तु व्यवहारेण शास्त्रज्ञानं भवति तथापि निश्चयनयेन वीतरागस्वसंवेदनज्ञाननपरिणतः शुद्धात्मैव निश्चयज्ञानं भवति । यद्यपि निश्चयचारित्रसाधकत्वान्मूलोत्तरगुणा व्यवहारेण चारित्रं भवति तथापि शुद्धात्मानुभूतिरूपवीतरागचारित्रपरिणतः स्वशुद्धात्मैव निश्चयनयेन चारित्रं भवतीति । अत्रोक्तलक्षणेऽभेदरत्नत्रयपरिणतः परमात्मैवोपादेय इति भावार्थः ॥ ९५ ॥

अथ निश्चयेन वीतरागभावपरिणतः स्वशुद्धात्मैव निश्चयतीर्थः निश्चयगुरुर्निश्चयदेव इति कथयति;—

अण्णु जि तित्थु म जाहि जिय, अण्णु जि गुरुउ म सेवि ।
अण्णु जि देउ म चिंति तुहुं, अप्पा विमलु मुएवि ॥ ९६ ॥

अन्यत् एव तीर्थं मा गच्छ जीव अन्यत् एव गुरुं मा सेवस्व ।
अन्यत् एव देवं मा चिंतय त्वं आत्मानं विमलं मुक्त्वा ॥ ९६ ॥

अण्णु जि तित्थु म जाहि जिय अण्णु जि गुरुउ म सेवि अण्णु जि देउ म चिंति तुहुं अन्यदेव तीर्थं मा गच्छ हे जीव अन्यदेव गुरुं मा सेवस्व अन्यदेव देवं मा चिंतय त्वं । किं

[**अन्यत् एव चरणं नास्ति**] अन्य कोई चारित्र नहीं है ऐसा [**जानीहि**] तू जान अर्थात् आत्मा ही दर्शन ज्ञान चारित्र है ऐसा संदेहरहित जानो । **भावार्थ**—यद्यपि छह द्रव्य पांच अस्तिकाय सात तत्त्व नौ पदार्थका श्रद्धान कार्यकारणभावसे निश्चय सम्यक्त्वका कारण होनेसे व्यवहार सम्यक्त्व कहा जाता है, अर्थात् व्यवहार साधक है निश्चय साध्य है तौभी निश्चयनयकर एक वीतराग परमानंदस्वभाववाला शुद्धात्मा ही उपादेय है ऐसा रुचिरूप परिणामसे परिणत हुआ शुद्धात्मा ही निश्चयसम्यक्त्व है । यद्यपि निश्चयस्वसंवेदनज्ञानका साधक होनेसे व्यवहारनयकर शास्त्रका ज्ञानभी ज्ञान है तौभी निश्चयनयकर वीतरागस्वसंवेदनज्ञानरूप परिणत हुआ शुद्धात्मा ही निश्चयज्ञान है । यद्यपि निश्चयचारित्रके साधक होनेसे अट्ठाईस मूलगुण चौरासी लाख उत्तरगुण व्यवहारनयकर चारित्र कहे जाते हैं तौभी शुद्धात्मानुभूतिरूप वीतरागचारित्रको परिणत हुआ निज शुद्धात्मा ही निश्चयनयकर चारित्र है । तात्पर्य यह है कि अभेदरूप निश्चयरत्नत्रयस्वरूप परिणत हुआ परमात्मा ही ध्यानकरने योग्य है ॥ ९५ ॥

आगे निश्चयनयकर वीतरागभावरूप परिणया निजशुद्धात्मा ही निश्चयतीर्थ, निश्चय गुरु, निश्चयदेव है ऐसा कहते हैं;—[**हे जीव**] हे जीव [**त्वं**] तू [**अन्यत् एव**]

कृत्वा । **अप्पा विमलु मुएवि** मुक्त्वा त्यक्त्वा । कं । आत्मानं । कथंभूतं । विमलं रागादिरहितमिति । तथाहि । यद्यपि व्यवहारनयेन निर्वाणस्थानचैत्यचैत्यालयादिकं तीर्थभूतपुरुषगुणस्मरणार्थं तीर्थं भवति तथापि वीतरागनिर्विकल्पसमाधिरूपनिश्छिद्रपोतेन संसारसमुद्रतरणसमर्थत्वान्निश्चयनयेन स्वात्मतत्त्वमेव तीर्थं भवति तदुपदेशात्पारंपर्येण परमात्मतत्त्वलाभो भवतीति । व्यवहारेण शिक्षादीक्षादायको यद्यपि गुरुर्भवति तथापि निश्चयनयेन पंचेंद्रियविषयप्रभृतिसमस्तविभावपरिणामपरित्यागकाले संसारविच्छित्तिकारणत्वात् स्वशुद्धात्मैव गुरुः । यद्यपि प्राथमिकापेक्षया सविकल्पापेक्षया चित्तस्थितिकरणार्थं तीर्थकरपुण्यहेतुभूतं साध्यसाधकभावेन परंपरया निर्वाणकारणं च जिनप्रतिमादिकं व्यवहारेण देवो भण्यते तथापि निश्चयनयेन परमाराध्यत्वाद्वीतरागनिर्विकल्पत्रिगुप्तपरमसमाधिकाले स्वशुद्धात्मस्वभाव एव देव इति । एवं निश्चयव्यवहाराभ्यां साध्यसाधकभावेन तीर्थगुरुदेवतास्वरूपं ज्ञातव्यमिति भावार्थः ॥ ९६ ॥

दूसरे [**तीर्थं**] तीर्थको [**मा गच्छ**] मत जावै [**अन्यत् एव**] दूसरे [**गुरुं**] गुरुको [**मा सेवस्व**] मत सेवै [**अन्यत् एव**] अन्य [**देवं**] देवको [**मा चिंतय**] मत ध्यावै [**आत्मानं विमलं**] रागादिमलरहित आत्माको [**मुक्त्वा**] छोड़कर अर्थात् अपना आत्मा ही तीर्थ है वहां रमण कर, आत्मा ही गुरु है उसकी सेवा कर, और आत्मा ही देव है उसीकी आराधना कर । अपने सिवाय दूसरेका सेवन मत करै । इसी कथनको विस्तारसे कहते हैं । **भावार्थ**—यद्यपि व्यवहार नयसे मोक्षके स्थानक सम्मेदशिखर आदि व जिनप्रतिमा जिनमंदिर आदि तीर्थ हैं क्योंकि वहां गये महान पुरुषोंके गुणोंकी याद होती है तौभी वीतरागनिर्विकल्पसमाधिरूप छेदरहित जिहाजकर संसाररूपी समुद्रके तरनेको समर्थ जो निज आत्मतत्त्व है वही निश्चयकर तीर्थ है उसके उपदेश परंपरासे परमात्मतत्त्वका लाभ होता है । यद्यपि व्यवहार नयकर दीक्षाशिक्षाका देनेवाला दिगंबर गुरु होता है तौभी निश्चयनयकर विषय कषाय आदिक समस्त विभावपरिणामोंके त्यागनेके समय निजशुद्धात्मा ही गुरु है उसीसे संसारकी निवृत्ति होती है । यद्यपि प्रथम अवस्थामें चित्तकी स्थिरताकेलिये व्यवहारनयकर जिनप्रतिमादिक देव कहे जाते हैं और वे परंपरासे निर्वाणके कारण हैं तौभी निश्चयनयकर परम आराधने योग्य वीतरागनिर्विकल्प परमसमाधिके समय निज शुद्धात्मभाव ही देव है अन्य नहीं । इसप्रकार निश्चय व्यवहारनयकर साध्यसाधक भावसे तीर्थ गुरु देवका स्वरूप जानना चाहिये । निश्चयदेव निश्चयगुरु निश्चयतीर्थ निज आत्मा ही है वही साधने योग्य है और व्यवहार देव जिनेंद्र तथा उनकी प्रतिमा, व्यवहार गुरु महामुनिराज, व्यवहार तीर्थ सिद्ध क्षेत्रादिक ये सब निश्चयके साधक हैं इसलिये प्रथम अवस्थामें आराधने योग्य हैं । तथा निश्चयनयकर

अथ निश्चयेनात्मसंवित्तिरेव दर्शनमिति प्रतिपादयति;—

अप्पा दंसणु केवलुवि, अण्णु सव्वु ववहारु ।
एकु जि जोइय झाइयइ, जो तइलोयहं सारु ॥ ९७ ॥

आत्मा दर्शनं केवलोपि अन्यः सर्वः व्यवहारः
एक एव योगिन् ध्यायते यः त्रैलोक्यस्य सारः ॥ ९७ ॥

अप्पा दंसणु केवलुवि आत्मा दर्शनं सम्यक्त्वं भवति । कथंभूतोपि । केवलोपि । **अण्णु सव्वु ववहारु** अन्यः शेषः सर्वोपि व्यवहारः तेन कारणेन **एकु जि जोइय झाइयइ** हे योगिन्नेक एव ध्यायेत । यः आत्मा कथंभूतः । **जो तइलोयहं सारु** यः परमात्मा त्रैलोक्यस्य सारभूत इति । तद्यथा । वीतरागचिदानंदैकस्वभावात्मतत्त्वसम्यक्श्रद्धानज्ञानानुभूतिरूपाभेदरत्नत्रयलक्षणनिर्विकल्पत्रिगुप्तिसमाधिपरिणतो निश्चयनयेन स्वात्मैव सम्यक्त्वं अन्यः सर्वोपि व्यवहारस्तेन कारणेन स एव ध्यातव्य इति । अत्र यथा द्राक्षाकर्पूरश्रीखंडादिबहुद्रव्यैर्निष्पन्नमपि पानकमभेदविवक्षया कृत्वैक्यं भण्यते तथा शुद्धात्मानुभूतिलक्षणैर्निश्चयसम्यग्दर्शनज्ञानचारित्रैर्बहुभिः परिणतो अनेकोप्यात्मा त्वभेदविवक्षया एकोपि भण्यत इति भावार्थः । तथा चोक्तं अभेदरत्नत्रयलक्षणं "दर्शनमात्मविनिश्चितिरात्मपरिज्ञानमिष्यते बोधः । स्थितिरात्मनि चारित्रं कुत एतेभ्यो भवति बंधः" ॥ ९७ ॥

ये सब परपदार्थ हैं इनसे साक्षात् सिद्धि नहीं है परंपरायसे है । यहां श्रीपरमात्मप्रकाश अध्यात्मग्रंथमें निश्चयदेव गुरु तीर्थ अपना आत्मा ही है उसे आराधकर अनंत सिद्ध हुए और होवेंगे ऐसा सारांश हुआ ॥ ९६ ॥

आगे निश्चयनयकर आत्मस्वरूप ही सम्यग्दर्शन है;—[**केवलः आत्मा अपि**] केवल (एक) आत्मा ही [**दर्शनं**] सम्यग्दर्शन है [**अन्यः सर्वः व्यवहारः**] दूसरा सब व्यवहार है इसलिये [**हे योगिन्**] हे योगी [**एक एव ध्यायते**] एक आत्मा ही ध्यान करने योग्य है [**यः त्रैलोक्यस्य सारः**] जोकि तीनलोकमें सार है ॥ **भावार्थ**— वीतराग चिदानंद अखंड स्वभाव आत्मतत्त्वका सम्यक् श्रद्धान ज्ञान अनुभवरूप जो अभेदरत्नत्रय वही जिसका लक्षण है तथा मनोगुप्ति आदि तीनगुप्तिरूप समाधिमें लीन निश्चयनयसे निज आत्मा ही निश्चयसम्यक्त्व है अन्य सब व्यवहार है । इस कारण आत्मा ही ध्यावने योग्य है । जैसे दाख कपूर चंदन वगैरः बहुत द्रव्योंसे बनाया गया जो पीनेका रस वह यद्यपि अनेकरसरूप है तौभी अभेदनयकर एक पानवस्तु कही जाती है उसीतरह शुद्धात्मानुभूतिस्वरूप निश्चयसम्यग्दर्शन ज्ञान चारित्रादि अनेक भावोंसे परिणत हुआ आत्मा अनेकरूप है तौभी अभेदनयकी विवक्षासे आत्मा एक वस्तु है । यही अभेदरत्नत्रयका स्वरूप जैनसिद्धांतोंमें हर एक जगह कहा है—"दर्शनमित्यादि" इसका अर्थ

अथ निर्मलमात्मानं ध्याय त्वं येन ध्यातेनांतर्मुहूर्तेनैव मोक्षपदं लभ्यत इति निरूपयति;—

अप्पा झायहि णिम्मलउ, किं बहुए अण्णेण ।
जो झायंतह परमपउ, लब्भइ एक्कखणेण ॥ ९८ ॥

आत्मानं ध्यायस्व निर्मलं किं बहुना अन्येन ।
यं ध्यायमानानां परमपदं लभ्यते एकक्षणेन ॥ ९८ ॥

अप्पा झायहि णिम्मलउ आत्मानं ध्यायस्व । कथंभूतं । निर्मलं **किं बहुए अण्णेण** किं बहुनान्येन शुद्धात्मबहिर्भूतेन रागादिविकल्पजालमालाप्रपंचेन **जो झायंतहं परमपउ लब्भइ** यं परमात्मानं ध्यायमानानां परमपदं लभ्यते । केन करणभूतेन । **एक्कखणेण** एकक्षणेनांतर्मुहूर्तेनापि । तथाहि । समस्तशुभाशुभसंकल्पविकल्परहितेन स्वशुद्धात्मतत्त्व-ध्यानेनांतर्मुहूर्तेन मोक्षो लभ्यते तेन कारणेन तदेव निरंतरं ध्यातव्यमिति । तथा चोक्तं बृहदाराधनाशास्त्रे । षोडशतीर्थकराणां एकक्षणे तीर्थकरोत्पत्तिवासरे प्रथमे श्रामण्यबोध-सिद्धिः अंतर्मुहूर्तेन निर्वृत्तः । अत्राह शिष्यः । यद्यंतर्मुहूर्तपरमात्मध्यानेन मोक्षो भवति तर्हि इदानीमस्माकं तद्ध्यानं कुर्वाणानां किं न भवति । परिहारमाह । यादृशं तेषां प्रथमसंहन-

---

ऐसा है कि आत्माका निश्चय वह सम्यग्दर्शन है आत्माका जानना वह सम्यग्ज्ञान है और आत्मामें निश्चल होना वह सम्यक चारित्र है यह निश्चयरत्नत्रय साक्षात् मोक्षके कारण हैं इनसे बंध कैसे हो सकता है कभी नहीं हो सकता ॥ ९७ ॥

आगे ऐसा कहते हैं कि जो निर्मल आत्माको ही ध्यावो जिसके ध्यान करनेसे अंत-र्मुहूर्तमें (तत्काल) मोक्षपदकी प्राप्ति हो;—हे योगी तू [**निर्मलं आत्मानं**] निर्मल आत्माका ही [**ध्यायस्व**] ध्यान कर [**अन्येन बहुना किं**] और बहुत पदार्थोंसे क्या । देश काल पदार्थ आत्मासे भिन्न हैं उनसे कुछ प्रयोजन नहीं है रागादिविकल्पजालके समूहोंके प्रपंचसे क्या फायदा एक निज स्वरूपको ध्यावो [**यं**] जिस परमात्माके [**ध्यायमानानां**] ध्यानकरनेवालोंको [**एकक्षणेन**] क्षणमात्रमें [**परमपदं**] मोक्षपद [**लभ्यते**] मिलता है । **भावार्थ**—सब शुभाशुभ संकल्प विकल्परहित निजशुद्ध आत्म-स्वरूपके ध्यान करनेसे शीघ्र ही मोक्ष मिलती है इस लिये वही हमेशः ध्यान करने योग्य है । ऐसा ही बृहदाराधना शास्त्रमें कहा है । सोलह तीर्थंकरोंको एक ही समय तीर्थंकरोंके उत्पत्तिके दिन पहले चारित्र ज्ञानकी सिद्धि हुई फिर अंतर्मुहूर्तमें मोक्ष होगई । यहांपर शिष्य प्रश्न करता है कि यदि परमात्माके ध्यानसे अंतर्मुहूर्तमें मोक्ष होती है तो इस समय ध्यानकरनेवाले हमलोगोंको क्यों नहीं होती । उसका समाधान इस तरह है कि जैसा निर्विकल्पशुक्लध्यान वज्रवृषभनाराच संहनना वालोंके चौथेकालमें होता है

नसहितानां शुक्लध्यानं भवति तादृशमिदानीं नास्तीति । तथा चोक्तं । "अत्रेदानीं निषेधंति शुक्लध्यानं जिनोत्तमाः । धर्मध्यानं पुनः प्राहुः श्रेणिभ्यां प्राग्विवर्तनं" । अत्र येन कारणेन परमात्मध्यानेनांतर्मुहूर्तेन मोक्षो लभ्यते तेन कारणेन संसारस्थितिछेदनार्थमिदानीमपि तदेव ध्यातव्यमिति भावार्थः ॥ ९८ ॥

अथ यस्य वीतरागमनसि शुद्धात्मभावना नास्ति तस्य शास्त्रपुराणतपश्चरणानि किं कुर्वंतीति कथयति;—

अप्पा णियमणि णिम्मलउ, णियमें वसइ ण जासु ।
सत्थपुराणइं तवचरणु, मुक्खु जि करहिं कि तासु ॥ ९९ ॥

आत्मा निजमनसि निर्मलः नियमेन वसति न यस्य ।
शास्त्रपुराणानि तपश्चरणं मोक्षं अपि कुर्वंति किं तस्य ॥ ९९ ॥

अप्पा णियमणि णिम्मलउ णियमें वसइ ण जासु आत्मा निजमनसि निर्मलो नियमेन वसति तिष्ठति न यस्य **सत्थपुराणइ तवचरणु मुक्खु जि करहि कि तासु** शास्त्रपुराणानि तपश्चरणं च मोक्षमपि किं कुर्वंति तस्येति । तद्यथा । वीतरागनिर्विकल्पसमाधिरूपा यस्य शुद्धात्मभावना नास्ति तस्य शास्त्रपुराणतपश्चरणानि निरर्थकानि भवंति । तर्हि किं सर्वथा निष्फलानि । नैव । यदि वीतरागसम्यक्त्वरूपस्वशुद्धात्मोपादेयभावना-

---

वैसा अब नहीं होसकता । ऐसा ही दूसरे ग्रंथोंमें कहा है—"अत्रेत्यादि" इसका अर्थ यह है कि श्रीसर्वज्ञवीतरागदेव इस भरतक्षेत्रमें इस पंचमकालमें शुक्लध्यानका निषेध करते हैं इस समय धर्मध्यान हो सकता है शुक्लध्यान नहीं हो सकता । उपशमश्रेणी और क्षपकश्रेणी दोनों ही इस समय नहीं हैं सातवां गुणस्थानतक गुणस्थान है ऊपरके गुणस्थान नहीं हैं । इस जगह तात्पर्य यह है कि जिस कारण परमात्माके ध्यानसे अंतर्मुहूर्तमें मोक्ष होती है इसलिये संसारकी स्थिति घटानेके वास्ते अब भी धर्मध्यानका आराधन करना चाहिये जिससे परंपराय मोक्ष भी मिलसकती है ॥ ९८ ॥

आगे ऐसा कहते हैं कि जिसके रागरहित मनमें शुद्धात्माकी भावना नहीं है उसके शास्त्र पुराण तपश्चरण क्या करसकते हैं अर्थात् कुछभी नहीं कर सकते;—[**यस्य**] जिसके [**निजमनसि**] निज मनमें [**निर्मलः आत्मा**] निर्मल आत्मा [**नियमेन**] निश्चयसे [**न वसति**] नहीं रहता [**तस्य**] उस जीवके [**शास्त्रपुराणानि**] शास्त्र पुराण [**तपश्चरणमपि**] तपस्या भी [**किं**] क्या [**मोक्षं**] मोक्षको [**कुर्वंति**] करसकते हैं कभी नहीं करसकते । **भावार्थ**—वीतरागनिर्विकल्पसमाधिरूप शुद्धभावना जिसके नहीं है उसके शास्त्र पुराण तपश्चरणादि सब व्यर्थ हैं । यहां शिष्य प्रश्न करता है कि क्या विल-

सहितानि भवंति तदा मोक्षस्यैव बहिरंगसहकारिकारणानि भवंति तदभावे पुण्यबंधकारणानि भवंति । मिथ्यात्वरागादिसहितानि पापबंधकारणानि च विद्यानुवादसंज्ञितदशमपूर्वश्रुतं पठित्वा भर्गपुरुषादिवदिति भावार्थः ॥ ९९ ॥

अथात्मनि ज्ञाते सर्वं ज्ञातं भवतीति दर्शयति;—

जोइय अप्पें जाणिएण, जगु जाणियउ हवेइ ।
अप्पहं केरइ भावडइ, विंबिउ जेण वसेइ ॥ १०० ॥

योगिन् आत्मना ज्ञातेन जगत् ज्ञातं भवति ।
आत्मनः कृते भावे विंबितं येन वसति ॥ १०० ॥

जोइय अप्पें जाणिएण हे योगिन् आत्मना ज्ञातेन । किं भवति । **जगु जाणियउ हवेइ** जगत्त्रिभुवनं ज्ञातं भवति । कस्मात् । **अप्पहं केरइं भावडइ विंबिउ जेण वसेइ** आत्मनः संबंधिनि भावे केवलज्ञानपर्याये विंबितं प्रतिविंबितं येन कारणेन वसति तिष्ठतीति । अयमर्थः । वीतरागनिर्विकल्पस्वसंवेदनज्ञानेन परमात्मतत्त्वे ज्ञाते सति समस्तद्वादशांगागमस्वरूपं ज्ञातं भवति । कस्माद्यस्माद्राघवपांडवादयो महापुरुषा जिनदीक्षां गृहीत्वा द्वादशांगं पठित्वा द्वादशांगाध्ययनफलभूते निश्चयरत्नत्रयात्मके परमात्मध्याने तिष्ठंति तेन कारणेन वीतरागस्वसंवेदनज्ञानेन निजात्मनि ज्ञाते सति सर्वं ज्ञातं भवतीति । अथवा

कुल ही निरर्थक हैं । उसका समाधान ऐसा है कि बिलकुल तो नहीं है लेकिन वीतराग सम्यक्त्वरूप निज शुद्धात्माकी भावना सहित हों तब तो मोक्षके ही बाह्य सहकारी कारण हैं यदि वे वीतरागसम्यक्त्वके अभावरूप हों तो पुन्यबंधके कारण हैं और जो मिथ्यात्वरागादि सहित हों तो पापबंधके कारण हैं जैसेकि रुद्र वगैरः विद्यानुवादनामा दशवें पूर्वतक शास्त्र पढकर भ्रष्ट हो जाते हैं ॥ ९९ ॥

आगे जिन भव्यजीवोंने आत्मा जानलिया उन्होंने सब जाना ऐसा दिखलाते हैं;— [**हे योगिन्**] हे योगी [**आत्मना ज्ञातेन**] एक अपने आत्माके जाननेसे [**जगत् ज्ञातं भवति**] यह तीन लोक जाना जाता है [**येन**] क्योंकि [**आत्मनः कृते भावे**] आत्माके भाव रूप केवलज्ञानमें [**विंबितं**] यह लोक प्रतिविंबित हुआ [**वसति**] वस रहा है । **भावार्थ**—वीतराग निर्विकल्प स्वसंवेदनज्ञानसे शुद्धात्मतत्त्वके जाननेपर समस्त द्वादशांग शास्त्र जाना जाता है । क्योंकि जैसे रामचंद्र पांडव भरत सगर आदि महान् पुरुष भी जिनराजकी दीक्षा लेकर फिर द्वादशांगको पढकर द्वादशांग पढनेका फल निश्चयरत्नत्रय स्वरूप जो शुद्धपरमात्मा उसके ध्यानमें लीन हुए तिष्ठे । इसलिये वीतरागस्वसंवेदन ज्ञानकर अपने आत्माका जानना ही सार है आत्माके जाननेसे सबका जानपना

निर्विकल्पसमाधिसमुत्पन्नपरमानंदसुखरसास्वादे जाते सति पुरुषो जानाति । किं जानाति । वेत्ति मम स्वरूपमन्यद्देहरागादिकं परमिति तेन कारणेनात्मनि ज्ञाते सर्वं ज्ञातं भवति । अथवा आत्मा कर्ता श्रुतज्ञानरूपेण व्याप्तिज्ञानेन करणभूतेन सर्वं लोकालोकं जानाति तेन कारणेनात्मनि ज्ञाते सर्वं ज्ञातं भवतीति । अथवा वीतरागनिर्विकल्पत्रिगुप्तिसमाधिबलेन केवलज्ञानोत्पत्तिबीजभूतेन केवलज्ञाने जाते सति दर्पणे बिंबवत् सर्वं लोकालोकस्वरूपं विज्ञायत इति हेतोरात्मनि ज्ञाते सर्वं ज्ञातं भवतीति । अत्रेदं व्याख्यानचतुष्टयं ज्ञात्वा बाह्याभ्यंतरपरिग्रहत्यागं कृत्वा सर्वतात्पर्येण निजशुद्धात्मभावना कर्तव्येति तात्पर्यं । तथा चोक्तं समयसारे "जो पस्सइ अप्पाणं अबद्धपुट्ठं अणण्णमविसेसं । अपदेससुत्तमज्झं पस्सइ जिणसासणं सव्वं" ॥ १०० ॥

अथैतदेव समर्थयति;—

अप्पसहावि परिट्ठियहं, एहउ होइ विसेसु ।
दीसइ अप्पसहावि लहु, लोयालोउ असेसु ॥ १०१ ॥

सफल होता है इस कारण जिन्होंने अपना आत्मा जाना उनने सबको जाना । अथवा निर्विकल्पसमाधिसे उत्पन्न हुआ जो परमानंद सुखरस उसके आस्वाद होनेपर ज्ञानी पुरुष ऐसा जानता है कि मेरा स्वरूप जुदा है और देहरागादिक मुझसे दूसरे हैं मेरे नहीं हैं इसलिये आत्माके (अपने)जाननेसे सब भेद जाने जाते हैं जिसने अपनेको जानलिया उसने अपनेसे भिन्न सब पदार्थ जाने । अथवा आत्मा श्रुतज्ञानरूप व्याप्तिज्ञानसे सब लोकालोकको जानता है इसलिये आत्माके जाननेसे सब जाना गया । अथवा वीतरागनिर्विकल्प परमसमाधिके बलसे केवल ज्ञानको उत्पन्न (प्रगट) करके जैसे दर्पणमें घटपटादि पदार्थ झलकते हैं उसीप्रकार ज्ञानरूपी दर्पणमें सब लोक अलोक भासते हैं । इससे यह बात निश्चय हुई कि आत्माके जाननेसे सब जाना जाता है । यहांपर सारांश यह हुआ कि इन चारों व्याख्यानोंका रहस्य जानकर बाह्य अभ्यंतर सब परिग्रह छोडकर सब तरहसे अपने शुद्धात्माकी भावना करनी चाहिये । ऐसा ही कथन समयसारमें श्रीकुंदकुंदाचार्यने किया है । "जो पस्सइ" इत्यादि—इसका अर्थ यह है कि जो निकट संसारी जीव स्वसंवेदन ज्ञानकर अपने आत्माको अनुभवता सम्यग्दृष्टिपनेसे अपनेको देखता है वह सब जैनशासनको देखता है ऐसा जिनसूत्रमें कहा है । कैसा वह आत्मा है ? रागादिक ज्ञानावरणादिकसे रहित है, अन्यभाव जो नरनारकादिपर्याय उनसे रहित है, विशेष अर्थात् गुणस्थान मार्गणा जीवसमास इत्यादि सब भेदोंसे रहित है । ऐसा आत्माके स्वरूपको जो देखता है जानता है अनुभवता है वह सब जिनशासनका मर्म जाननेवाला है ॥ १०० ॥

आत्मस्वभावे प्रतिष्ठितानां एष भवति विशेषः ।
दृश्यते आत्मस्वभावे लघु लोकालोकः अशेषः ॥ १०१ ॥

अप्पसहावि परिट्ठियहं आत्मस्वभावे प्रतिष्ठितानां पुरुषाणां **एहउ होइ विसेसु** एष प्रत्यक्षीभूतो विशेषो भवति । एषः कः । **दीसइ अप्पसहावि लहु** दृश्यते परमात्मस्वभावे स्थितानां लघु शीघ्रं । अथवा पाठांतरं 'दीसइ अप्पसहाउ लहु' दृश्यते । स कः । आत्मस्वभावः कर्मतापन्नो लघु शीघ्रं न केवलमात्मस्वभावो दृश्यते **लोयालोउ असेसु** लोकालोकस्वरूपमप्यशेषं दृश्यत इति । अत्र विशेषेण पूर्वसूत्रोक्तमेव व्याख्यानचतुष्टयं ज्ञातव्यं यस्मात्तस्यैव वृद्धमतसंवादरूपत्वादिति भावार्थः ॥ १०१ ॥

अतो अमुमेवार्थं दृष्टांतदार्ष्टांताभ्यां समर्थयति;—

अप्पु पयासइ अप्पु परु, जिम अंबरि रविराउ ।
जोइय एत्थु म भंति करि, एहउ वत्थुसहाउ ॥ १०२ ॥

आत्मा प्रकाशयति आत्मानं परं यथा अंबरे रविरागः ।
योगिन् अत्र मा भ्रांतिं कार्षीः एष वस्तुस्वभावः ॥ १०२ ॥

अप्पु पयासइ आत्मा कर्ता प्रकाशयति । कं । **अप्पु परु** आत्मानं परं च । यथा कः किं प्रकाशयति । **जिमु अंबरि रविराउ** यथा येन प्रकारेण अंबरे रविरागः **जोइय एत्थु म भंति करि एहउ वत्थुसहाउ** हे योगिन्नत्र भ्रांतिं मा कार्षीः एष वस्तुस्वभावः इति । तद्यथा । यथा निर्मेघाकाशे रविरागो रविप्रकाशः स्वं परं च प्रकाशयति तथा वीतरागनिर्विकल्पसमाधिरूपे कारणसमयसारे स्थित्वा मोहमेघपटले विनष्टे सति परमात्मा छद्मस्थाव-

---

अब यही बात समर्थन (दृढ) करते हैं;—[**आत्मस्वभावे**] आत्माके स्वभावमें [**प्रतिष्ठितानां**] लीन हुए पुरुषोंके [**एष विशेषः भवति**] प्रत्यक्षमें तो यह विशेषता होती है कि [**आत्मस्वभावे**] आत्मस्वभावमें उनको [**अशेषः लोकालोकः**] समस्त लोकालोक [**लघु**] शीघ्र ही [**दृश्यते**] दीख जाता है । अथवा इस जगह ऐसा भी पाठांतर है "अप्पसहाव लहु" इसका अर्थ यह है कि अपना स्वभाव शीघ्र ही दीख जाता है और स्वभावके देखनेसे समस्त लोक भी दीखता है । यहांपर भी विशेषकरके पूर्वसूत्रकथित चारोंतरहका व्याख्यान जानना चाहिये, क्योंकि यही व्याख्यान बड़े २ आचार्योंने माना है ॥ १०१ ॥

आगे इसी अर्थको दृष्टांतदार्ष्टांतकरके दृढ करते हैं;—[**यथा**] जैसे [**अंबरे**] आकाशमें [**रविरागः**] सूर्यका प्रकाश अपनेको और परको प्रकाशित करता है उसीतरह [**आत्मा**] आत्मा [**आत्मानं**] अपनेको [**परं**] पर पदार्थोंको [**प्रकाशयति**] प्रकाशता है सो [**हे योगिन्**] हे योगी [**अत्र**] इसमें [**भ्रांतिं मा कुरु**] भ्रम मत

स्थायां वीतरागभेदभावनाज्ञानेन स्वं परं च प्रकाशयतीत्येष पश्चादर्हदवस्थारूपकार्यसमयसार-रूपेण परिणम्य केवलज्ञानेन स्वं परं च प्रकाशयतीत्येष आत्मवस्तुस्वभावः संदेहो नास्तीति । अत्र योसौ केवलज्ञानाद्यनंतचतुष्टयव्यक्तिरूपः कार्यसमयसारः स एवोपादेय इत्यभिप्रायः ॥ १०२ ॥

अथास्मिन्नेवार्थे पुनरपि व्यक्त्यर्थं दृष्टांतमाह;—

तारायणु जलि विंबियउ, णिम्मलि दीसइ जेम ।
अप्पए णिम्मलि विंबियउ, लोयालोउवि तेम ॥ १०३ ॥

तारागणः जले विंबितः निर्मले दृश्यते यथा ।
आत्मनि निर्मले विंबितं लोकालोकमपि तथा ॥ १०३ ॥

तारायणु जलि विंबियउ तारागणो जले विंबितः प्रतिस्फलितः । कथंभूते जले । **णिम्मलि दीसइ जेम** निर्मले दृश्यते यथा । दार्ष्टांतमाह । **अप्पइ णिम्मलि विंबियउ लोयालोउवि तेम** आत्मनि निर्मले मिथ्यात्वरागादिविकल्पजालरहिते विंबितं लोकालोकमपि तथा दृश्यत इति । अत्र विशेषव्याख्यानं यदेव पूर्वदृष्टांतसूत्रे व्याख्यातमत्रापि तदेव ज्ञातव्यं । कस्मात् । अयमपि तस्य दृष्टांतस्य दृढीकरणार्थमिति सूत्रतात्पर्यार्थः ॥ १०३ ॥

करै [**एष वस्तुभावः**] ऐसा ही वस्तुका स्वभाव है । **भावार्थ**—जैसे मेघरहित आकाशमें सूर्यका प्रकाश अपनेको और परको प्रकाशता है उसी प्रकार वीतरागनिर्विकल्पसमाधिरूप कारणसमयसारमें लीन होकर मोहरूप मेघसमूहका नाश करके यह आत्मा मुनि अवस्थामें वीतराग स्वसंवेदन ज्ञानकर अपनेको और परको कुछ प्रकाशित करता है पीछे अरहंत अवस्थारूप कार्यसमयसारस्वरूप परिणमनकरके केवलज्ञानसे निज और परको सब द्रव्य क्षेत्र काल भावसे प्रकाशता है । यह आत्मवस्तुका स्वभाव है इसमें संदेह नहीं समझना । इस जगह ऐसा सारांश है कि जो केवल ज्ञान केवल दर्शन अनंतसुख अनंतवीर्यरूप कार्यसमयसार है वही आराधने योग्य है ॥ १०२ ॥

आगे इसी अर्थमें फिर भी खुलासा करनेके लिये दृष्टांत कहते हैं;—[**यथा**] जैसे [**तारागणः**] ताराओंका समूह [**निर्मले जले**] निर्मल जलमें [**विंबितः**] प्रतिविंबित हुआ [**दृश्यते**] प्रत्यक्ष दीखता है [**तथा**] उसीतरह [**निर्मले आत्मनि**] मिथ्यात्वरागादि विकल्पोंसे रहित स्वच्छ आत्मामें [**लोकालोकं अपि**] समस्त लोक अलोक भासते हैं । **भावार्थ**—इसका विशेष व्याख्यान जो पहले कहा था वही यहां पर जानना अर्थात् जो सबका ज्ञाता दृष्टा आत्मा है वही उपादेय है । यह सूत्र भी पहले कथनका दृढ करनेवाला है ॥ १०३ ॥

अथात्मा परश्च येनात्मना ज्ञानेन ज्ञायते तमात्मानं स्वसंवेदनज्ञानबलेन जानीहीति कथयति;—

अप्पुवि परुवि वियाणियइ, जें अप्पें मुणिएण ।
सो णियअप्पा जाणि तुहुं, जोइय णाणबलेण ॥ १०४ ॥

आत्मापि परः अपि विज्ञायते येन आत्मना विज्ञातेन ।
तं निजात्मानं जानीहि त्वं योगिन् ज्ञानबलेन ॥ १०४ ॥

अप्पुवि परुवि वियाणियइं जें अप्पें मुणिएण आत्मापि परोपि विज्ञायते येन आत्मना विज्ञातेन **सो णिय अप्पा जाणि तुहुं** तं निजात्मानं जानीहि त्वं **जोइय णाणबलेण** हे योगिन् । केन कृत्वा जानीहि । ज्ञानबलेनेति । अयमत्रार्थः । वीतरागसदानंदैकस्वभावेन येनात्मना ज्ञातेन स्वात्मा परोपि ज्ञायते तमात्मानं वीतरागनिर्विकल्पस्वसंवेदनज्ञानभावनासमुत्पन्नपरमानंदसुखरसास्वादेन जानीहि तन्मयो भूत्वा सम्यगनुभवेति भावार्थः ॥ १०४ ॥

अतः कारणात् ज्ञानं पृच्छति;—

णाणु पयासहि परमु मह्, किं अण्णें बहुएण ।
जेण णियप्पा जाणियइं, सामिय एक्कखणेण ॥ १०५ ॥

ज्ञानं प्रकाशय परमं मम किं अन्येन बहुना ।
येन निजात्मा ज्ञायते स्वामिन् एकक्षणेन ॥ १०५ ॥

णाणु पयासहि परमु महु ज्ञानं प्रकाशय परमं मम **किं अण्णें बहुएण** किमन्येन ज्ञानरहितेन बहुना **जेण णियप्पा जाणियइं** येन ज्ञानेन निजात्मा ज्ञायते **सामिय एक्क-**

आगे जिस आत्माके जाननेसे निज और पर सब पदार्थ जाने जाते हैं उसी आत्माको तू स्वसंवेदन ज्ञानके बलसे जान ऐसा कहते हैं;—[**येन आत्मना विज्ञातेन**] जिस आत्माको जाननेसे [**आत्मा अपि**] आप और [**परः अपि**] पर सब पदार्थ [**विज्ञायते**] जाने जाते हैं [**तं निजात्मानं**] उस अपने आत्माको [**हे योगिन्**] हे योगी [**त्वं**] तू [**ज्ञानबलेन**] आत्मज्ञानके बलसे [**जानीहि**] जान । **भावार्थ**—यहांपर यह है कि रागादि विकल्पजालसे रहित सदा आनंद स्वभाव जो निज आत्मा उसके जाननेसे निज और पर सब जाने जाते हैं इसलिये हे योगी हे ध्यानी तू उस आत्माको वीतराग निर्विकल्पस्वसंवेदनज्ञानकी भावनासे उत्पन्न परमानंद सुखरसके आस्वादसे जान अर्थात् तन्मयी होकर अनुभव कर । स्वसंवेदन ज्ञान (आपकर अपनेको अनुभव करना) ही सार है । ऐसा उपदेश श्रीयोगींद्रदेवने प्रभाकर भट्टको दिया ॥ १०४ ॥

खणेण हे स्वामिन्नियतकालेनैकक्षणेनेति । तथाहि । प्रभाकरभट्टः पृच्छति । किं पृच्छति । हे भगवन् येन वीतरागस्वसंवेदनज्ञानेन क्षणमात्रेणैव शुद्धबुद्धैकस्वभावो निजात्मा ज्ञायते तदेव ज्ञानं कथय किमन्येन रागादिप्रवर्धकेन किकल्पजालेनेति । अत्र येनैव ज्ञानेन मिथ्यात्वरागादिविकल्परहितेन निजशुद्धात्मसंवित्तिरूपेणांतर्मुहूर्तेनैव परमात्मस्वरूपं ज्ञायते तदेवोपादेयमिति तात्पर्यार्थः ॥ १०५ ॥

अत ऊर्ध्वं सूत्रचतुष्टयेन ज्ञानस्वरूपं प्रकाशयति;—

अप्पा णाणु मुणेहि तुहुं, जो जाणइं अप्पाणु ।
जीवपएसहिं तित्तिडउ, णाणें गयणपवाणु ॥ १०६ ॥

आत्मानं ज्ञानं मन्यस्व त्वं यः जानाति आत्मानं ।
जीवप्रदेशैः तावन्मात्रं ज्ञानेन गगनप्रमाणं ॥ १०६ ॥

अप्पा णाणु मुणेहिं तुहुं हे प्रभाकरभट्ट आत्मानं ज्ञानं मन्यस्व त्वं । यः किं करोति । **जो जाणइ अप्पाणु** यः कर्ता जानाति । कं । आत्मानं । किंविशिष्टं । **जीवपएसहिं तित्तिडउ** जीवप्रदेशैस्तावन्मात्रं लोकमात्रप्रदेशं । अथवा पाठांतरं । 'जीवपएसहिं देहसमु' तस्यार्थो निश्चयेन लोकमात्रप्रदेशेपि व्यवहारेणैव संहारविस्तारधर्मत्वाद्देहमात्रः । पुनरपि कथंभूतमात्मानं **णाणें गयणपवाणु** ज्ञानेन कृत्वा व्यवहारेण गगनमात्रं जानीहि इति ।

अब प्रभाकर भट्ट महान् विनयसे ज्ञानका स्वरूप पूछता है;-[**हे स्वामिन्**] हे भगवान [**येन ज्ञानेन**] जिस ज्ञानसे [**एक क्षणेन**] क्षण भरमें [**निजात्मा**] अपना आत्मा [**ज्ञायते**] जाना जाता है वह [**परमं ज्ञानं**] परम ज्ञान [**मम**] मेरे [**प्रकाशय**] प्रकाशित करो [**अन्येन बहुना**] और बहुत विकल्पजालोंसे [**किम्**] क्या फायदा कुछ भी नहीं । **भावार्थ**—प्रभाकर भट्ट श्रीयोगींद्रदेवको पूछता है कि हे स्वामी जिस वीतराग स्वसंवेदन ज्ञानकर क्षणमात्रमें शुद्धबुद्ध स्वभाव अपना आत्मा जाना जाता है वह ज्ञान मुझको प्रकाशित करो दूसरे विकल्पजालोंसे कुछ फायदा नहीं है क्योंकि ये रागादिक विभावोंके बढानेवाले हैं । सारांश यह है कि मिथ्यात्वरागादि विकल्पोंसे रहित तथा निज शुद्ध आत्मानुभवरूप जिस ज्ञानसे अंतर्मुहूर्तमेंही परमात्माका स्वरूप जाना जाता है वही ज्ञान उपादेय है । ऐसी प्रार्थना शिष्यने श्रीगुरूसे की ॥ १०५ ॥

आगे श्रीगुरु चार दोहासूत्रोंसे ज्ञानका स्वरूप प्रकाशते हैं;—श्रीगुरु कहते हैं कि हे प्रभाकरभट्ट [**त्वं**] तू [**आत्मानं**] आत्माको ही [**ज्ञानं**] ज्ञान [**मन्यस्व**] जान [**यः**] जो ज्ञानरूप आत्मा [**आत्मानं**] अपनेको [**जीवप्रदेशैः तावन्मात्रं**] अपने प्रदेशोंसे लोक प्रमाण [**ज्ञानेन गगनप्रमाणं**] ज्ञानसे व्यवहार नयकर आकाशप्रमाण [**जानाति**] जानता है । अथवा यहां "देहसमु" ऐसा भी पाठ है तब ऐसा समझना

तद्यथा । निश्चयनयेन मतिश्रुतावधिमनःपर्ययकेवलज्ञानपंचकादभिन्नं व्यवहारेण ज्ञानापेक्षया रूपावलोकनविषये दृष्टिवल्लोकालोकव्यापकं निश्चयेन लोकमात्रासंख्येयप्रदेशमपि व्यवहारेण स्वदेहमात्रं तमित्थंभूतमात्मानं आहारभयमैथुनपरिग्रहसंज्ञास्वरूपप्रभृतिसमस्तविकल्पकल्लोलजालं त्यक्त्वा जानाति यः स पुरुष एव ज्ञानादभिन्नत्वाज् ज्ञानं भण्यत इति । अत्रायमेव निश्चयनयेन पंचज्ञानाभिन्नमात्मानं जानात्यसौ ध्याता तमेवोपादेयं जानीहीति भावार्थः । तथा चोक्तं । "आभिणिसुदोहिमणकेवलं च तं होदि एगमेव पदं । सो एसो परमट्ठो जं लहिदुं णिव्वुदिं लहदि" ॥ १०६ ॥

अथ;—

अप्पहं जेवि विभिण्ण वढ, ते जि हवंति ण णाणु ।
ते तुहुं तिण्णिवि परिहरिवि, णियमिं अप्पु वियाणु ॥ १०७ ॥

आत्मनः ये अपि विभिन्नाः वत्स तेपि भवंति न ज्ञानं ।
तान् त्वं त्रीण्यपि परिहृत्य नियमेन आत्मानं विजानीहि ॥ १०७ ॥

अप्पहं जेवि विभिण्ण वढ आत्मनः सकाशाद्येपि भिन्नाः वत्स **ते जि हवंति ण णाणु** तेपि भवंति न ज्ञानं तेन कारणेन **तुहुं तिण्णिवि परिहरिवि** तान् कर्मतापन्नान् तत्र हे

कि निश्चयनयसे लोक प्रमाण है तौभी व्यवहारनयसे संकोच विस्तारस्वभाव होनेसे शरीर प्रमाण है । **भावार्थ**—निश्चयनयकर मति श्रुत अवधि मनःपर्यय केवल इन पांच ज्ञानोंसे अभिन्न तथा व्यवहारनयसे ज्ञानकी अपेक्षा रूप देखनेमें नेत्रोंकी तरह लोक अलोकमें व्यापक है । अर्थात् जैसे आंखें रूपी पदार्थोंको देखती हैं परंतु उन स्वरूप नहीं होतीं वैसे ही आत्मा यद्यपि लोक अलोकको जानता है देखता है तौभी उन स्वरूप नहीं होता अपने स्वरूप ही रहता है ज्ञानकर ज्ञेय प्रमाण है यद्यपि निश्चयसे प्रदेशोंकर लोक प्रमाण है असंख्यात प्रदेशी है तौभी व्यवहारनयकर अपने देहप्रमाण है ऐसे आत्माको जो पुरुष आहार भय मैथुन परिग्रहरूप चार वांछाओंस्वरूप आदि समस्त विकल्पकी तरंगोंको छोड़कर जानता है वही पुरुष ज्ञानसे अभिन्न होनेसे ज्ञान कहा जाता है । आत्मा और ज्ञानमें भेद नहीं है आत्मा ही ज्ञान है । यहां सारांश यह है कि निश्चयनयकरके पांच प्रकारके ज्ञानोंसे अभिन्न अपने आत्माको जो ध्यानी जानता है उसी आत्माको तू उपादेय जान । ऐसाही सिद्धांतोंमें हरएक जगह कहा है—"आभिणि" इत्यादि । इसका अर्थ यह है कि मति श्रुत अवधि मनःपर्यय केवल ज्ञान ये पांच प्रकारके सम्यग्ज्ञान एक आत्माका ही स्वरूप है आत्माके विना ये ज्ञान नहीं होसकते वह आत्मा ही परम अर्थ है जिसको पाकर यह जीव निर्वाणको पाता है ॥ १०६ ॥

आगे परभावका निषेध करते हैं;—[**हे वत्स**] हे शिष्य [**आत्मनः**] आत्मासे

प्रभाकरभट्ट त्रीण्यपि परिहृत्य । पश्चात्किं कुरु । **णियमिं अप्पु वियाणु** निश्चयेनात्मानं विजानीहीति । तद्यथा । सकलविशदैकज्ञानस्वरूपात्परमात्मपदार्थात् निश्चयनयेन भिन्नं त्रीण्यपि धर्मार्थकामान् त्यक्त्वा वीतरागस्वसंवेदनलक्षणे शुद्धात्मानुभूतिज्ञाने स्थित्वात्मानं जानीहीति भावार्थः ॥ १०७ ॥

अप्पा णाणहं गम्मु पर, णाणु वियाणइ जेण ।
तिण्णिवि मिल्लिवि जाणि तुहुं, अप्पा णाणें तेण ॥ १०८ ॥

आत्मा ज्ञानस्य गम्यः परः ज्ञानं विजानाति येन ।
त्रीण्यपि मुक्त्वा जानीहि त्वं आत्मानं ज्ञानेन तेन ॥ १०८ ॥

अप्पा णाणहं गम्मु पर आत्मा ज्ञानस्य गम्यो विषयः परः । कोर्थो । नियमेन । कस्मात् । **णाणु वियाणइ जेण** ज्ञानं कर्तृ विजानात्यात्मानं येन कारणेन अतः कारणात् **तिण्णिवि मिल्लिवि जाणि तुहु** त्रीण्यपि मुक्त्वा जानीहि त्वं हे प्रभाकरभट्ट **अप्पा णाणें तेण** । कं जानीहि । आत्मानं । केन । ज्ञानेन तेन कारणेनेति । तथाहि । निजशुद्धात्मा ज्ञानस्यैव गम्यः । कस्मादिति चेत् । मतिज्ञानादिपंचकविकल्परहितं यत्परमपदं परमात्मशब्दवाच्यं साक्षान्मोक्षकारणं तद्रूपो योसौ परमात्मा तमात्मानं वीतरागनिर्विकल्पस्वसंवेदनज्ञानगुणेन विना दुर्धरानुष्ठानं कुर्वाणोपि बहवोपि न लभंते यतः कारणात् । तथा चोक्तं समयसारे । " णाणगुणेहिं विहीणा एदं तु पदं बहूवि ण लहंति । तं गिण्ह सुपदमेदं जइ इच्छसि दुक्खपरिमोक्खं" । अत्र धर्मार्थकामादिसर्वपरद्रव्येच्छां योसौ मुंचति स्वशुद्धात्मसुखामृते तृप्तो भवति स एव निःपरिग्रहो भण्यते स एवात्मानं जानातीति भावार्थः ।

[**ये अपि भिन्नाः**] जो जुदे भाव हैं [**तेपि**] वेभी [**ज्ञानं न भवंति**] ज्ञान नहीं हैं वे सब भाव ज्ञानसे रहित जडरूप हैं [**तान्**] उन [**त्रीणि अपि**] धर्म अर्थ कामरूप तीनों भावोंको [**परिहृत्य**] छोडकर [**नियमेन**] निश्चयसे [**आत्मानं**] आत्माको [**त्वं**] तू [**विजानीहि**] जान । **भावार्थ**—हे प्रभाकरभट्ट मुनिरूप धर्म, अर्थरूप संसारके प्रयोजन, काम (विषयाभिलाष) ये तीनों ही आत्मासे भिन्न हैं ज्ञानरूप नहीं हैं । निश्चयनयकरके सब तरफसे निर्मल केवल ज्ञानस्वरूप परमात्मपदार्थसे भिन्न तीनों ही धर्म अर्थ काम पुरुषार्थोंको छोडकर वीतराग स्वसंवेदनस्वरूप शुद्धात्मानुभवरूपज्ञानमें रहकर आत्माको जान ॥ १०७ ॥

आगे आत्माका स्वरूप दिखलाते हैं;—[**आत्मा**] आत्मा [**परः**] नियमसे [**ज्ञानस्य**] ज्ञानके [**गम्यः**] गोचर है [**येन**] क्योंकि [**ज्ञानं**] ज्ञान ही [**विजानाति**] आत्माको जानता है [**तेन**] इसलिये [**त्वं**] हे प्रभाकरभट्ट तू [**त्रीणि अपि मुक्त्वा**] धर्म अर्थ काम इन तीनोंही भावोंको छोडकर [**ज्ञानेन**] ज्ञानसे [**आत्मानं**] निजआत्माको

उक्तं च । "अपरिग्गहो अणिच्छो भणिओ णाणी दु णिच्छदे धम्मं । अपरिग्गहो दु धम्मस्स जाणगो तेण सो होदि" ॥ १०८ ॥

अथ;—

णाणिय णाणिउ णाणिएण णाणिउं जा ण मुणेहि ।
ता अण्णाणिं णाणमउं, किं पर बंभु लहेहि ॥ १०९ ॥

ज्ञानिन् ज्ञानी ज्ञानिना ज्ञानिनं यावत् न जानासि ।
तावत् अज्ञानेन ज्ञानमयं किं परं ब्रह्म लभसे ॥ १०९ ॥

णाणिय हे ज्ञानिन् **णाणिउ** ज्ञानी निजात्मा **णाणिएण** ज्ञानिना निजात्मना करणभूतेन । कथंभूतो निजात्मा । **णाणिउ** ज्ञानी ज्ञानलक्षणः तमित्थंभूतमात्मानं **जा ण मुणेहि** यावत्कालं न जानासि **ता अण्णाणिं णाणमउं** तावत्कालमज्ञानेन मिथ्यात्वरा-

---

[**जानीहि**] जान । **भावार्थ**—निजशुद्धात्मा ज्ञानके ही गोचर (जानने योग्य) है क्योंकि मतिज्ञानादि पांच भेदोंरहित जो परमात्मशब्दका अर्थ परमपद है वही साक्षात् मोक्षका कारण है उस स्वरूप परमात्माको वीतराग निर्विकल्प स्वसंवेदन ज्ञानके विना दुर्धर तपके करनेवाले भी बहुतसे प्राणी नहीं पाते । इसलिये ज्ञानसे ही अपना स्वरूप अनुभव कर । ऐसा ही कथन श्रीकुंदकुंदाचार्यने समयसारजीमें किया है "णाणगुणेहिं" इत्यादि । इसका अर्थ यह है कि सम्यग्ज्ञान नामा निज गुणसे रहित पुरुष इस ब्रह्मपदको बहुत कष्ट करके भी नहीं पाते अर्थात् जो महान दुर्धर तप करौ तौभी नहीं मिलता । इसलिये जो तू दुःखसे छूटना चाहता है सिद्धपदकी इच्छा रखता है तो आत्मज्ञानकर निजपदको प्राप्त कर । यहां सारांश यह है कि जो धर्म अर्थ कामादि सब परद्रव्यकी इच्छाको छोड़ता है वही निज शुद्धात्मसुखरूप अमृतमें तृप्त हुआ सिद्धांतमें परिग्रहरहित कहा जाता है और निर्ग्रंथ कहा जाता है और वही अपने आत्माको जानता है । ऐसा ही समयसारजीमें कहा है "अपरिग्गहो" इत्यादि । इसका अर्थ ऐसा है कि जिनसिद्धांतमें परिग्रहरहित और इच्छारहित ज्ञानी कहा गया है जो धर्मको भी नहीं चांहता है अर्थात् जिसके व्यवहारधर्मकी भी कामना नहीं है उसके अर्थ तथा कामकी इच्छा कहांसे होवै । वह आत्मज्ञानी सब अभिलाषाओंसे रहित है जिसके धर्मका भी परिग्रह नहीं है तो अन्य परिग्रह कहांसे हो इसलिये वह ज्ञानी परिग्रही नहीं है केवल निजस्वरूपका जाननेवाला ही होता है ॥ १०८ ॥

आगे ज्ञानसे ही परब्रह्मकी प्राप्ति होती है ऐसा कहते हैं;—[**हे ज्ञानिन्**] हे ज्ञानी [**ज्ञानी**] ज्ञानवान् अपना आत्मा [**ज्ञानिना**] सम्यग्ज्ञानकरके [**ज्ञानिनं**] ज्ञानलक्षण-

गादिविकल्पजालेन ज्ञानमयं । **किं पर बंभु लहेहि** किं परमुत्कृष्टं ब्रह्मस्वभावं लभसे किं तु नैवेति । तद्यथा । यावत्कालमात्मा कर्ता आत्मानं कर्मतापन्नं आत्मना करणभूतेन आत्मने निमित्तं आत्मनः सकाशात् आत्मनि स्थितं समस्तरागादिविकल्पजालं मुक्त्वा न जानासि तावत्कालं परमब्रह्मशब्दवाच्यं निर्दोषिपरमात्मानं किं लभसे नैवेति भावार्थः ॥ १०९ ॥

अथानंतरं सूत्रचतुष्टयेनांतरस्थले परलोकशब्दव्युत्पत्त्या परलोकशब्दवाच्यं परमात्मानं कथयति;—

जोइज्जइ तिं बंभु परु, जाणिज्जइ तिं सोइ ।
बंभु मुणेविणु जेण लहु, गम्मिज्जइ परलोइ ॥ ११० ॥

दृश्यते तेन ब्रह्म परः ज्ञायते तेन स एव ।
ब्रह्म मत्त्वा येन लघु गम्यते परलोके ॥ ११० ॥

जोइज्जइ दृश्यते **तिं** तेन पुरुषेण तेन कारणेन वा । कोसौ दृश्यते । **बंभु परु** ब्रह्मशब्दवाच्यः शुद्धात्मा । कथंभूतः । परः उत्कृष्टः । अथवा पर इति पाठे नियमेन । न केवलं दृश्यते **जाणिज्जइ** ज्ञायते तेन पुरुषेण तेन कारणेन वा **सोइ** स एव शुद्धात्मा । केन कारणेन । **बंभु मुणेविणु जेण लहु** येन पुरुषेण येन कारणेन वा ब्रह्मशब्दवाच्यनिर्दोषिपरमात्मानं मत्त्वा ज्ञात्वा पश्चात् **गम्मिज्जइ परलोइ** तेनैव पूर्वोक्तेन ब्रह्मस्वरूपे परिज्ञा-

---

वाले आत्माको [**यावत्**] जबतक [**न**] नहीं [**जानासि**] जानता [**तावत्**] तबतक [**अज्ञानेन**] अज्ञानी होनेसे [**ज्ञानमयं**] ज्ञानमय [**परं ब्रह्म**] अपने स्वरूपको [**किं लभसे**] क्या पासकता है कभी नहीं पासकता । जो कोई आत्माको पाता है तो ज्ञानसे ही पासकता है । **भावार्थ**—जबतक यह जीव अपनेको आपकर अपनी प्राप्तिके लिये आपसे अपनेमें तिष्ठता नहीं जान ले तबतक निर्दोष शुद्ध परमात्मा सिद्ध परमेष्टीको क्या पासकता है कभी नहीं पासकता । जो आत्माको जानता है वही परमात्माको जानता है ॥ १०९ ॥

इसप्रकार प्रथम महास्थलमें चार दोहाओंकर अंतरस्थलमें ज्ञानका व्याख्यान किया । आगे चार सूत्रोंकर अंतरस्थलमें परलोक शब्दकी व्युत्पत्तिकर परलोक शब्दसे परमात्माको ही कहते हैं;—[**तेन**] उस कारणसे उसी पुरुषसे [**परः ब्रह्म**] शुद्धात्मा नियमसे [**दृश्यते**] देखा जाता है [**तेन**] उसी पुरुषसे निश्चयसे [**स एव**] वही शुद्धात्मा [**ज्ञायते**] जाना जाता है [**येन**] जो पुरुष जिसकारण [**ब्रह्म मत्त्वा**] अपना स्वरूप जानकर [**परलोके लघु गम्यते**] परमात्मतत्त्वमें शीघ्र ही प्राप्त होता है । **भावार्थ**—जो

नपुरुषेण तेनैव कारणेन वा गम्यते । क । परलोके परलोकशब्दवाच्ये परमात्मतत्त्वे । किं च । योसौ शुद्धनिश्चयनयेन शक्तिरूपेण केवलज्ञानदर्शनस्वभावः परमात्मा स सर्वेषां सूक्ष्मैकेन्द्रियादिजीवानां शरीरे पृथक् पृथग्रूपेण तिष्ठति स एव परमब्रह्मा स एव परमविष्णुः स एव परमशिवः इति, व्यक्तिरूपेण पुनर्भगवानर्हन्नेव मुक्तिगतसिद्धात्मा वा परमब्रह्मा विष्णुः शिवो वा भण्यते । तेन नान्यः कोपि परिकल्पितः जगद्व्यापी तथैवैको परमब्रह्मा शिवो वास्तीति । अयमत्रार्थः । यत्रासौ मुक्तात्मा लोकाग्रे तिष्ठति स एव ब्रह्मलोकः स एव विष्णुलोकः स एव शिवलोको नान्यः कोपीति भावार्थः ॥ ११० ॥

अथ;—

मुणिवरविंदहं हरिहरहं, जो मणि णिवसइ देउ ।
परहं जि परतरु णाणमउ, सो वुच्चइ परलोउ ॥ १११ ॥

मुनिवरवृंदानां हरिहराणां यः मनसि निवसति देवः ।
परस्मात् अपि परतरः ज्ञानमयः स उच्यते परलोकः ॥ १११ ॥

मुणिवरविंदहं हरिहरहं मुनिवरवृंदानां हरिहराणां च **जो मणि णिवसइ देउ**

कोई शुद्धात्मा अपना स्वरूप शुद्ध निश्चयनयकर शक्तिरूपसे केवलज्ञान केवलदर्शन स्वभाव है वही वास्तवमें (असलमें) परमेश्वर है । परमेश्वरमें और जीवमें जातिभेद नहीं है जबतक कर्मोंसे बंधा हुआ है तबतक संसारमें भ्रमण करता है । सूक्ष्म बादर एकेन्द्रियादि जीवोंके शरीरमें जुदा जुदा तिष्ठता है और जब कर्मोंसे रहित होजाता है तब सिद्ध कहलाता है । संसारअवस्थामें शक्तिरूप परमात्मा है और सिद्ध अवस्थामें व्यक्तिरूप है । यही आत्मा परब्रह्म परमविष्णु परमशिव शक्तिरूप है और प्रगटरूपसे भगवान अर्हंत अथवा मुक्तिको प्राप्त हुए सिद्धात्मा ही परमब्रह्मा परमविष्णु परमशिव कहे जाते हैं । यह निश्चयसे जानो । ऐसा कहनेसे अन्य कोई भी कल्पना किया हुआ जगतमें व्यापक परमब्रह्म परमविष्णु परमशिव नहीं है । सारांश यह है कि जिसलोकके शिखरपर अनंत सिद्ध विराज रहे हैं वही लोकका शिखर परम धाम ब्रह्मलोक वही विष्णुलोक और वही शिवलोक है अन्य कोईभी ब्रह्मलोक विष्णुलोक शिवलोक नहीं है । ये सब निर्वाण क्षेत्रके नाम हैं और ब्रह्मा विष्णु शिव ये सब सिद्ध परमेष्ठीके नाम हैं । सो भगवान तो व्यक्तिरूप परमात्मा हैं तथा यह जीव शक्तिरूप परमात्मा है । इसमें संदेह नहीं है । जितने भगवानके उतने सब शक्तिरूप इस जीवके नाम हैं । यह जीव ही शुद्धनयकर भगवान है ॥ ११० ॥

आगे ऐसा कहते हैं कि भगवानका ही नाम परलोक है;—[**यः**] जो आत्मदेव [**मुनिवरवृंदानां हरिहराणां**] मुनीश्वरोंके समूह के तथा इंद्र वा वासुदेव, रुद्रोंके

योसौ मनसि निवसति देवः आराध्यः । पुनरपि किंविशिष्टः । **परहं जि परतरु णाणमउ** परस्मादुत्कृष्टादपि अथवा परहं जि बहुवचनं परेभ्योपि सकाशादतिशयेन परः परतरः । पुनरपि कथंभूतो । ज्ञानमयः केवलज्ञानेन निर्वृत्तः **सो बुच्चइ परलोउ** स एवं गुणविशिष्टः शुद्धात्मा परलोक इत्युच्यते इति । पर उत्कृष्टो वीतरागचिदानंदैकस्वभाव आत्मा तस्य लोकोऽवलोकनं निर्विकल्पसमाधौ वानुभवनमिति परलोकशब्दस्यार्थः अथवा लोक्यंते दृश्यंते जीवादिपदार्था यस्मिन् परमात्मस्वरूपे यस्य केवलज्ञानेन वा स भवति लोकः परश्चासौ लोकश्च परलोकः व्यवहारेण पुनः स्वर्गापवर्गलक्षणः परलोको भण्यते । अत्र योसौ परलोकशब्दवाच्यः परमात्मा स एवोपादेय इति तात्पर्यार्थः ॥ १११ ॥ अथ ।

सो पर वुच्चइ लोउ परु, जसु मइ तित्थु वसेइ ।
जहिं मइ तहिं गइ जीवहं जि, णियमें जेण हवेइ ॥ ११२ ॥

सः परः उच्यते लोकः परः यस्य मतिः तत्र वसति ।
यत्र मतिः तत्र गतिः जीवस्य एव नियमेन येन भवति ॥ ११२ ॥

सो पर वुच्चइ लोउ परु स परः नियमेनोच्यते लोको जनः । कथंभूतो भण्यते । पर उत्कृष्टः । स कः । **जसु मइ तित्थु वसेइ** यस्य भव्यजनस्य मतिर्मनश्चित्तं तत्र निजपरमात्मस्वरूपे वसति विषयकषायविकल्पजालत्यागेन स्वसंवेदनसंवित्तिस्वरूपेण स्थिरीभवतीति । यस्य परमात्मतत्त्वे मतिस्तिष्ठति स कस्मात्परो भवतीति चेत् **जहिं मइ तहं गइ जीवहं**

[**मनसि**] चित्तमें [**निवसति**] बस रहा है [**सः**] वह [**परस्मात् अपि परतरः**] उत्कृष्टसे भी उत्कृष्ट [**ज्ञानमयः**] ज्ञानमई [**परलोकः**] परलोक [**उच्यते**] कहा जाता है । **भावार्थ**—परलोक शब्दका अर्थ ऐसा है कि पर अर्थात् उत्कृष्ट वीतरागचिदानंद शुद्धस्वभाव आत्मा उसका लोक अर्थात् अवलोकन निर्विकल्पसमाधिमें अनुभवना वह **परलोक** है । अथवा जिसके परमात्मस्वरूपमें या केवलज्ञानमें जीवादिपदार्थ देखे जावें इसलिये उस परमात्माका नाम परलोक है । अथवा व्यवहारनयकर स्वर्ग मोक्षको परलोक कहते हैं । स्वर्ग और मोक्षका कारण भगवानका धर्म है इसलिये केवली भगवानको परलोक कहते हैं । परमात्माके समान अपना निज आत्मा है वही परलोक है वोही उपादेय है ॥ १११ ॥

आगे ऐसा कहते हैं जिसका मन निजआत्मामें बस रहा है वही ज्ञानी जीव परलोक है;—[**यस्य मतिः**] जिस भव्यजीवकी बुद्धि [**तत्र**] उस निज आत्मस्वरूपमें [**वसति**] बस रही है अर्थात् विषयकषायविकल्पजालके त्यागसे स्वसंवेदन—ज्ञानस्वरूपकर स्थिर हो रही है [**सः**] वह पुरुष [**परः**] निश्चयकर [**परः लोकः**] उत्कृष्ट जन [**उच्यते**] कहा जाता है । अर्थात् जिसकी बुद्धि निजस्वरूपमें ठहर रही है वही उत्तम जन है

जि णियमिं जेण हवेइ येन कारणेन यत्र स्वशुद्धात्मस्वरूपे मतिस्तत्रैव गतिः । कस्यैव । जीवस्यैव अथवा बहुवचनपक्षे जीवानामेव निश्चयेन भवतीति । अयमत्र भावार्थः । यद्यार्त-रौद्राधीनतया स्वशुद्धात्मभावनाच्युतो भूत्वा परभावेन परिणमति तदा दीर्घसंसारी भवति, यदि पुनर्निश्चयरत्नत्रयात्मके परमात्मतत्त्वे भावनां करोति तर्हि निर्वाणं प्राप्नोति इति ज्ञात्वा सर्वरागादिविकल्पत्यागेन तत्रैव भावना कर्तव्येति ॥ ११२ ॥ अथ ।

जहिं मइ तहिं गइ जीव तुहुं, मरणुवि जेण लहेहि ।
तें परवंभु मुएवि मइं, मा पर दव्वि करेहि ॥ ११३ ॥

यत्र मतिः तत्र गतिः जीव त्वं मृत्वा येन लभसे ।
तेन परब्रह्म मुक्त्वा मतिं मा परद्रव्ये कार्षीः ॥ ११३ ॥

जहिं मइ तहिं गइ जीव तुहुं मरणुवि जेण लहेहि यत्र मतिस्तत्र गतिः हे जीव त्वं मरणेन कृत्वा येन कारणेन लभसे **तें परवंभु मुएवि मइ मा परदव्वि करेहि** तेन कारणेन परमब्रह्मशब्दवाच्यं शुद्धद्रव्यार्थिकनयेन टंकोत्कीर्णज्ञायकैकस्वभावं वीतरागसदानंदैकसुखामृतरसपरिणतं निजशुद्धात्मतत्त्वं मुक्त्वा मतिं चित्तं मा परद्रव्ये देहसंगादिषु मा कार्षीरिति तात्पर्यार्थः ॥ ११३ ॥ एवं सूत्रचतुष्टयेनांतरस्थले परलोकशब्दव्युत्पत्त्या परलोकशब्दवाच्यस्य परमात्मनो व्याख्यानं गतं ।

[**येन**] क्योंकि [**यत्र मतिः**] जैसी बुद्धि होती है [**तत्र**] वैसी [**एव**] ही [**जीवस्य**] जीवकी [**गतिः**] गति [**नियमेन**] निश्चयकर [**भवति**] होती है ऐसा जिनवरदेवने कहा है । अर्थात् शुद्धात्मस्वरूपमें जिस जीवकी बुद्धि होवे उसको वैसी ही गति होती है जिन जीवोंका मन निजवस्तुमें है उनको निजपदकी प्राप्ति होती है इसमें संदेह नहीं है ॥ **भावार्थ**—जो आर्तध्यान रौद्रध्यानकी आधीनतासे अपने शुद्धात्मकी भावनासे रहित हुआ रागादिक परभावोंस्वरूप परिणमन करता है तो वह दीर्घसंसारी होता है और जो निश्चयरत्नत्रयस्वरूप परमात्मतत्त्वमें भावना करता है तो मोक्ष ही पाता है । ऐसा जानकर सब रागादि विकल्पोंको त्याग उस परमात्मतत्त्वमें ही भावना करनी चाहिये ॥ ११२ ॥

आगे फिर भी इसी बातको दृढ करते हैं;—[**हे जीव**] हे जीव [**यत्र मतिः**] जहां तेरी बुद्धि है [**तत्र गतिः**] वहींपर गति है उसको [**येन**] जिस कारणसे [**त्वं मृत्वा**] तू मरकर [**लभसे**] पावैगा [**तेन**] इसलिये तू [**परब्रह्म**] परम ब्रह्मको [**मुक्त्वा**] छोडकर [**परद्रव्ये**] परद्रव्यमें [**मतिं**] बुद्धिको [**मा कार्षीः**] मत करै ॥ **भावार्थ**—शुद्धद्रव्यार्थिकनयकर टांकीकासा गढा हुआ अघटितघाट, अमूर्तीक पदार्थ ज्ञायकमात्र स्वभाव, वीतराग सदा आनंदरूप अद्वितीय अतींद्रिय सुखरूप अमृतके रसकर तृप्त, ऐसे

तदनंतरं किं तत् परद्रव्यमिति प्रश्ने प्रत्युत्तरं ददाति;—

जं णियदव्वहं भिण्णु जडु, तं परदव्वु वियाणि ।
पुग्गलु धम्माधम्मु णहु, कालुवि पंचमु जाणि ॥ ११४ ॥

यत् निजद्रव्यात् भिन्नं जडं तत् परद्रव्यं जानीहि ।
पुद्गलः धर्माधर्मः नभः कालं अपि पंचमं जानीहि ॥ ११४ ॥

जमित्यादि पदखंडनारूपेण व्याख्यानं क्रियते **जं** यत् **णियदव्वहं** निजद्रव्यात् **भिण्णु** भिन्नं पृथग्भूतं **जडु** जडं **तं** तत् **परदव्वु वियाणि** परद्रव्यं जानीहि । तच्च किं । **पुग्गलु धम्माहम्मु णहु** पुद्गलधर्माधर्मनभोरूपं **कालुवि** कालमपि **पंचमु जाणि** पंचमं जानीहीति । अनंतचतुष्टयस्वरूपान्निजद्रव्याद्बाह्यं भावकर्मद्रव्यकर्मनोकर्मरूपं जीवसंबंधं शेषं पुद्गलादि-पंचभेदं यत्सर्वं तद्ज्ञेयमिति ॥ ११४ ॥

अथ वीतरागनिर्विकल्पसमाधिरंतर्मुहूर्तेनापि कर्मजालं दहतीति ध्यानसामर्थ्यं दर्शयति;—

जइ णिविसद्धुवि कुवि करइ, परमप्पइ अणुराउ ।
अग्गिकणी जिम कट्ठगिरि, डहइ असेसुवि पाउ ॥ ११५ ॥

यदि निमिषार्धमपि कोपि करोति परमात्मनि अनुरागं ।
अग्निकणिका यथा काष्ठगिरिं दहति अशेषमपि पापं ॥ ११५ ॥

निजशुद्धात्मतत्त्वको छोड़कर द्रव्यकर्म भावकर्म नोकर्ममें या देहादि परिग्रहमें मनको मत लगा ॥ ११३ ॥

इसप्रकार पहले महाधिकारमें चार दोहासूत्रोंकर अंतरस्थलमें परलोक शब्दका अर्थ परमात्मा किया । आगे परलोक (परमात्मा) में ही मन लगा परद्रव्यसे ममता छोड ऐसा कहा गया था उसमें शिष्यने प्रश्न किया कि परद्रव्य क्या है उसका समाधान श्रीगुरु कहते हैं;—[**यत्**] जो [**निजद्रव्यात्**] आत्मपदार्थसे [**भिन्नं**] जुदा [**जडं**] जड पदार्थ है [**तत्**] उसे [**परद्रव्यं**] परद्रव्य [**जानीहि**] जानो । और वह परद्रव्य [**पुद्गलः धर्माधर्मः नभः कालं अपि पंचमं**] पुद्गल धर्म अधर्म आकाश और पांचवा कालद्रव्य [**जानीहि**] ये सब परद्रव्य जानो । **भावार्थ**—द्रव्य छह हैं उनमेंसे पांच जड और जीवको चैतन्य जानो । पुद्गल धर्म अधर्म काल आकाश ये सब जड हैं इनको अपनेसे जुदे जानो और जीव भी अनंत हैं उन सबोंको अपनेसे भिन्न जानो । अनंत चतुष्टय स्वरूप अपना आत्मा है उसीको निज (अपना) जान । और जीवके भावकर्म-रूप रागादिक तथा द्रव्यकर्म ज्ञानावरणादि आठकर्म, और शरीरादिक नोकर्म इनका संबंध अनादिसे है परंतु जीवसे भिन्न हैं इसलिये अपने मत मानें । पुद्गलादि पांच भेद जडपदार्थ सब हेय जान अपना, स्वरूप ही उपादेय है उसीको आराधन कर ॥ ११४ ॥

जइ इत्यादि । **जइ णिविसद्धुवि** यदि निमिषार्धमपि **कुवि करइ** कोपि कश्चित् करोति । किं करोति । **परमप्पइ अणुराउ** परमात्मन्यनुरागं । तदा किं करोति । **अग्गि-कणी जिम्व कट्ठगिरि** अग्निकणिका यथा काष्ठगिरिं दहति तथा **डहइ असेसुवि पाउ** दहत्य-शेषं पापमिति । तथाहि—शुद्धिगौरवरसगौरवकवित्ववादित्वगमकत्ववाग्मित्वचतुर्विधशब्दगौ-रवस्वरूपप्रभृतिसमस्तविकल्पजालत्यागरूपेण महावातेन प्रज्वलिता निजशुद्धात्मतत्त्वध्याना-ग्निकणिका स्तोकाग्निर्केधनराशिमिवांतर्मुहूर्तेनापि चिरसंचितकर्मराशिं दहतीति । अत्रैवंविधं शुद्धात्मध्यानसामर्थ्यं ज्ञात्वा तदेव निरंतरं भावनीयमिति भावार्थः ॥ ११५ ॥

अथ हे जीव चिंताजालं मुक्त्वा शुद्धात्मस्वरूपं निरंतरं पश्येति निरूपयति;—

मिल्लिवि सयल अवक्खडी, जिय णिचिंतउ होइ ।
चित्तु णिवेसहि परमपइ, देउ णिरंजणु जोइ ॥ ११६ ॥

मुक्त्वा सकलां चिंतां जीव निश्चिंतः भूत्वा ।
चित्तं निवेशय परमपदे देवं निरंजनं पश्य ॥ ११६ ॥

मिल्लिवि इत्यादि । **मिल्लिवि** मुक्त्वा **सयल** समस्तं **अवक्खडी** देशभाषया चिंता **जिय** हे जीव **णिचिंतउ होइ** निश्चिंतो भूत्वा । किं कुरु । **चित्तु णिवेसहि** चित्तं निवेशय

आगे एक अंतमुहूर्तमें कर्म जालको वीतरागनिर्विकल्पसमाधिरूप अग्नि भस्म करडालती है ऐसी समाधिकी सामर्थ्य है वोही दिखाते हैं;—[**यदि**] जो [**निमिषार्धमपि**] आधेनिमेषमात्र भी [**कोपि**] कोई [**परमात्मनि**] परमात्मामें [**अनुरागं**] प्रीतिको [**करोति**] करै तो [**यथा**] जैसे [**अग्निकणिका**] अग्निकी कणी [**काष्ठगिरिं**] काठके पहाड़को [**दहति**] भस्म करती है उसीतरह [**अशेषं अपि पापं**] सब ही पापोंको भस्म कर डालै ॥ **भावार्थ**—ऋद्धिका गर्व रसायनका गर्व अर्थात् पारावगैरः आदि धातु-ओंके भस्म करनेका मद अथवा नौ रसके जाननेका गर्व, कविकलाका मद, वादमें जीतनेका मद, शास्त्रकी टीका वनानेका मद, शास्त्रके व्याख्यान करनेका मद ये चार तरहका शब्द गौरव स्वरूप इत्यादि अनेक विकल्पजालोंका त्यागरूप प्रचंड पवन उसकरके प्रज्वलित हुई (दहकतीहुई) जो निजशुद्धात्मतत्त्वके ध्यानरूप अग्निकी कणी है वह जैसे अग्निकी कणी काठके पर्वतको भस्म करदेती है उसीतरह समस्त पापोंको भस्म कर डालती है अर्थात् जन्म जन्मके इकट्ठे किये हुए कर्मोंको आधे निमेषमें नष्ट कर देती है ऐसी शुद्ध आत्मध्यानकी सामर्थ्य जानकर उसी ध्यानकी ही भावना हमेशा करनी चाहिये ॥ ११५ ॥

आगे हे जीव चिंताओंको छोड़कर शुद्धात्मस्वरूपको निरंतर देख ऐसा कहते हैं;—[**हे जीव**] हे जीव [**सकलां**] समस्त [**चिंतां**] चिंताओंको [**मुक्त्वा**] छोडकर

धारय । क । **परमपए** निजपरमात्मपदे । पश्चात् किं कुरु । **देउ णिरंजणु जोइ** देवं निरंजनं पश्येति । तद्यथा । हे जीव दृष्टश्रुतानुभूतभोगाकांक्षास्वरूपापध्यानादि—समस्तचिंताजालं मुक्त्वा निश्चिंतो भूत्वा चित्तं परमात्मस्वरूपे स्थिरं कुरु, तदनंतरं भावकर्मद्रव्यकर्मनोकर्माजनरहितं देवं परमाराध्यं निजशुद्धात्मानं ध्यायेति भावार्थः । अपध्यानलक्षणं कथ्यते "बंधबधच्छेदादेर्द्वेषाद्रागाच्च परकलत्रादेः । आध्यानमपध्यानं शासति जिनशासने विशदाः" ॥ ११६ ॥

अथ शिवशब्दवाच्ये निजशुद्धात्मनि ध्याते यत्सुखं भवति तत्सूत्रत्रयेण प्रतिपादयति;—

जं सिवदंसणि परमसुहु, पावहि झाणु करंतु ।
तं सुहु भुवणिवि अत्थि णवि, मेल्लिवि देउ अणंतु ॥ ११७ ॥

यत् शिवदर्शने परमसुखं प्राप्नोषि ध्यानं कुर्वन् ।
तत् सुखं भुवनेपि अस्ति नैव मुक्त्वा देवं अनंतं ॥ ११७ ॥

जमित्यादि पदखंडनारूपेण व्याख्यानं क्रियते—**जं** यत् **सिवदंसणि** स्वशुद्धात्मदर्शने **परमसुहु** परमसुखं **पावहि** प्राप्नोषि हे प्रभाकरभट्ट । किं कुर्वन् सन् । **झाणु करंतु** ध्यानं कुर्वन् सन् **तं सुहु** तत्पूर्वोक्तसुखं **भुवणिवि** भुवनेपि **अत्थि णवि** अस्ति नैव । किं कृत्वा । **मिल्लिवि** मुक्त्वा । कं । **देउ** देवं । कथंभूतं । **अणंतु** अनंतशब्दवाच्यपरमात्मपदार्थमिति ।

[**निश्चितः भूत्वा**] निश्चित होकर तू [**चित्तं**] अपने मनको [**परमपदे**] परमपदमें [**निवेशय**] धारण कर और [**निरंजनं देवं**] निरंजनदेवको [**पश्य**] देख । **भावार्थ**—हे हंस (जीव) देखे सुने और भोगे हुए भोगोंकी वांछारूप खोटेध्यान आदि सब चिंताओंको छोडकर अत्यंत निश्चित होकर अपने चित्तको परमात्मस्वरूपमें स्थिर कर । उसके बाद भावकर्म द्रव्यकर्म नोकर्मरूप अंजनसे रहित जो निरंजनदेव परम आराधने योग्य अपना शुद्धात्मा है उसको ध्यावो । पहले यह कहा था कि खोटे ध्यानको छोड, सो खोटे ध्यानका नाम शास्त्रमें अपध्यान कहा है । वह अपध्यानका लक्षण कहते हैं । "बध बंधेत्यादि" उसका अर्थ ऐसा है कि निर्मल बुद्धिवाले पुरुष जिन शासनमें उसको अपध्यान कहते हैं कि जो द्वेषसे परके मारनेका बांधनेका अथवा छेदनेका चिंतवन करै और रागभावसे परस्त्री आदिका चिंतवन करै । उस अपध्यानके दो भेद हैं एक आर्त दूसरा रौद्र । सो ये दोनों ही नरक निगोदके कारण हैं इसलिये विवेकियोंको त्यागने योग्य हैं ॥ ११६ ॥

आगे शिव शब्दसे कहे गये निजशुद्धआत्माके ध्यान करनेपर जो सुख होता है उस सुखको तीन दोहासूत्रोंसे वर्णन करते हैं;—[**यत्**] जो [**ध्यानं कुर्वन्**] ध्यान करता हुआ [**शिवदर्शने परमसुखं**] निजशुद्धात्माके अवलोकनमें अत्यंत सुख [**प्राप्नोषि**]

तथाहि—शिवशब्देनात्र विशुद्धो ज्ञानस्वभावो निजशुद्धात्मा ज्ञातव्यः तस्य दर्शनमवलोकनमनुभवनं तस्मिन् शिवदर्शनेन परमसुखं निजशुद्धात्मभावनोत्पन्नवीतरागपरमाह्लादरूपं लभसे । किं कुर्वन् सन् । वीतरागनिर्विकल्पत्रिगुप्तिसमाधिं कुर्वन् । इत्थंभूतं सुखं अनंतशब्दवाच्यो योसौ परमात्मपदार्थस्तं मुक्त्वा त्रिभुवनेपि नास्तीति । अयमत्रार्थः । शिवशब्दवाच्यो योसौ निजपरमात्मा स एव रागद्वेषमोहपरिहारेण ध्यातः सन्ननाकुलत्वलक्षणं परमसुखं ददाति नान्य कोपि शिवनामेति पुरुषः ॥ ११७ ॥ अथ ।

जं मुणि लहइ अणंतसुहु, णियअप्पा झायंतु ।
तं सुहु इंदुवि णवि लहइ, देविहिं कोडि रमंतु ॥ ११८ ॥

यत् मुनिः लभते अनंतसुखं निजात्मानं ध्यायन् ।
तत् सुखं इंद्रोपि नैव लभते देवीनां कोटिं रम्यमानः ॥ ११८ ॥

जमित्यादि । **जं** यत् **मुणि** मुनिस्तपोधनः **लहइ** लभते **अणंतसुहु** अनंतसुखं । किं कुर्वन सन । **णियअप्पा झायंतु** निजात्मानं ध्यायन सन **तं सुहु** तत्पूर्वोक्तं सुखं **इंदुवि णवि लहइ** इंद्रोपि नैव लभते । किं कुर्वन सन् । **देविहिं कोडि रमंतु** देवीनां कोटिं

हे प्रभाकर तू पासकता है [**तत् सुखं**] वह सुख [**भुवने अपि**]तीनलोकमें भी [**अनंतं देवं मुक्त्वा**] परमात्म द्रव्यके सिवाय [**नैव अस्ति**] नहीं है ॥ **भावार्थ**—शिव नाम कल्याणका है सो कल्याणरूप ज्ञानस्वभाव निजशुद्धात्मा जानो उसका जो दर्शन अर्थात् अनुभव उसमें सुख होता है वह सुख परमात्माको छोड तीनलोकमें नहीं है । वह सुख क्या है कि जो निर्विकल्प वीतराग परम आनंदरूप शुद्धात्मभाव है । वही सुखी है । क्या करता हुआ यह सुख पाता है कि तीनगुप्तिरूप परमसमाधिमें आरूढ हुआ संता ध्यानी पुरुष ही उस सुखको पाता है । अनंत गुणरूप आत्मतत्त्वके विना वह सुख तीनों लोकके स्वामी इंद्रादिकों भी नहीं है । इसकारण सारांश यह निकला कि शिव नामवाला जो निज शुद्धात्मा है वही राग द्वेष मोहके त्यागकर ध्यान किया गया आकुलतारहित परमसुखको देता है । संसारी जीवोंके जो इंद्रियजनित सुख है वह आकुलता रूप है और आत्मीक अतींद्रियसुख आकुलता रहित है सो सुख ध्यानसे ही मिलता है दूसरा कोई शिव या ब्रह्मा या विष्णु नामका पुरुष देनेवाला नहीं है । आत्माका ही नाम शिव है विष्णु है ब्रह्मा है ॥ ११७ ॥

आगे कहते हैं कि जो सुख आत्माको ध्यावनेसे महामुनि पाते हैं वह सुख इंद्रादि देवोंको दुर्लभ है;—[**निजात्मानं ध्यायन्**] अपनी आत्माको ध्यावता [**मुनिः**] परम तपोधन (मुनि) [**यत् अनंतसुखं**] जो अनंतसुख [**लभते**] पाता है [**तत् सुखं**] उस सुखको [**इंद्रः अपि**] इंद्र भी [**देवीनां कोटिं रम्यमानः**] करोड़ देवियोंके साथ

रम्यमानः अनुभवन्निति । अयमत्र तात्पर्यार्थः । बाह्याभ्यंतरपरिग्रहरहितः स्वशुद्धात्मतत्त्व-भावनोत्पन्नवीतरागपरमानंदसहितो मुनिर्यत्सुखं लभते तद्देवेन्द्रादयोपि न लभंत इति । तथा चोक्तं । "दह्यमाने जगत्यस्मिन्महता मोहवह्निना । विमुक्तविषयासंगाः सुखायंते तपोधनाः ॥ ११८ ॥

अप्पादंसणि जिणवरहं, जं सुहु होइ अणंतु ।
तं सुहु लहइ विराउ जिउ, जाणंतउ सिउ संतु ॥ ११९ ॥

आत्मदर्शने जिनवराणां यत् सुखं भवति अनंतं ।
तत् सुखं लभते विरागः जीवः जानन् शिवं शांतं ॥ ११९ ॥

अप्पा इत्यादि । **अप्पादंसणि** निजशुद्धात्मदर्शने **जिणवरहं** छद्मस्थावस्थायां जिनवराणां **जं सुहु होइ अणंतु** यत्सुखं भवत्यनंतं **तं सुहु** तत्पूर्वोक्तसुखं **लहइ** लभते । कोसौ । **विराउ जिउ** वीतरागभावनापरिणतो जीवः । किं कुर्वन् सन् । **जाणंतउ** जानन्ननुभवन् सन् । कं । **सिउ** शिवशब्दवाच्यं निजशुद्धात्मस्वभावं । कथंभूतं । **संतु** शांतं रागादि-विभावरहितमिति । अयमत्र भावार्थः । दीक्षाकाले शिवशब्दवाच्यस्वशुद्धात्मानुभवने यत्सुखं भवति जिनवराणां वीतरागनिर्विकल्पसमाधिरतो जीवस्तत्सुखं लभत इति ॥ ११९॥

रमता हुआ [**नैव**] नहीं [**लभते**] पाता ॥ **भावार्थ**—बाह्य और अंतरंग परिग्रहसे रहित निज शुद्धात्माकी भावनासे उत्पन्न हुआ जो वीतराग परमानंद उसकर सहित महा-मुनि जो सुख पाता है उस सुखको इंद्रादिक भी नहीं पाते । जगतमें सुखी साधु ही हैं अन्य कोई नहीं । यही कथन अन्यशास्त्रोंमें भी कहा है—"दह्यमाने इत्यादि" इसका अर्थ ऐसा है कि महामोहरूपी अग्निसे जलते हुए इस जगतमें देव मनुष्य तिर्यंच नारकी सब दुःखी हैं और जिनके तप ही धन है तथा सब विषयोंका संबंध जिन्होंने छोड दिया है ऐसे साधु मुनि ही इस जगतमें सुखी हैं ॥ ११८ ॥

आगे ऐसा कहते हैं कि वैरागी मुनि ही निज आत्माको जानते हुए निर्विकल्प सुखको पाते हैं;—[**आत्मदर्शने**] निजशुद्धात्माके दर्शनमें [**यत् अनंतं सुखं**] जो अनंत अद्भुत सुख [**जिनवराणां**] मुनि अवस्थामें जिनेश्वर देवोंके [**भवति**] होता है [**तत् सुखं**] वह सुख [**विरागः जीवः**] वीतराग भावनाको परिणत हुआ मुनिराज [**शिवं शांतं जानन्**] निज शुद्धात्मस्वभावको तथा रागादिरहित शांत भावको जानता हुआ [**लभते**] पाता है । **भावार्थ**—दीक्षाके समय तीर्थंकरदेव निज शुद्ध आत्माको अनुभवते हुए जो निर्विकल्प सुख पाते हैं वही सुख रागादिरहित निर्विकल्प समाधिमें लीन विरक्त मुनि पाते हैं ॥ ११९ ॥

अथ कामक्रोधादिपरिहारेण शिवशब्दवाच्यः परमात्मा दृश्यत इत्यभिप्रायं मनसि संप्रधार्य सूत्रमिदं कथयंति;—

जोइय णियमणि णिम्मलए, पर दीसइ सिउ संतु ।
अंबरि णिम्मलि घणरहिए, भाणु जि जेम फुरंतु ॥ १२० ॥

योगिन् निजमनसि निर्मले परं दृश्यते शिवः शांतः ।
अंबरे निर्मले घनरहिते भानुः इव यथा स्फुरन् ॥ १२० ॥

जोइय इत्यादि । **जोइय** हे योगिन् **णियमणि** निजमनसि । कथंभूते । **णिम्मलए** निर्मले परं नियमेन **दीसइ** दृश्यते । कोसौ । कर्मतापन्नः **सिउ** शिवशब्दवाच्यो निजपरमात्मा । कथंभूतः । **संतु** शांतः रागादिरहितः । दृष्टांतमाह । अंबरे आकाशे । कथंभूते । **णिम्मलि** निर्मले । पुनरपि कथंभूते । **घणरहिए** घनरहिते । क इव । **भाणु जि** भानुरिव यथा । किं कुर्वन् । **फुरंतु** स्फुरन् प्रकाशमान इति । अयमत्र तात्पर्यार्थः । यथा घनघटाटोपविघटने सति निर्मलाकाशे दिनकरः प्रकाशते तथा शुद्धात्मानुभूतिप्रतिपक्षभूतानां कामक्रोधादिविकल्परूपघनानां विनाशे सति निर्मलचित्ताकाशे केवलज्ञानाद्यनंतगुणकरकलितः निजशुद्धात्मादित्यः प्रकाशं करोतीति ॥ १२० ॥

अथ यथा मलिने दर्पणे रूपं न दृश्यते तथा रागादिमलिनचित्ते शुद्धात्मस्वरूपं न दृश्यत इति निरूपयति;—

राएं रंगिए हियवडए, देउ ण दीसइ संतु ।
दप्पणि मइलइ बिंबु जिम, एहउ जाणि णिभंतु ॥ १२१ ॥

रागेन रंजिते हृदये देवः न दृश्यते शांतः ।
दर्पणे मलिने बिंबं यथा एतत् जानीहि निर्भ्रांतं ॥ १२१ ॥

आगे काम क्रोधादिकके त्यागनेसे शिव शब्दसे कहा गया परमात्मा दीख जाता है ऐसा अभिप्राय मनमें रखकर यह गाथासूत्र कहते हैं;—[**योगिन्**] हे योगी [**निर्मले निजमनसि**] निर्मल अपने मनमें [**शिवः शांतः**] निज परमात्मा रागादि रहित [**परं**] नियमसे [**दृश्यते**] दीखता है [**यथा**] जैसे [**घनरहिते निर्मले**] बादल रहित निर्मल [**अंबरे**] आकाशमें [**स्फुरन्**] भासमान (प्रकाशमान) [**भानुः इव**] सूर्यके समान । **भावार्थ**—जैसे मेघमालाके आडंबरसे सूर्य नहीं भासता और मेघके आडंबरके दूर होनेपर निर्मल आकाशमें सूर्य प्रगट दीखता है उसी तरह शुद्धआत्माकी अनुभूतिके शत्रु जो कामक्रोधादि विकल्परूप मेघ हैं उनके नाश होनेपर निर्मल मनरूपी आकाशमें केवलज्ञानादि अनंतगुणरूप किरणोंकर सहित निज शुद्धात्मारूपी सूर्य प्रकाश करता है ॥ १२० ॥

आगे जैसे मैले दर्पणमें रूप नहीं दीखता उसीतरह रागादिकर मलिन चित्तमें शुद्ध

राएं इत्यादि । **राएं रंगिए हियवडए** रागेन रंजिते हृदये **देउ ण दीसइ** देवो न दृश्यते । किं विशिष्टः । **संतु** शांतो रागादिरहितः । दृष्टांतमाह । **दप्पणि मइलए** दर्पणे मलिने **विंबु जिम** विंबं यथा **एहउ** एतत् जानीहि हे प्रभाकरभट्ट **णिभंतु** निर्भ्रांतं यथा भवतीति । अयमत्रामिप्रायः । यथा मेघपटलप्रच्छादितो विद्यमानोपि सहस्रकरो न दृश्यते तथा केवलज्ञानकिरणैर्लोकालोकप्रकाशकोपि कामक्रोधादिविकल्पमेघप्रच्छादितः सन् देह-मध्ये शक्तिरूपेण विद्यमानोपि निजशुद्धात्मा दिनकरो न दृश्यते इति ॥ १२१ ॥

अथानंतरं विषयासक्तानां परमात्मा न दृश्यत इति दर्शयति;—

जसु हरिणच्छी हियवडए, तसु णवि बंभु वियारि ।
एक्कहिं केम समंति वढ, बे खंडा पडियारि ॥ १२२ ॥

यस्य हरिणाक्षी हृदये तस्य नैव ब्रह्म विचारय ।
एकस्मिन् कथं समायातौ वत द्वौ खड्गौ प्रतिद्वारे ॥ १२२ ॥

जसु इत्यादि । **जसु** यस्य पुरुषस्य **हरिणच्छी** हरिणाक्षी स्त्री **हियवडए** हृदये वसतीति क्रियाध्याहारः **तसु** तस्य **णवि** नैवास्ति । कोसौ । **बंभु** ब्रह्मशब्दवाच्यो निज-परमात्मा **वियारि** एवं विचारय त्वं हे प्रभाकरभट्ट । अत्रार्थे दृष्टांतमाह । **एक्कहिं केम** एकस्मिन् कथं **समंति** सम्यग्गिमाते सम्यगवकाशं कथं लभंते **वढ** वत **बे खंडा** द्वौ खड्गौ असी । काधिकरणभूते । **पडियारि** प्रतिद्वारे कोशशब्दवाच्ये इति । तथाहि ।

आत्मस्वरूप नहीं दीखता ऐसा कहते हैं;—[**रागेन रंजिते**] रागकरके रंजित [**हृदये**] मनमें [**शांतः देवः**] रागादिरहित आत्मा देव [**न दृश्यते**] नहीं दीखता [**यथा**] जैसे कि [**मलिने दर्पणे**] मैले दर्पणमें [**विंबं**] मुख नहीं भासता [**एतत्**] यह बात हे प्रभाकर भट्ट तू [**निभ्रांतं**] संदेह रहित [**जानीहि**] जान । **भावार्थ**—ऐसा श्री योगींद्राचार्यने उपदेश दिया है कि जैसे सहस्र किरणोंसे शोभित सूर्य आकाशमें प्रत्यक्ष दीखता है लेकिन मेघसमूहकर ढका हुआ नहीं दीखता उसीतरह केवलज्ञानादि अनंत गुणरूप किरणोंकर लोक अलोकका प्रकाशनेवाला भी इस देह (घट) के बीचमें शक्ति-रूपसे विद्यमान निज शुद्धात्मारूप (परमजोति चिद्रूप) सूर्य काम क्रोधादि रागद्वेषभा-वोंस्वरूप विकल्प जालोंरूप मेघसे ढंका हुआ नहीं दीखता ॥ १२१ ॥

आगे जो विषयोंमें लीन हैं उनको परमात्माका दर्शन नहीं होता ऐसा दिखलाते हैं;— [**यस्य हृदये**] जिस पुरुषके चित्तमें [**हरिणाक्षी**] मृगके समान नेत्रवाली स्त्री [**वसति**] [**वसति**] वस रही है [**तस्य**] उसके [**ब्रह्म**] अपना शुद्धात्मा [**नैव**] नहीं है अर्थात् उसके शुद्धात्माका विचार नहीं होता ऐसा हे प्रभाकरभट्ट तू अपने मनमें [**विचारय**] विचार कर । जसे [**वैत**] खेदकी बात है कि [**एकस्मिन्**] एक [**प्रतिद्वारे**] म्यानमें

वीतरागनिर्विकल्पपरमसमाधिसंजातानाकुलत्वलक्षणपरमानंदसुखामृतप्रतिबंधकैराकुलत्वोत्पादकैः स्त्रीरूपावलोकनचिंतादिसमुत्पन्नहावभावविभ्रमविलासविकल्पजालैर्मूर्छिते वासिते रंजिते परिणते चित्ते त्वेकस्मिन् प्रतिहारे खड्गद्वयवत्परमब्रह्मशब्दवाच्यनिजशुद्धात्मा कथमवकाशं लभते न कथमपीति भावार्थः । हावभावविभ्रमविलासलक्षणं कथ्यते । "हावो मुखविकारः स्याद्भावश्चित्तोत्थ उच्यते। विलासो नेत्रजो ज्ञेयो विभ्रमो भ्रूयुगांतयोः"॥१२२॥

अथ रागादिरहिते निजमनसि परमात्मा निवसतीति दर्शयति;—

णियमणि णिम्मलि णाणियहं, णिवसइ देउ अणाइ ।
हंसा सरवरि लीणु जिम, महु एहउ पडिहाइ ॥ १२३ ॥

निजमनसि निर्मले ज्ञानिनां निवसति देवः अनादिः ।
हंसः सरोवरे लीनः यथा मम एवं प्रतिभाति ॥ १२३ ॥

णियमणि इत्यादि । **णियमणि** निजमनसि । किं विशिष्टे । **णिम्मलि** निर्मले रागादिमलरहिते । केषां मनसि । **णाणियहं** ज्ञानिनां **णिवसइ** निवसति । कोसौ । **देउ** देवः आराध्यः । किंविशिष्टः । **अणाइ** अनादिः । क इव कुत्र । **हंसा सरवरि लीणु जिम** हंसः सरोवरे लीनो यथा हे प्रभाकरभट्ट **महु एहउ पडिहाइ** ममैवं प्रतिभातीति ।

[**द्वौ खड्गौ**] दो तलवारें [**कथं समायातौ**] कैसे आसकतीं हैं कभी नहीं समासकतीं ॥ **भावार्थ**—वीतराग निर्विकल्प परम समाधिकर उत्पन्न हुआ अनाकुलतारूप परम आनंद अतींद्रिय सुखरूप अमृत है उसके रोकनेवाले तथा आकुलताको उत्पन्न करनेवाले जो स्त्रीरूपके देखनेकी अभिलाषादिसे उत्पन्न हुए हाव (मुखविकार) भाव अर्थात् चित्तका विकार विभ्रम अर्थात् भौंहका टेढा करना, विलास अर्थात् नेत्रोंके कटाक्ष इन स्वरूप विकल्प जालोंकर मूर्छित रंजित परिणत चित्तमें ब्रह्मका (निजशुद्धात्माका) रहना कैसे हो सकता है । जैसे कि एक म्यानमें दो तलवार कैसे आसकती हैं नहीं आसकतीं । उसी तरह एक चित्तमें ब्रह्मविद्या और विषयविनोद ये दोनों नहीं समासकते । जहां ब्रह्म विचार है वहां विषयविकार नहीं है, जहां विषयविकार है वहां ब्रह्मविचार नहीं है । इन दोनोंमें आपसमें विरोध है । हाव भाव विभ्रम विलास इन चारोंका लक्षण दूसरी जगह भी कहा है । "हावो मुखविकारः" इत्यादि, उसका अर्थ ऊपर कह चुके हैं इससे दूसरी बार नहीं कहा ॥ १२२ ॥

आगे रागादि रहित निज मनमें परमात्मा निवास करता है ऐसा दिखाते हैं;— [**ज्ञानिनां**] ज्ञानियोंके [**निर्मले**] रागादिमलरहित [**निजमनसि**] निज मनमें [**अनादिः देवः**] अनादि देव आराधने योग्य शुद्धात्मा [**निवसति**] निवास कररहा है [**यथा**] जैसे [**सरोवरे**] मानसरोवरमें [**लीनः हंसः**] लीन हुआ हंस वसता है ।

तथाहि । पूर्वसूत्रकथितेन चित्ताकुलोत्पादकेन स्त्रीरूपावलोकनसेवनचिंतादिसमुत्पन्नेन रागादिकल्लोलमालाजालेन रहिते निजशुद्धात्मद्रव्यसम्यक्श्रद्धानसहजसमुत्पन्नवीतरागपरमसुखसुधारसस्वरूपेण निर्मलनीरेण पूर्णे वीतरागस्वसंवेदनजनितमानससरोवरे परमात्मा लीनस्तिष्ठति । कथंभूतः । निर्मलगुणसादृश्येन हंस इव हंसपक्षि इव । कुत्र प्रसिद्धः । सरोवरे । हंस इवेत्यभिप्रायो भगवतां श्रीयोगींद्रदेवानां ॥ १२३ ॥

उक्तंच;—

देउ ण देउलि णवि सिलए, णवि लिप्पइ णवि चित्ति ।
अखउ णिरंजणु णाणमउ, सिउ संठिउ समचित्ति ॥ १२४ ॥

देवः न देवकुले नैव शिलायां नैव लेपे नैव चित्रे ।
अक्षयः निरंजनः ज्ञानमयः शिवः संस्थितः समचित्ते ॥ १२४ ॥

देउ इत्यादि । **देउ** देवः परमाराध्यः **ण** नास्ति । कस्मिन् कस्मिन् नास्ति । **देउले** देवकुले देवतागृहे **णवि सिलइ** नैव सिलाप्रतिमायां **णवि लिप्पइ** नैव लेपप्रतिमायां **णवि चित्ति** नैव चित्रप्रतिमायां । तर्हि क तिष्ठति । निश्चयेन **अखउ** अक्षयः **णिरंजणु** कर्मांजनरहितः । पुनरपि किं विशिष्टः । **णाणमउ** ज्ञानमयः केवलज्ञानेन निर्वृत्तः **सिउ** शिवशब्दवाच्यो निजपरमात्मा । एवं गुणविशिष्टः परमात्मा देव इति । **संठिउ** संस्थितः

सो हे प्रभाकरभट्ट [**मम**] मुझे [**एवं**] ऐसा [**प्रतिभाति**] मालूम पडता है । ऐसा वचन श्री योगींद्रदेवने प्रभाकरभट्टसे कहा । **भावार्थ**—पहले दोहेमें जो कहा था कि चित्तको आकुलताके उपजानेवाले स्त्रीरूपका देखना सेवन चिंतादिकोंसे उत्पन्न हुए रागादितरंगोंके समूह हैं उनकर रहित निज शुद्धात्म द्रव्यका सम्यक् श्रद्धान स्वाभाविकज्ञान उससे उत्पन्न वीतराग परमसुखरूप अमृतरस उस स्वरूप निर्मलनीरसे भरे हुए ज्ञानियोंके मानसरोवरमें परमात्मादेवरूपी हंस निरंतर रहता है । वह आत्मदेव निर्मलगुणोंकी उज्जलताकर हंस समान है । जैसे हंसोंका निवासस्थान मानसरोवर है वैसे ब्रह्मका निवासस्थान ज्ञानियोंका निर्मलचित्त है । ऐसा श्री योगींद्रदेवका अभिप्राय है ॥ १२३ ॥

आगे इसी बातको दृढ करते हैं;— [**देवः**] आत्मदेव [**देवकुले**] देवालयमें (मंदिरमें) [**न**] नहीं है [**शिलायां नैव**] पाषाणकी प्रतिमामें भी नहीं है [**लेपे नैव**] लेपमें भी नहीं है [**चित्रे नैव**] चित्रामकी मूर्तिमें भी नहीं है । लेप और चित्रामकी मूर्ति लौकिक जन बनाते हैं पंडितजन तो धातुपाषाणकी ही प्रतिमा मानते हैं सो लौकिक दृष्टांतकेलिये दोहामें लेप चित्रामका भी नाम आगया । वह देव किसी जगह नहीं रहता । वह देव [**अक्षयः**] अविनाशी है [**निरंजनः**] कर्मांजनसे रहित है [**ज्ञानमयः**] केवल ज्ञानकर पूर्ण है [**शिवः**] ऐसा निज परमात्मा [**समचित्ते**

समचित्ति समभावे समभावपरिणतमनसि इति । तद्यथा । यद्यपि व्यवहारेण धर्मवर्तना-निमित्तं स्थापनारूपेण पूर्वोक्तगुणलक्षणो देवो देवगृहादौ तिष्ठति तथापि निश्चयेन शत्रुमित्र-सुखदुःखजीवितमरणादिसमतारूपे वीतरागसहजानंदैकरूपपरमात्मतत्त्वसम्यक्श्रद्धानज्ञाना-नुभूतिरूपाभेदरत्नत्रयात्मकसमचित्ते समशब्दवाच्यः परमात्मा तिष्ठतीति भावार्थः ॥ तथा चोक्तं समचित्तपरिणतश्रमणलक्षणं । "समसत्तुबंधुवग्गो समसुहदुक्खो पसंसणिं-दसमो । समलोट्ठु कंचणोवि य जीवियमरणे समो समणो ॥ १२४ ॥ इत्येकत्रिंशत्सूत्रै-श्चूलिकास्थलं गतं ।

अथ स्थलसंख्याबाह्यं प्रक्षेपकद्वयं कथ्यते;—

मणु मिलियउ परमेसरहं, परमेसरु वि मणस्स ।
बीहिवि समरसि हूवाहं, पुज्ज चडावउं कस्स ॥ १२५ ॥

मनः मिलितं, परमेश्वरस्य परमेश्वरः अपि मनसः ।
द्वयोरपि समरसयोः भूतयोः पूजां समारोपयामि कस्य ॥ १२५ ॥

मणु इत्यादि । **मणु** मनो विकल्परूपं **मिलियउ** मिलितं तन्मयं जातं । कस्य संबंधित्वेन । **परमेसरहं** परमेश्वरस्य **परमेसरु वि मणस्स** परमेश्वरोपि मनःसंबंधित्वेन लीनो

संस्थितः] समभावमें तिष्ठरहा है अर्थात् समभावको परिणत हुए साधुओंके मनमें विराज रहा है अन्य जगह नहीं है । **भावार्थ**—यद्यपि व्यवहारनयकर धर्मकी प्रवृत्तिके-लिये स्थापनारूप अरहंतदेव देवालयमें तिष्ठता है धातुपाषाणकी प्रतिमाको देव कहते हैं तौभी निश्चयनयकर शत्रुमित्र सुखदुख जीवितमरण जिसमें समान हैं तथा वीतराग सहजानंदरूप परमात्मतत्त्वका सम्यक् श्रद्धान ज्ञान चारित्ररूप अभेद रत्नत्रयमें लीन ऐसे ज्ञानियोंके सम चित्तमें परमात्मा तिष्ठता है । ऐसाही अन्यजगह भी समचित्तको परिणत हुए मुनियोंका लक्षण कहा है। "समसत्तु" इत्यादि। इसका अर्थ ऐसा है कि जिसके सुख दुख समान हैं, शत्रुमित्र वर्ग समान हैं, प्रशंसा निंदा समान हैं, पत्थर और सोना समान है, और जीवन मरण जिसके समान हैं ऐसा समभावका धारण करनेवाला मुनि होता है । अर्थात् ऐसे समभावके धारक शांतचित्त योगीश्वरोंके चित्तमें चिदानंद देव तिष्ठता है ॥ १२४ ॥

इस प्रकार इकतीस दोहासूत्रोंकर चूलिका स्थल कहा । चूलिका नाम अंतका है सो पहले स्थलका अंत यहांतक हुआ । आगे स्थलकी संख्यासे सिवाय दो प्रक्षेपक दोहा कहते हैं;—[**मनः**] विकल्परूप मन [**परमेश्वरस्य मिलितं**] भगवान् आत्मारामसे मिलगया तन्मई होगया [**परमेश्वरः अपि**] और परमेश्वर भी [**मनसः**] मनसे

जातः **बीहिवि समरसि हूवाहं** एवं द्वयोरपि समरसीभूतयोः **पुज्ज** पूजां **चडावउं** समारोपयामि । **कस्स** कस्य निश्चयनयेन न कस्यापीति । अयमत्र भावार्थः । यद्यपि व्यवहारनयेन गृहस्थावस्थायां विषयकषायदुर्ध्यानवंचनार्थं धर्मवर्धनार्थं च पूजाभिषेकदानादिव्यवहारोस्ति तथापि वीतरागनिर्विकल्पसमाधिरतानां तत्काले बहिरंगव्यापाराभावात् स्वयमेव नास्तीति ॥ १२५ ॥

जेण णिरंजणि मणु धरिउ, विसयकसायहिं जंतु ।
मोक्खहं कारणु एत्तडउ, अण्णु ण तंतु ण मंतु ॥ १२६ ॥

येन निरंजने मनः धृतं विषयकषायेषु गच्छत् ।
मोक्षस्य कारणं एतावदेव अन्यः न तंत्रः न मंत्रः ॥ १२६ ॥

जेण इत्यादि । येन येन पुरुषेण कर्तृभूतेन **णिरंजणि** कर्मांजनरहिते परमात्मनि **मणु** मनः **धरिउ** धृतं । किं कुर्वत् सत् । **विसयकसायहिं जंतु** विषयकषायेषु गच्छत् सत् । विसयकसायहिं तृतीयांतं पदं सप्तम्यंतं कथं जातमिति चेत् । परिहारमाह । प्राकृते क्वचित्कारकव्यभिचारो भवति लिंगव्यभिचारश्च । इदं सर्वत्र ज्ञातव्यं । **मोक्खहं कारणु** मोक्षस्य कारणं **एत्तडउ** एतावदेव । विषयकषायरतचित्तस्य व्यावर्तनेन स्वात्मनि स्थापनं **अण्णु ण** अन्यत् किमपि न मोक्षकारणं । अन्यत् किं । **तंतु** तंत्रं शास्त्रमौषधं वा **मंतु** मंत्राक्षरं चेति । तथाहि । शुद्धात्मतत्त्वभावनाप्रतिकूलेषु विषयकषायेषु गच्छत् सत्

मिलगया तो [**द्वयोः अपि**] दोनोंही को [**समरसी भूतयोः**] समरस (आपसमें एकम एक) होनेपर [**कस्य**] किसको अब मैं [**पूजां समारोपयामि**] पूजा चढाऊं अर्थात् निश्चयनयकर किसीको पूजना सामग्री चढाना नहीं रहा ॥ **भावार्थ**—जबतक मन भगवानसे नहीं मिला था तब तक पूजा करता था और जब मन प्रभूसे मिलगया तब पूजाका प्रयोजन नहीं है । यद्यपि व्यवहारनयकर गृहस्थ अवस्थामें विषायकषायरूप खोटे ध्यानके रोकनेकेलिये और धर्मके बढानेकेलिये पूजा अभिषेक दान आदिक व्यवहार है तौभी वीतरागनिर्विकल्पसमाधिमें लीन हुए योगीश्वरोंको उस समयमें बाह्य व्यापारके अभाव होनेसे स्वयं ही द्रव्यपूजाका प्रसंग नहीं आता भावपूजा ही तन्मई है ॥ १२५ ॥

आगे यही कथन दृढ करते हैं;—[**येन**] जिस पुरुषने [**विषयकषायेषु गच्छत्**] विषयकषायोंमें जाता हुआ [**मनः**] मन [**निरंजने धृतं**] कर्मरूपी अंजनसे रहित भगवानमें रक्खा [**एतावदेव**] येही [**मोक्षस्य कारणं**] मोक्षका कारण है [**अन्यः**] दूसरा कोई भी [**तंत्रःन**] तंत्र नहीं है [**मंत्रःन**] और न मंत्र है । तंत्र नाम शास्त्र व औषधीका है मंत्र नाम मंत्राक्षरोंका है । विषयकषायादि पर पदार्थोंसे मनको रोककर परमात्मामें मनको लगाना यही मोक्षका कारण है । **भावार्थ**—जो कोई निकट संसारी

मनो वीतरागनिर्विकल्पस्वसंवेदनज्ञानबलेन व्यावर्त्य निजशुद्धात्मद्रव्ये स्थापयति यः स एव मोक्षं लभते नान्यो मंत्रतंत्रादिबलिष्ठोपीति भावार्थः ॥ १२६ ॥

एवं **परमात्मप्रकाशवृत्तौ** प्रक्षेपकत्रयं विहाय त्र्यधिकविंशत्युत्तरशतदोहकसूत्रैस्त्रिविधात्मप्रतिपादकनामा **प्रथममहाधिकारः** समाप्तः ॥ १ ॥

जीव शुद्धात्मतत्त्वकी भावनासे उलटे विषयकषायोंमें जाते हुए मनको वीतरागनिर्विकल्प स्वसंवेदन ज्ञानके बलसे पीछे हटाकर निजशुद्धात्मद्रव्यमें स्थापन करता है वही मोक्षको पाता है दूसरा कोई मंत्र तंत्रादिमें चतुर होनेपर भी मोक्ष नहीं पाता ॥ १२६ ॥

इसतरह **परमात्मप्रकाशकी** टीकामें तीन क्षेपकोंके सिवाय एकसौ तेईस दोहासूत्रोंसे बहिरात्मा अंतरात्मा परमात्मारूप तीनप्रकार आत्माको कहनेवाला **पहला महाधिकार** पूर्ण किया ॥ १ ॥



अत ऊर्ध्वं स्थलसंख्याबहिर्भूतान् प्रक्षेपकान् विहाय चतुर्दशाधिकशतद्वयप्रमितैर्दोहकसूत्रैर्मोक्षमोक्षफलमोक्षमार्गप्रतिपादनमुख्यत्वेन द्वितीयमहाधिकारः प्रारभ्यते । तत्रादौ सूत्रदशकपर्यंतं मोक्षमुख्यतया व्याख्यानं करोति । तद्यथा;—

सिरिगुरु अक्खहिं मुक्खु महु, मुक्खहं कारणु तत्थु ।
मोक्खहं केरउ अण्णु फलु, जें जाणउं परमत्थु ॥ १२७ ॥

श्रीगुरो आख्याहि मोक्षं मम मोक्षस्य कारणं तथ्यं ।
मोक्षस्य संबंधि अन्यत् फलं येन जानामि परमार्थं ॥ १२७ ॥

सिरि गुरु इत्यादि । **सिरिगुरु** हे श्रीगुरो योगींद्रदेव **अक्खहिं** कथय **मोक्खु** मोक्षं **महु** मम, न केवलं मोक्षं **मोक्खह कारणु** मोक्षस्य कारणं । कथंभूतं । **तत्थु** तत्थ्यं **मोक्खहं केरउ** मोक्षस्य संबंधि **अण्णु** अन्यत् । किं । **फलु** फलं । एतत्त्रयेन ज्ञातेन किं भवति । **जें जाणउं** येन त्रयस्य व्याख्यानेन जानाम्यहं कर्ता । कं । **परमत्थु** परमार्थमिति । तद्यथा । प्रभाकरभट्टः श्रीयोगींद्रदेवान् विज्ञाप्य मोक्षं मोक्षफलं मोक्षकारणमिति त्रयं पृच्छतीति भावार्थः ॥ १२७ ॥

अथ तदेव त्रयं क्रमेण भगवान् कथयति;—

जोइय मुक्खुवि मोक्खफलु, पुच्छिउ मोक्खहं हेउ ।
सो जिणभासिउ णिसुणि तुहुं जेणवियाणहि भेउ ॥ १२८ ॥

योगिन् मोक्षोपि मोक्षफलं पृष्टं मोक्षस्य हेतुः ।
तत् जिनभाषितं निशृणु त्वं येन विजानासि भेदं ॥ १२८ ॥

जोइय इत्यादि । **जोइय** हे योगिन् **मुक्खुवि** मोक्षोपि **मुक्खफलु** मोक्षफलं **पुच्छिउ**

इसके बाद प्रकरणकी संख्याके बाहर अर्थात् क्षेपकोंके सिवाय दोसौ चौदह दोहासूत्रोंसे मोक्ष मोक्षफल और मोक्षमार्गके कथनकी मुख्यतासे दूसरा महा अधिकार आरंभ करते हैं । उसमें भी पहले दस दोहा तक मोक्षकी मुख्यतासे व्याख्यान करते हैं;— [**हे श्रीगुरो**] हे श्रीगुरु [**मम**] मुझे [**मोक्षं**] मोक्ष [**तथ्यं मोक्षस्य कारणं**] सत्यार्थ मोक्षका कारण [**अन्यत्**] और [**मोक्षस्य संबंधि**] मोक्षका [**फलं**] फल [**आख्याहि**] कृपाकर कहो [**येन**] जिससे कि मैं [**परमार्थं**] परमार्थको [**जानामि**] जानूं ॥ **भावार्थ**—प्रभाकरभट्ट श्रीयोगींद्रदेवसे विनतीकरके मोक्ष, मोक्षका कारण और मोक्षका फल इन तीनोंको पूछता है ॥ १२७ ॥

अब श्रीगुरु उन्हीं तीनोंको क्रमसे कहते हैं;—[**योगिन्**] हे योगी तूने [**मोक्षोपि**] मोक्ष और [**मोक्षफलं**] मोक्षका फल तथा [**मोक्षस्य**] मोक्षका [**हेतुः**] कारण

पृष्टं त्वया कर्तृभूतेन । पुनरपि कः पृष्टः । **मोक्खहं हेउ** मोक्षस्य हेतुः कारणं । तत्त्रयं **जिणभासिउ** जिनभाषितं **णिसुणि** निश्चयेन शृणु समाकर्णय **जेण** येन त्रयेण ज्ञातेन **वियाणहि भेउ** विजानासि भेदं त्रयाणां संबंधिनमिति । अयमत्र तात्पर्यार्थः । श्रीयोगींद्रदेवाः कथयंति हे प्रभाकरभट्ट शुद्धात्मोपलंभलक्षणं मोक्षं केवलज्ञानाद्यनंतचतुष्टयव्यक्तिरूपं मोक्षफलं भेदाभेदरत्नत्रयात्मकं मोक्षमार्गं च क्रमेण प्रतिपादयाम्यहं त्वं शृण्विति ॥ १२८ ॥

अथ धर्मार्थकाममोक्षाणां मध्ये सुखकारणत्वान्मोक्ष एवोत्तम इति अभिप्रायं मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति;—

धम्महं अत्थहं कामहंवि, एयहं सयलहं मोक्खु ।
उत्तमु पभणहि णाणि जिय, अण्णें जेण ण सुक्खु ॥ १२९ ॥

धर्मस्य अर्थस्य कामस्यापि एतेषां सकलानां मोक्षं ।
उत्तमं प्रभणंति ज्ञानिनः जीव अन्येन येन न सुखं ॥ १२९ ॥

धम्महं इत्यादि । **धम्महं** धर्मस्य धर्माद्वा **अत्थहं** अर्थस्य अर्थाद्वा **कामहंवि** कामस्यापि कामाद्वा **एयहं सयलहं** एतेषां सकलानां संबंधित्वेन एतेभ्यो वा सकाशात् **मोक्खु** मोक्षं **उत्तमु पभणहि** उत्तमं विशिष्टं प्रभणंति । के कथयंति । **णाणि** ज्ञानिनः **जिय** हे जीव । कस्मादुत्तमं प्रभणंति मोक्षं । **अण्णइ** अन्येन धर्मार्थकामादिना **जेण** येन कारणेन **ण सोक्खु** नास्ति परमसुखं इति । तद्यथा—धर्मशब्देनात्र पुण्यं कथ्यते अर्थश-

---

[**पृष्टं**] पूछा [**तत्**] उसको [**जिनभाषितं**] जिनेश्वरदेवके कहे प्रमाण [**त्वं**] तू [**निशृणु**] निश्चयकर सुन [**येन**] जिससे कि [**भेदं**] भेद [**विजानासि**] अच्छीतरह जान जावै । **भावार्थ**—श्री योगींद्रदेवगुरु शिष्यसे कहते हैं कि हे प्रभाकरभट्ट योगी शुद्धात्माकी प्राप्तिरूप मोक्ष, केवलज्ञानादि अनंतचतुष्टयका प्रगटपना स्वरूप मोक्षफल और निश्चय व्यवहार रत्नत्रयरूप मोक्षका मार्ग इन तीनोंको क्रमसे जिन आज्ञाप्रमाण तुझको कहूंगा । उनको तू अच्छीतरह चित्तमें धारण कर जिससे सब भेद मालूम होजावै ॥ १२८ ॥

अब धर्म अर्थ काम और मोक्ष इन चारोंमेंसे सुखका मूल कारण मोक्ष ही सबसे उत्तम है ऐसा अभिप्राय मनमें रखकर इस गाथासूत्रको कहते हैं;—[**हे जीव**] हे जीव [**धर्मस्य**] धर्म [**अर्थस्य**] अर्थ [**कामस्य अपि**] और काम [**एतेषां सकलानां**] इन सब पुरुषार्थोंमेंसे [**मोक्षं उत्तमं**] मोक्षको उत्तम [**ज्ञानिनः**] ज्ञानी पुरुष [**प्रभणंति**] कहते हैं [**येन**] क्योंकि [**अन्येन**] अन्य धर्म अर्थ कामादि पदार्थोंसे [**सुखं**] परमसुख [**न**] नहीं है ॥ **भावार्थ**—धर्मशब्दसे यहां पुण्य समझना, अर्थशब्दसे पुण्यका

ब्देन तु पुण्यफलभूतार्थो राज्यादिविभूतिविशेषः, कामशब्देन तु तस्यैव राज्यस्य मुख्यफलभूतः स्त्रीवस्त्रगंधमाल्यादिसंभोगः एतेभ्यस्त्रिभ्यः सकाशान्मोक्षमुत्तमं कथयंति । के ते । वीतरागनिर्विकल्पस्वसंवेदनज्ञानिनः । कस्मात् । आकुलत्वोत्पादकेन वीतरागपरमानंदसुखामृतरसास्वादविपरीतेन धर्मार्थकामादिना मोक्षादन्येन येन कारणेन सुखं नास्तीति भावार्थः ॥ १२९ ॥

अथ धर्मार्थकामेभ्यो यद्युत्तमो न भवति मोक्षस्तर्हि तत्त्रयं मुक्त्वा परलोकशब्दवाच्यं मोक्षं किमिति जिना गच्छंतीति प्रकटयंतिः—

जइ जिय उत्तमु होइ णवि, एयहं सयलहं सोइ ।
तो किं तिण्णिवि परिहरवि, जिण वच्चहिं परलोइ ॥ १३० ॥

यदि जीव उत्तमो भवति नैव एतेभ्यः सकलेभ्यः स एव ।
ततः किं त्रीण्यपि परिहृत्य जिनाः व्रजंति परलोके ॥ १३० ॥

जइ इत्यादि । **जइ** यदि चेत् **जिय** हे जीव **उत्तम होइ णवि** उत्तमो भवति नैव । केभ्यः । **एयहं सयलहं** एतेभ्यः पूर्वोक्तेभ्यो धर्मादिभ्यः । कतिसंख्योपेतेभ्यः । सकलेभ्यः **सोवि** स एव पूर्वोक्तो मोक्षः **तो** ततःकारणात् **किं** किमर्थं **तिण्णिवि** त्रीण्यपि **परिहरिवि** परिहृत्य त्यक्त्वा **जिण** जिनाः कर्तारः **वच्चहिं** व्रजंति गच्छंति । कुत्र गच्छंति । **परलोइ** परलोकशब्दवाच्ये परमात्मध्याने न तु कायमोक्षे चेति । तथाहि—परलोकशब्दस्य व्युत्पत्त्यर्थः कथ्यते । परः उत्कृष्टो मिथ्यात्वरागादिरहितः केवलज्ञानाद्यनंतगुणसहितः

फल राज्य वगैरः संपदा जानना और कामशब्दसे उस राज्यका मुख्यफल स्त्री कपड़े सुगंधितमाला आदि वस्तुरूप भोग जानना । इन तीनोंसे परम सुख नहीं है क्लेशरूप दुःख ही है इसलिये इन सबसे उत्तम मोक्षको ही वीतरागसर्वज्ञदेव कहते हैं क्योंकि मोक्षसे जुदे जो धर्म अर्थ काम हैं वे आकुलताके उत्पन्न करनेवाले हैं तथा वीतरागपरमानंद सुखरूप अमृतरसके आस्वादसे विपरीत हैं इसलिये सुखके करनेवाले नहीं हैं ऐसा जानना ॥ १२९ ॥

आगे धर्म अर्थ काम इन तीनोंसे जो मोक्ष उत्तम नहीं होता तो इन तीनोंको छोड़कर जिनेश्वर देव मोक्षको क्यों जाते ऐसा प्रगट दिखाते हैं;—[**हे जीव**] हे जीव [**यदि**] जो [**एतेभ्यः सकलेभ्यः**] इन सबोंसे [**सः**] मोक्ष [**उत्तमः**] उत्तम [**एव**] ही [**नैव**] नहीं [**भवति**] होता [**ततः**] तो [**जिनाः**] श्रीजिनवरदेव [**त्रीण्यपि**] धर्म अर्थ काम इन तीनोंको [**परिहृत्य**] छोड़कर [**परलोके**] मोक्षमें [**किं**] क्यों [**व्रजंति**] जाते । इसलिये जानते हैं कि मोक्ष सबसे उत्कृष्ट है । **भावार्थ**—पर अर्थात् उत्कृष्ट मिथ्यात्वरागादिरहित केवलज्ञानादि अनंतगुण सहित परमात्मा वह पर है उस

परमात्मा परशब्देनोच्यते तस्यैवंगुणविशिष्टस्य परमात्मनो लोको लोकनमवलोकनं वीतराग-परमानंदसमरसीभावानुभवनं लोक इति परलोकशब्दस्यार्थः । अथवा पूर्वोक्तलक्षणः परमात्मा परशब्देनोच्यते । निश्चयेन परशिवशब्दवाच्यो मुक्तात्मा शिव इत्युच्यते तस्य लोकः शिवलोक इति । अथवा परमब्रह्मशब्दवाच्यो मुक्तात्मा परमब्रह्म इति तस्य लोको ब्रह्मलोक इति । अथवा परमविष्णुशब्दवाच्यो मुक्तात्मा विष्णुरिति तस्य लोको विष्णुलोक इति परलोकशब्देन मोक्षो भण्यते परश्चासौ लोकश्च परलोक इति । परलोकशब्दस्य व्युत्पत्त्यर्थो ज्ञातव्यः नचान्यः कोपि परिकल्पितःशिवलोकादिरस्तीति । अत्र स एव परलोकशब्दवाच्यः परमात्मोपादेय इति तात्पर्यं ॥ १३० ॥

अथ तमेव मोक्षं सुखदायकं दृष्टांतद्वारेण दृढयति;—

उत्तमु सुक्खु ण देइ जइ, उत्तमु सुक्खु ण होइ ।
तो किं इच्छहिं, बंधणहिं बद्धा पसुयवि सोइ ॥ १३१ ॥

उत्तमं सुखं न ददाति यदि उत्तमो मोक्षो न भवति ।
ततःकिं इच्छंति बंधनैः बद्धा पशवोपि तमेव ॥ १३१ ॥

उत्तमु इत्यादि । **उत्तमु** उत्तमं **सुक्खु** सुखं **ण देइ जइ** न ददाति यदि चेत् **उत्तमु सुक्खु ण होइ** उत्तमो मोक्षो न भवति **तो** तस्मात्कारणात् **किं** किमर्थं **इच्छहिं** इच्छंति **बंधणहिं** बंधनैः **बद्धा** निबद्धाः । किं निबद्धाः । **पसुयवि** पशवोपि । किमिच्छंति । **सोइ** तमेव मोक्षमिति । अयमत्र भावार्थः । सुखकारणत्वाद्धेतोः बंधनबद्धाः पशवोपि

परमात्माका लोक अर्थात् अवलोकन वीतराग परमानंद समरसीभावका अनुभव वह परलोक कहा जाता है अथवा परमात्माको परमशिव कहते हैं उसका जो अवलोकन वह शिवलोक है, अथवा परमात्माका ही नाम परम ब्रह्म है उसका जो लोक वह ब्रह्मलोक है, अथवा उसीका नाम परमविष्णु है उसका जो लोक अर्थात् स्थान वह विष्णुलोक है ये सब मोक्षके नाम हैं यानी जितने परमात्माके नाम हैं उनके आगे लोक लगानेसे मोक्षके नाम हो जाते हैं दूसरा कोई कल्पना किया हुआ शिवलोक ब्रह्मलोक विष्णुलोक नहीं है । यहांपर सारांश यह हुआ कि परलोकके नामसे कहागया परमात्मा ही उपादेय है ध्यान करने योग्य है अन्य कोई नहीं ॥ १३० ॥

आगे उसी मोक्षको अनंतसुखका देनेवाला दृष्टांतके द्वारा दृढ करते हैं;—[**यदि**] जो [**मोक्षः**] मोक्ष [**उत्तमं सुखं**] उत्तमसुखको [**न ददाति**] न देवै तो [**उत्तमः**] उत्तम [**न भवति**] नहीं होवै और जो मोक्ष उत्तम ही न होवै [**ततः**] तो [**बंधनैः बद्धाः**] बंधनोंसे बंधे [**पशवोपि**] पशु भी [**तमेव**] उस मोक्षकी ही [**किं इच्छंति**] क्यों इच्छा करें । **भावार्थ**—बंधनेके समान कोई दुःख नहीं है और छूटनेके समान

मोक्षमिच्छंति तेन कारणेन केवलज्ञानाद्यनंतगुणाविनाभूतस्योपादेयरूपस्यानंतसुखस्य कारणत्वादिति ज्ञानिनो विशेषेण मोक्षमिच्छंति ॥ १३१ ॥

अथ यदि तस्य मोक्षस्याधिकगुणगणो न भवति तर्हि लोको निजमस्तकस्योपरि तं किमर्थं धरतीति निरूपयति;—

अणु जइ जगह जि अहिययरु, गुणगणु तासु ण होइ ।
तो तइलोउवि किं धरइ, णियसिर उप्परि सोइ ॥ १३२ ॥

अनु यदि जगतोपि अधिकतरः गुणगुणः तस्य न भवति ।
ततः त्रिलोकोपि किं धरति निजशिरसि उपरि तमेव ॥ १३२ ॥

अणु इत्यादि । **अणु** पुनः **जइ** यदि चेत् **जगहं जि** जगतोपि सकाशात् **अहिययरु** अतिशयेनाधिकः अधिकतरः । कोसौ । **गुणगणु** गुणगणाः **तासु** तस्य मोक्षस्य **ण होइ** न भवति **तो** ततः कारणात् **तइलोउवि** त्रिलोकोपि कर्ता । **किं धरइ** किमर्थं धरति । कस्मिन् । **णियसिर उप्परि** निजशिरसि उपरि **किं धरइ** किं धरति **सोइ** तमेव मोक्षमिति । तद्यथा । यदि तस्य मोक्षस्य पूर्वोक्तः सम्यक्त्वादिगुणगणो न भवति तर्हि लोकः कर्ता निजमस्तकस्योपरि तत्किं धरतीति । अत्रानेन गुणगणस्थापनेन किं कृतं भवति, बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराभिधानानां गुणानामभावं मोक्षं मन्यंते ये

कोई सुख नहीं है बंधनसे बंधे जानवर भी छूटना चाहते हैं जब छूटते हैं तभी सुखी होते हैं । इस सामान्यबंधनेके अभावसेही पशू सुखी होते हैं तो कर्मबंधनके अभावसे ज्ञानी जन परमसुखी होवें इसमें अचंभा क्या है । इसलिये केवलज्ञानादि अनंतगुणसे तन्मई अनंतसुखका कारण मोक्ष ही आदरने योग्य है इसकारण ज्ञानी पुरुष विशेषतासे मोक्षको ही इच्छते हैं ॥ १३१ ॥

आगे जो मोक्षमें अधिकगुणोंका समूह नहीं होता तो मोक्षको तीनलोक अपने मस्तक पर क्यों रखता ऐसा बतलाते हैं;—[**अनु**] फिर [**यदि**] जो [**जगतः अपि**] सब लोकसे भी [**अधिकतरः**] बहुत ज्यादा [**गुणगणः**] गुणोंका समूह [**तस्य**] उस मोक्षमें [**न भवति**] नहीं होता [**ततः**] तो [**त्रिलोकः अपि**] तीनों ही लोक [**निजशिरसि**] अपने मस्तकके [**उपरि**] ऊपर [**तमेव**] उसी मोक्षको [**किं धरति**] क्यों रखता । **भावार्थ**—मोक्ष लोकके शिखर (अग्रभाग) पर है सो सब लोकसे मोक्षमें बहुत ज्यादा गुण है इसीलिये उसको लोक अपने सिरपर रखता है । कोई किसीको अपने सिरपर रखता है वह अपनेसे अधिक गुणवाला जानकर रखता है । यदि क्षायिकसम्यक्त्व केवलदर्शनादि अनंतगुण मोक्षमें न होते तौ मोक्ष सबके सिरपर न होता मोक्षके ऊपर अन्य कोईस्थान नहीं है सबके ऊपर मोक्ष ही है और मोक्षके आगे अनंत अलोक

वृद्धवैशेषिकास्ते निषिद्धाः । ये च प्रदीपनिर्वाणवज्जीवाभावं मोक्षं मन्यंते सौगतास्ते च निरस्ताः । यथोक्तं सांख्यैः । सुप्तावस्थावत् सुखज्ञानरहितो मोक्षस्तदपि निरस्तं । लोकाग्रे तिष्ठतीति वचनेन तु मंडिकसंज्ञा नैयायिकमतांतर्गता यत्रैव मुक्तस्तत्रैव तिष्ठतीति वदंति तेपि निरस्ता इति । जैनमते पुनरिंद्रियजनितज्ञानसुखस्याभावेन चातींद्रियज्ञानसुखस्येति कर्मजनितेंद्रियादिदशप्राणसहितस्याशुद्धजीवस्याभावे न पुनः शुद्धजीवस्येति भावार्थः॥१३२॥

है वह शून्य है वहां कोई स्थान नहीं है । वह अनंत अलोक भी सिद्धोंके ज्ञानमें भास रहा है । यहांपर मोक्षमें अनंतगुणोंके स्थापन करनेसे मिथ्यादृष्टियोंका खंडन किया । कोई मिथ्यादृष्टि वैशेषिकादि ऐसा कहते हैं कि जो बुद्धि सुख दुःख इच्छा द्वेष प्रयत्न धर्म अधर्म संस्कार इन नव गुणोंके अभावरूप मोक्ष है उनका निषेध किया, क्योंकि इंद्रिय जनित बुद्धिका तो अभाव है परंतु केवल बुद्धि अर्थात् केवलज्ञानका अभाव नहीं है; इंद्रियोंसे उत्पन्न सुखका अभाव है लेकिन अतींद्रियसुखकी पूर्णता है, दुःख इच्छा द्वेष यत्न इन विभावरूप गुणोंका तो अभाव है ही केवलरूप परिणमन है, व्यवहार धर्मका अभाव ही है और वस्तुका स्वभावरूप धर्म वह है ही, अधर्मका तो अभाव ठीक ही है और पर द्रव्यरूप संस्कार सर्वथा नहीं है स्वभावसंस्कार ही है । जो मूढ इन गुणोंका अभाव मानते हैं वे वृथा बकते हैं मोक्ष तो अनंतगुणरूप है । इसतरह निर्गुणवादियोंका निषेध किया । तथा बौद्धमती जीवके अभावको मोक्ष कहते हैं । वे मोक्ष ऐसा मानते हैं कि जैसे दीपकका निर्वाण (बुझना) उसीतरह जीवका अभाव वही मोक्ष है । ऐसी बौद्धकी श्रद्धाका भी तिरस्कार किया । क्योंकि जो जीवका ही अभाव होगया तो मोक्ष किसके हुई । जीवका शुद्ध होना वह मोक्ष है अभाव कहना वृथा है । सांख्यमतवाले ऐसा कहते हैं कि जो एकदम सोनेकी अवस्था है वही मोक्ष है जिसजगह न सुख है न ज्ञान है ऐसी प्रतीतिका निवारण किया । नैयायिक मतवाले ऐसा कहते हैं कि जहांसे मुक्त हुआ वहींपर ही तिष्ठता है ऊपरको गमन नहीं करता । ऐसे नैयायिकके कथनका लोक सिखरपर तिष्ठता है इस वचनसे निषेध किया । क्योंकि बंधनसे छूटता है वहां वह नहीं रहता यह प्रत्यक्ष देखनेमें आता है कैदी कैदसे छूटता है तब बंदीग्रहसे छूटकर अपने घरकी तरफ गमन करता है वह निजघर निर्वाण ही है । जैनमार्गमें तो इंद्रियजनित ज्ञान जोकि मति श्रुत अवधि मनःपर्यय हैं उनका अभाव माना है और अतींद्रियरूप जो केवलज्ञान है वह वस्तुका स्वभाव है उसका अभाव आत्मामें नहीं होसकता । स्पर्श रस गंध रूप शब्द इन पांच इंद्रियविषयोंकर उत्पन्न हुए सुखका तो अभाव ही है लेकिन अतींद्रियसुख जो निराकुल परमानंद है उसका अभाव नहीं है, कर्मजनित जो इंद्रियादि दस प्राण अर्थात् पांच इंद्रियां मन वचन काय आयु श्वासोच्छ्वास इन दश प्राणोंका भी अभाव है ज्ञानादि

अथोत्तमं सुखं न ददाति यदि मोक्षस्तर्हि सिद्धाः कथं निरंतरं सेवंते तमिति कथयति;—

उत्तमु सुक्खु ण देइ जइ, उत्तमु मुक्खु ण होइ ।
तो किं सयलुवि कालु जिय, सिद्धवि सेवहिं सोइ ॥ १३३ ॥

उत्तमं सुखं न ददाति यदि उत्तमः मोक्षो न भवति ।
ततः किं सकलमपि कालं जीव सिद्धा अपि सेवंते तमेव ॥ १३३ ॥

उत्तमु इत्यादि । **उत्तमु सुक्खु** उत्तमं सुखं **ण देइ** न ददाति **जइ** यदि चेत् **उत्तमु** उत्तमो **मुक्खु** मोक्षः **ण होइ** न भवति **तो** ततः कारणात् **किं** किमर्थं **सयलुवि कालु** सकलमपि कालं **जिय** हे जीव **सिद्धवि** सिद्धा अपि **सेवहिं** सेवंते सेवितमेव मोक्षमिति । तथाहि । यद्यतींद्रियपरमाह्लादरूपमविनश्वरं सुखं न ददाति मोक्षस्तर्हि कथमुत्तमो भवति उत्तमत्वाभावे च केवलज्ञानादिगुणसहिताः सिद्धा भगवंतः किमर्थं निरंतरं सेवंते च चेत् । तस्मादेव ज्ञायते तत्सुखमुत्तमं ददातीति । उक्तं च सिद्धसुखं । "आत्मोपादानसिद्धं स्वयमतिशयवद्वीतबाधं विशालं, वृद्धिह्रासव्यपेतं विषयविरहितं निःप्रतिद्वन्द्वभावं । अन्यद्रव्यानपेक्षं निरुपममभितं शाश्वतं सर्वकालं उत्कृष्टानंतसारं परमसुखमतस्तस्य सिद्धस्य जातं" ॥ अत्रेदमेव निरंतरमभिलषनीयमिति भावार्थः ॥ १३३ ॥

निज प्राणोंका अभाव नहीं है । जीवकी अशुद्धताका अभाव है शुद्धपनेका अभाव नहीं यह निश्चयसे जानना ॥ १३२ ॥

आगे कहते हैं कि जो मोक्ष उत्तमसुख नहीं दे तो सिद्ध उसे निरंतर क्यों सेवन करें ? ;—[**यदि**] जो [**उत्तमं सुखं**] उत्तम अविनाशी सुखको [**न ददाति**] नहीं देवै तो [**मोक्षः उत्तमः**] मोक्ष उत्तम भी [**न भवति**] नहीं होसकती उत्तम सुख देती है इसी लिये मोक्ष सबसे उत्तम है । जो मोक्षमें परमानंद नहीं होता [**ततः**] तो [**हे जीव**] हे जीव [**सिद्धा अपि**] सिद्ध परमेष्ठी भी [**सकलमपि कालं**] सदा काल [**तमेव**] उसी मोक्षको [**किं सेवंते**] क्यों सेवन करते कभी भी न सेवते । **भावार्थ**—वह मोक्ष अखंड सुख देती है इसीलिये उसे सिद्ध महाराज सेवते हैं मोक्ष परम आह्लादरूप है अविनश्वर है मन और इंद्रियोंसे रहित है इसीलिये उसे सदाकाल सिद्ध सेवते हैं केवलज्ञानादिगुणसहित सिद्ध भगवान निरंतर निर्वाणमें ही निवास करते हैं ऐसा निश्चय है । सिद्धोंका सुख दूसरी जगह भी ऐसा कहा है "आत्मोपादान" इत्यादि । इसका अभिप्राय यह है कि इस अध्यात्मज्ञानसे सिद्धोंके जो परमसुख हुआ है वह कैसा है कि अपनी २ जो उपादानशक्ति उसीकर उत्पन्न हुआ है परकी सहायतासे नहीं है स्वयं (आप ही) अतिशयरूप है सब बाधाओंसे रहित है निराबाध है विस्तीर्ण है घटती वढतीसे रहित है विषयविकारसे रहित है भेदभावसे रहित है निर्द्वन्द्व

अथ सर्वेषां परमपुरुषाणां मोक्ष एव ध्येय इति प्रतिपादयति;—

हरिहरबम्भुवि जिणवरवि, मुणिवरविंदवि भव्व ।
परमणिरंजणि मणु धरिवि, मुक्खु जि झायहि सव्व ॥ १३४ ॥

हरिहरब्रह्माणोपि जिनवरा अपि मुनिवरवृंदान्यपि भव्याः ।
परमनिरंजने मनः धृत्वा मोक्षं एव ध्यायंति सर्वे ॥ १३४ ॥

हरि हर इत्यादि । **हरि हरबंभुवि** हरिहरब्रह्माणोपि **जिणवरवि** जिनवरा अपि **मुणिवरविंदवि** मुनिवरवृंदान्यपि **भव्व** शेषभव्या अपि, एते सर्वे किं कुर्वंति । **परमणिरंजणि** परमनिरंजनाभिधाने निजपरमात्मस्वरूपे **मणु** मनः **धरिवि** विषयकषायेषु गच्छन् सन् व्यावृत्य धृत्वा पश्चात **मुक्खु जि** मोक्षमेव **झायहि** ध्यायंति **सव्व** सर्वेपि इति । तद्यथा । हरिहरादयः सर्वेपि प्रसिद्धपुरुषाः ख्यातिपूजालाभादिसमस्तविकल्पजालेन शून्ये शुद्धबुद्धैकस्वभावनिजात्मद्रव्यसम्यक्श्रद्धानज्ञानानुचरणरूपाभेदरत्नत्रयात्मकनिर्विकल्पसमाधिसमुत्पन्नवीतरागसहजानंदैकसुखरसानुभवेन पूर्णकलशवत् भरितावस्थे निरंजनशब्दाभिधेयपरमात्मध्याने स्थित्वा मोक्षमेव ध्यायंतीति । अयमत्र भावार्थः । यद्यपि व्यवहारेण

है जहां पर वस्तुकी अपेक्षा ही नहीं है अनुपम है अनंत है अपार है जिसका प्रमाण नहीं सदा काल साश्वता है महा उत्कृष्ट है अनंतसारता लिये हुए है । ऐसा परमसुख सिद्धोंके है अन्यके नहीं है । यहां तात्पर्य यह है कि हमेशा मोक्षका ही सुख अभिलाषा करने योग्य है और संसारपर्याय सब हेय है ॥ १३३ ॥

आगे सभी महान पुरुषोंके मोक्ष ही ध्यावने योग्य है ऐसा कहते हैं;—[**हरिहरब्रह्माणोपि**] नारायण वा इंद्र रुद्र अन्य ज्ञानीपुरुष [**जिनवरा अपि**] श्री तीर्थंकर परमदेव [**मुनिवरवृंदान्यपि**] मुनिश्वरोंके समूह तथा [**भव्याः**] अन्य भी भव्यजीव [**परमनिरंजने**] परम निरंजनमें [**मनः धृत्वा**] मन रखकर [**सर्वे**] सब ही [**मोक्षं**] मोक्षको [**एव**] ही [**ध्यायंति**] ध्यावते हैं । यह मन विषयकषायोंमें जो जाता है उसको पीछे लौटाकर अपने स्वरूपमें स्थिर अर्थात् निर्वाणका साधनेवाला करते हैं । **भावार्थ**—श्री तीर्थंकर देव तथा चक्रवर्ती बलदेव वासुदेव प्रतिवासुदेव महादेव इत्यादि सब प्रसिद्ध पुरुष अपने शुद्ध ज्ञान अखंडस्वभाव जो निज आत्मद्रव्य उसका सम्यक् श्रद्धान ज्ञान आचरणरूप जो अभेदरत्नत्रय उस मई समाधिकर उत्पन्न वीतरागसहजानंद अतींद्रियसुखरस उसके अनुभवसे पूर्ण कलशकी तरह भरे हुए निरंतर निराकार निजस्वरूप परमात्माके ध्यानमें स्थिर होकर मुक्त होते हैं । कैसा वह ध्यान है कि ख्याति (प्रसिद्धि) पूजा (अपनी महिमा) और धनादिकका लाभ इत्यादि समस्त विकल्पजालोंसे रहित है । यहां केवल आत्मध्यान ही मोक्षमार्ग बतलाया है और अपना स्वरूप ही ध्यावने योग्य है । तात्पर्य यह

सविकल्पावस्थायां वीतरागसर्वज्ञस्वरूपं तत्प्रतिबिंबानि तन्मंत्राक्षराणि तदाराधकपुरुषाश्च ध्येया भवंति तथापि वीतरागनिर्विकल्पत्रिगुप्तिगुप्तपरमसमाधिकाले निजशुद्धात्मैव ध्येय इति ॥ १३४ ॥

अथ भुवनत्रयेपि मोक्षं मुक्त्वा अन्यत्परमसुखकारणं नास्तीति निश्चिनोति;—

तिहुयणि जीवहं अत्थि णवि, सुक्खहं कारणु कोइ ।
मुक्खु मुएविणु एक्कु पर, तेणवि चिंतहिं सोइ ॥ १३५ ॥

त्रिभुवने जीवानां अस्ति नैव सुखस्य कारणं किमपि ।
मोक्षं मुक्त्वा एकं परं तेनैव चिंतय तमेव ॥ १३५ ॥

तिहुयणि इत्यादि । **तिहुयणि** त्रिभुवने **जीवहं** जीवानां **अत्थि णवि** अस्ति नैव । किं नास्ति । **सोक्खहं कारणु** सुखस्य कारणं **कोइ** किमपि वस्तु । किं कृत्वा । **मुक्खु मुएविणु एक्कु** मोक्षं मुक्त्वैकं परं नियमेन **तेणवि** तेनैव कारणेन **चिंतहिं** चिंतय **सोइ** तमेव मोक्षमिति । तथाहि । त्रिभुवनेपि मोक्षं मुक्त्वा निरंतरातिशयसुखकारणमन्यत्पंचेंद्रियविषयानुभवरूपं किमपि नास्ति तेन कारणेन हे प्रभाकरभट्ट वीतरागनिर्विकल्पपरमसामायिके स्थित्वा निजशुद्धात्मस्वभावं ध्याय त्वमिति । अत्राह प्रभाकरभट्टः हे भगवन्नतींद्रियमोक्षसुखं निरंतरं वर्ण्यते भवद्भिस्तच्च न ज्ञायते जनैः । भगवानाह हे प्रभाकरभट्ट कोपि पुरुषो निर्व्याकुलचित्तः प्रस्तावे पंचेंद्रियभोगसेवारहितस्तिष्ठति स केनापि देवदत्तेन

है कि यद्यपि व्यवहारनयकर प्रथम अवस्थामें वीतरागसर्वज्ञका स्वरूप अथवा वीतरागके प्रतिबिंब अथवा वीतरागके नाम मंत्रके अक्षर अथवा वीतरागके सेवक महामुनि ध्यावने योग्य हैं तौभी वीतराग निर्विकल्पतीनगुप्तिरूप परम समाधिके समय अपना शुद्ध आत्मा ही ध्यान करने योग्य है अन्य कोई भी दूसरा पदार्थ पूर्ण अवस्थामें ध्यावने योग्य नहीं है ॥ १३४ ॥

आगे निश्चयसे मिथ्यादृष्टियोंके पुन्यका निषेध करते हैं;—[**पुण्येन**] पुण्यसे घरमें [**विभवः**] धन [**भवति**] होता है और [**विभवेन**] धनसे [**मदः**] अभिमान [**मदेन**] मानसे [**मतिमोहः**] बुद्धिभ्रम होता है [**मतिमोहेन**] बुद्धिके भ्रम होनेसे (अविवेकसे) [**पापं**] पाप होता है [**तस्मात्**] इसलिये [**पुण्यं**] ऐसा पुन्य [**अस्माकं**] हमारे [**मा भवतु**] न होवै । **भावार्थ**—भेदाभेद रत्नत्रयकी आराधनासे रहित, देखे सुने अनुभवकिये भोगोंकी वांछारूप निदानबंधके परिणामोंसहित जो मिथ्यादृष्टि संसारी अज्ञानी जीव है उसने पहले उपार्जन किये जो भोगोंकी वांछारूप पुण्य उसके फलसे प्राप्त हुई घरमें संपदा होनेसे अभिमान (घमंड) होता है अभिमानसे बुद्धिभ्रष्ट होती है बुद्धि भ्रष्टकर पाप कमाता है और पापसे भव २ में अनंत दुःख पाता है । इसलिये मिथ्यादृष्टि-

यदुपार्जितं पूर्वभवे तदेव मदमहंकारं जनयति बुद्धिविनाशं च करोति । न च पुनः सम्यक्त्वादिगुणसहितं भरतसगररामपांडवादिपुण्यबंधवत् । यदि पुनः सर्वेषां मदं जनयति तर्हि ते कथं पुण्यभाजनाःसंतो मदाहंकारादिविकल्पं त्यक्त्वा मोक्षं गता इति भावार्थः ॥ तथा चोक्तं चिरंतनानां निरहंकारत्वं । "सत्यं वाचि मतौ श्रुतं हृदि दया शौर्यं भुजे विक्रमे लक्ष्मीर्दानमनूनमर्थिनिचये मार्गे गतिर्निर्वृतेः । येषां प्रागजनीह तेपि निरहंकाराः श्रुतेर्गोचराश्चित्रं संप्रति लेशतोपि न गुणास्तेषां तथाप्युद्धताः "॥ १८७ ॥

अथ देवशास्त्रगुरुभक्त्या मुख्यवृत्त्या पुण्यं भवति न च मोक्ष इति प्रतिपादयति;—

देवहं सत्थहं मुणिवरहं, भत्तिए पुण्णु हवेइ ।
कम्मक्खउ पुणु होइ णवि, अज्जउ संति भणेइ ॥ १८८ ॥

देवानां शास्त्राणां मुनिवराणां भक्त्या पुण्यं भवति ।
कर्मक्षयः पुनः भवति नैव आर्यः सांतिः भणति ॥ १८८ ॥

देवहं इत्यादि । **देवहं सत्थहं मुणिवरहं भत्तिए पुण्णु हवेइ** देवशास्त्रमुनीनां भक्त्या पुण्यं भवति **कम्मक्खउ पुणु होइ णवि** कर्मक्षयः पुनर्मुख्यवृत्त्या नैव भवति । एवं कोसौ भणति । **अज्जउ** आर्यः । किं नामा । संति नामा **भणेइ** भणति कथयति इति ।

योंका पुण्य पापका ही कारण है । जो सम्यक्त्वादि गुण सहित भरत सगर राम पांडवादिक विवेकी जीव हैं उनको पुन्यबंध अभिमान नहीं उत्पन्न करता परंपराय मोक्षका कारण है । जैसे अज्ञानीयोंके पुन्यका फल विभूति गर्वका कारण है वैसे सम्यग्दृष्टियोंके नहीं है । वे सम्यग्दृष्टि पुण्यके पात्र हुए चक्रवर्ती आदिकी विभूति पाकर मद अहंकारादि विकल्पोंको छोडकर मोक्षको गये अर्थात् सम्यग्दृष्टि जीव चक्रवर्ती बलभद्रपदमें भी निरहंकार रहे । ऐसा ही कथन आत्मानुशासन ग्रंथमें श्रीगुणभद्राचार्यने किया है । कि, पहले समयमें ऐसे सत्पुरुष होगये हैं कि जिनके वचनमें सत्य, शास्त्रमें बुद्धि, मनमें दया, पराक्रमरूप भुजाओंमें शूर वीरता, याचकोंमें पूर्ण लक्ष्मीका दान और मोक्षमार्गमें गमन है वे निरभिमानी हुए, जिनके किसीगुणका अहंकार नहीं हुआ । उनके नाम शास्त्रोंमें प्रसिद्ध हैं परंतु अब बड़ा अचंभा है कि इस पंचमकालमें लेशमात्र भी गुण नहीं हैं तौभी उनके उद्धतपना है यानी गुण तो रंचमात्र भी नहीं और अभिमानमें बुद्धि रहती है१८७

आगे देव गुरु शास्त्रकी भक्तिसे मुख्यतासे तो पुण्य बंध होता है परंपराय मोक्ष होती है साक्षात् मोक्ष नहीं ऐसा कहते हैं;—[**देवानां शास्त्राणां मुनिवराणां**] श्री वीतरागदेव, द्वादशांग शास्त्र और दिगंबर साधुओंकी [**भक्त्या**] भक्ति करनेसे [**पुण्यं भवति**] मुख्यतासे पुण्य होता है [**पुनः**] लेकिन [**कर्मक्षयः**] तत्काल कर्मोंका क्षय [**नैव भवति**] नहीं होता ऐसा [**आर्यः सांतिः**] सांति नाम आर्य अथवा कपटरहित संत-

तथाहि । सम्यक्त्वपूर्वकदेवशास्त्रगुरुभक्त्या मुख्यवृत्त्या पुण्यमेव भवति न च मोक्षः । अत्राह प्रभाकरभट्टः । यदि पुण्यं मुख्यवृत्त्या मोक्षकारणं न भवत्युपादेयं च न भवति तर्हि भरतसगररामपांडवादयोपि निरंतरं पंचपरमेष्ठिगुणस्मरणदानपूजादिना निर्भरभक्ताः संतः किमर्थं पुण्योपार्जनं कुर्युरिति । भगवानाह । यथा कोपि रामदेवादिपुरुषविशेषो देशांतरस्थितः सीतादिस्त्रीसमीपागतानां पुरुषाणां तदर्थं संभाषणदानसन्मानादिकं करोति तथा तेपि महापुरुषाः वीतरागपरमानंदैकरूपमोक्षलक्ष्मीसुखसुधारसपिपासिताः संतः संसारस्थितिछेदकारणं विषयकषायोत्पन्नदुर्ध्यानविनाशहेतुभूतं च परमेष्टिसंबंधिगुणस्मरण-दानपूजादिकं कुर्युरिति । अयमत्र भावार्थः । तेषां पंचपरमेष्टिभक्त्यादिपरिणतानां कुटुं-बिनां पलालवदनीहितं पुण्यमास्रवतीति ॥ १८८ ॥

अथ देवशास्त्रमुनीनां योसौ निंदां करोति तस्य पापबंधो भवतीति कथयति;—

देवहं सत्थहं मुणिवरहं, जो विद्देसु करेइ ।
णियमें पाउ हवेइ तसु, जें संसारु भमेइ ॥ १८९ ॥

पुरुष [भणति] कहते हैं । भावार्थ—सम्यक्त्वपूर्वक जो देव गुरु शास्त्रकी भक्ति करता है उसके मुख्य तो पुण्य ही होता है और परंपराय मोक्ष होती है । जो सम्यक्त्व रहित मिथ्यादृष्टि हैं उनके भावभक्ति तो नहीं है लौकिक बाहिरी भक्ति होती है उससे पुण्यका ही बंध है कर्मका क्षय नहीं है । ऐसा कथन सुनकर श्रीयोगीन्द्रदेवसे प्रभाकरभट्टने प्रश्न किया । हे प्रभो जो पुण्य मुख्यतासे मोक्षका कारण नहीं है तो त्यागने योग्य ही है ग्रहण योग्य नहीं है । जो ग्रहण योग्य नहीं है तो भरत सगर राम पांडवादिक महान् पुरुषोंने निरंतर पंच परमेष्टीके गुणस्मरण क्यों किये और दान पूजादि शुभ क्रियाओंकर पूर्ण हुए क्यों पुण्यका उपार्जन किया । तब श्रीगुरुने उत्तर दिया । कि जैसे परदेशमें स्थित कोई रामादिक पुरुष अपनी प्यारी सीता आदि स्त्रीके पाससे आये हुए किसी मनुष्यसे बहुत बातें करता है, उसका सन्मान करता है और दान करता है ये सब कारण अपनी प्रियाके हैं कुछ उसके प्रसादके कारण नहीं है । उसीतरह वे भरत सगर राम पांडवादि महान पुरुष वीतराग परमानंद रूप मोक्षलक्ष्मीके सुख अमृत रसके प्यासे हुए संसारकी स्थितिके छेदनेकेलिये विषयकषायकर उत्पन्न हुए आर्त रौद्र खोटे ध्यानोंके नाशका कारण श्रीपंचपरमेष्ठीके गुणोंका स्मरण करते हैं और दानपूजादिक करते हैं परंतु उनकी दृष्टि केवल निज परिणतिपर है पर वस्तुपर नहीं है । पंच परमेष्ठीकी भक्ति आदि शुभक्रियाको परिणत हुए जो भरत आदिक हैं उनके विना चांहा पुण्य प्रकृतिका आस्रव होता है । जैसे किसानकी दृष्टि अन्नपर है तृण भूसादि पर नहीं है । विना चांहा पुण्यका बंध सहजमें ही होजाता है । वह उनको संसारमें नहीं भटकाय सकता है । वे तो शिव-पुरीके ही पात्र हैं ॥ १८८ ॥

देवानां शास्त्राणां मुनिवराणां यो विद्वेषं करोति ।
नियमेन पापं भवति तस्य येन संसारं भ्रमति ॥ १८९ ॥

देवहं । इत्यादि । **देवहं सत्थहं मुणिवरहं जो विद्देसु करेइ** देवशास्त्रमुनीनां साक्षात्पुण्यबंधहेतुभूतानां परंपरया मुक्तिकारणभूतानां च योसौ विद्वेषं करोति । तस्य किं भवति । **णियमें पाउ हवेइ तसु** नियमेन पापं भवति तस्य । येन पापबंधेन किं भवति । **जें संसारु भमेइ** येन पापेन संसारं भ्रमतीति । तद्यथा । निजपरमात्मपदार्थोपलंभरुचिरूपं निश्चयसम्यक्त्वकारणस्य तत्त्वार्थश्रद्धानरूपव्यवहारसम्यक्त्वस्य विषयभूतानां देवशास्त्रयतीनां योसौ निंदां करोति स मिथ्यादृष्टिर्भवति । मिथ्यात्वेन पापं बध्नाति पापेन चतुर्गतिसंसारं भ्रमतीति भावार्थः ॥ १८९ ॥

अथ पूर्वसूत्रद्वयोक्तं पुण्यपापफलं दर्शयति;—

पावें णारउ तिरिउ जिउ, पुण्णें अमरु वियाणु ।
मिस्सें माणुसगइ लहइ, दोहिवि खइ णिव्वाणु ॥ १९० ॥

पापेन नारकः तिर्यग् जीवः पुण्येनामरो विजानीहि ।
मिश्रेण मनुष्यगतिं लभते द्वयोरपि क्षये निर्वाणं ॥ १९० ॥

पावें इत्यादि । **पावें** पापेन **णारउ तिरिउ** नारको भवति तिर्यग्भवति । कोसौ । **जिउ** जीवः **पुण्णे अमरु वियाणु** पुण्येनामरो देवो भवतीति जानीहि **मिस्सें माणुसगइ लहइ** मिश्रेण पुण्यपापद्वयेन मनुष्यगतिं लभते **दोहिवि खइ णिव्वाणु** द्वयोरपि कर्मक्षयेपि

आगे देव शास्त्र गुरूकी जो निंदा करता है उसके महान पापका बंध होता है, वह पापी पापके प्रभावसे नरकनिगोदादि खोटीगतिमें अनंतकाल तक भटकता है;— [**देवानां शास्त्राणां मुनिवराणां**] वीतरागदेव जिनसूत्र और निर्ग्रंथमुनियोंसे [**यः**] जो जीव [**विद्वेषं**] द्वेष [**करोति**] करता है [**तस्य**] उसके [**नियमेन**] निश्चयसे [**पापं**] पाप [**भवति**] होता है [**येन**] जिस पापके कारणसे वह जीव [**संसारं**] संसारमें [**भ्रमति**] भ्रमण करता है । अर्थात् परंपराय मोक्षके कारण और साक्षात् पुण्यबंधके कारण जो देवशास्त्रगुरूकी निंदा करता है उसके नियमसे पाप होता है पापसे दुर्गतिमें भटकता है । **भावार्थ**—निजपरमात्मद्रव्यकी प्राप्तिकी रुचि वही निश्चयसम्यक्त्व उसका कारण तत्त्वार्थश्रद्धानरूप व्यवहार सम्यक्त्व उसके मूल अरहंत देव निर्ग्रंथ गुरु और दयामई धर्म इन तीनोंकी जो निंदा करता है वह मिथ्यादृष्टि होता है । उस मिथ्यात्वसे महान पाप बांधता है । उस पापसे चतुर्गतिसंसारमें भ्रमता है ॥ १८९ ॥

आगे पहले दो सूत्रोंमें कहे गये पुण्यपापफल हैं उनको दिखाते हैं;—[**जीवः**] यह जीव [**पापेन**] पापके उदयसे [**नारकः तिर्यग्**] नरक गति और तिर्यंचगति पाता

निर्वाणमिति । तद्यथा । सहजशुद्धज्ञानानंदैकस्वभावात्परमात्मनः सकाशाद्विपरीतेन छेदनादिनारकतिर्यग्गतिदुःखदानसमर्थेन पापकर्मोदयेन नारकतिर्यग्गतिभाजनो भवति जीवः । तस्मादेव शुद्धात्मनो विलक्षणेन पुण्योदयेन देवो भवति । तस्मादेव शुद्धात्मनो विपरीतेन पुण्यपापद्वयेन मनुष्यो भवति । तस्यैव विशुद्धज्ञानदर्शनस्वभावस्य निजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानरूपेण शुद्धोपयोगेन मुक्तो भवतीति तात्पर्यार्थः ॥ तथा चोक्तं ॥ "पावेण णरयतिरियं गम्मइ धम्मेण देवलोयम्मि । मिस्सेण माणुसत्तं दोण्हंपि खएण णिव्वाणं" १९०

अथ निश्चयप्रतिक्रमणप्रत्याख्यानालोचनस्वरूपे स्थित्वा व्यवहारप्रतिक्रमणप्रत्याख्यानालोचनां त्यजंतीति त्रिकलेन कथयति;—

वंदणु णिंदणु पडिकमणु, पुण्णहं कारणु जेण ।
करइ करावइ अणुमणइ, एक्कुवि णाणि ण तेण ॥ १९१ ॥

वंदनं निंदनं प्रतिक्रमणं पुण्यस्य कारणं येन ।
करोति कारयति अनुमन्यते एकमपि ज्ञानी न तेन ॥ १९१ ॥

वंदणु इत्यादि । **वंदणु णिंदणु पडिकमणु** वंदननिंदनप्रतिक्रमणत्रयं । किंविशिष्टं । **पुण्णहं कारणु** पुण्यस्य कारणं **जेण** येन कारणेन **करइ करावइ अणुमणइ** करोति कारयति अनुमोदयति **एक्कुवि** एकमपि **णाणि ण तेण** ज्ञानी पुरुषो न तेन कारणे-

---

है [**पुण्येन**] पुण्यसे [**अमरः**] देव होता है [**मिश्रेण**] पुण्य और पाप दोनोंके मेलसे [**मनुष्यगतिं**] मनुष्य गतिको [**लभते**] पाता है और [**द्वयोरपि क्षये**] पुण्य पाप दोनोंके ही नाश होनेसे [**निर्वाणं**] मोक्षको पाता है ऐसा [**विजानीहि**] जानो । **भावार्थ**—सहज शुद्ध ज्ञानानंद स्वभाव जो परमात्मा है उससे विपरीत जो पापकर्म उसके उदयसे नरक तिर्यंचगतिका पात्र होता है, आत्मस्वरूपसे विपरीत शुभकर्मोंके उदयसे देव होता है, दोनोंके मेलसे मनुष्य होता है और शुद्धात्मस्वरूपसे विपरीत इन दोनों पुण्य पापोंके क्षयसे निर्वाण (मोक्ष) मिलता है । मोक्षका कारण एक शुद्धोपयोग है वह शुद्धोपयोग निजशुद्धात्मतत्त्वके सम्यक् श्रद्धान ज्ञान आचरणरूप है । इसलिये इस शुद्धोपयोगके विना किसी तरह भी मुक्ति नहीं हो सकती यह सारांश जानो । ऐसा ही सिद्धांतग्रंथोंमें भी हर एक जगह कहागया है । जैसे—यह जीव पापसे नरक तिर्यंच गतिको जाता है और धर्म (पुण्य) से देवलोकमें जाता है, पुण्य पाप दोनोंके मेलसे मनुष्यदेहको पाता है और दोनोंके क्षयसे मोक्ष पाता है ॥ १९० ॥

आगे निश्चयप्रतिक्रमण, निश्चयप्रत्याख्यान और निश्चयआलोचनारूप जो शुद्धोपयोग उसमें ठहरकर व्यवहार प्रतिक्रमण, व्यवहार प्रत्याख्यान और व्यवहार आलोचनारूप शुभोपयोगको छोडै ऐसा कहते हैं;—[**वंदनं**] पंच परमेष्ठीकी वंदना, [**निंदनं**] अपने

नेति । तथाहि । शुद्धनिर्विकल्पपरमात्मतत्त्वभावनाबलेन दृष्टश्रुतानुभूतभोगाकांक्षास्मरणरूपाणामतीतरागादिदोषाणां निराकरणं निश्चयप्रतिक्रमणं भवति, वीतरागचिदानंदैकानुभूतिभावनाबलेन भाविभोगाकांक्षारूपाणां रागादीनां त्यजनं निश्चयप्रत्याख्यानं भण्यते, निजशुद्धात्मोपलंभबलेन वर्तमानोदयागतशुभाशुभनिमित्तानां हर्षविषादादिपरिणामानां निजशुद्धात्मद्रव्यात् पृथक्करणं निश्चयालोचनमिति । इत्थंभूते निश्चयप्रतिक्रमणप्रत्याख्यानालोचनत्रये स्थित्वा योसौ व्यवहारप्रतिक्रमणप्रत्याख्यानालोचनत्रयं तत्रयानुकूलं वंदननिंदनादिशुभोपयोगं च त्यजन् स ज्ञानी भण्यते न चान्य इति भावार्थः ॥ १९१ ॥

अथ;—

वंदणु णिंदणु पडिकमणु, णाणिहुं एहु ण जुत्तु ।
एक्कु जि मिल्लिवि णाणमउ, सुद्धउ भाउ पवित्तु ॥ १९२ ॥

अशुभकर्मकी निंदा और [**प्रतिक्रमणं**] अपराधोंकी प्रायश्चित्तादि विधिसे निवृत्ति ये सब [**येन पुण्यस्य कारणं**] जो पुण्यके कारण हैं मोक्षके कारण नहीं हैं [**तेन**] इसलिये पहली अवस्थामें पापके दूर करनेकेलिये ज्ञानी पुरुष इनको करता है कराता है और करते हुएको भला जानता है तौभी निर्विकल्प शुद्धोपयोग अवस्थामें [**ज्ञानी**] ज्ञानी जीव [**एकमपि**] इन तीनोंमेंसे एक भी [**न करोति**] न तो करता [**कारयति**] न कराता है और न [**अनुमन्यते**] करते हुएको भला जानता है । **भावार्थ**—केवल शुद्धस्वरूपमें जिसका चित्त लगा हुआ है ऐसा निर्विकल्प परमात्मतत्त्वकी भावनाके बलसे देखे सुने और अनुभव किये भोगोंकी वांछारूप जो भूतकालके रागादिदोष उनका दूर करना वह **निश्चय प्रतिक्रमण,** वीतराग चिदानंद शुद्धात्माकी अनुभूतिकी भावनाके बलसे होनेवाले भोगोंकी वांछारूप रागादिकका त्याग वह **निश्चय प्रत्याख्यान** और निज शुद्धात्माकी प्राप्तिके बलसे वर्तमान उदयमें आये जो शुभ अशुभके कारण हर्षविषादादि अशुद्ध परिणाम उनको निज शुद्धात्मद्रव्यसे जुदा करना वह **निश्चय आलोचना** इस तरह निश्चय प्रतिक्रमण प्रत्याख्यान और आलोचनामें ठहरकर जो कोई व्यवहार प्रतिक्रमण व्यवहार प्रत्याख्यान व्यवहार आलोचना इन तीनके अनुकूल वन्दना निंदा आदि शुभोपयोग हैं उनको छोडता है वही ज्ञानी कहा जाता है अन्य नहीं । सारांश यह है कि ज्ञानी जीव पहले तो अशुभको त्यागकर शुभमें प्रवृत्त होता है बाद शुभको भी छोडके शुद्धमें लग जाता है । पहले किये हुए अशुभ कर्मोंकी निवृत्ति वह **व्यवहार प्रतिक्रमण,** अशुभपरिणाम होनेवाले हैं उनका रोकना वह **व्यवहार प्रत्याख्यान** और वर्तमानकालमें शुभकी प्रवृत्ति अशुभकी निवृत्ति वह **व्यवहार आलोचना** है । व्यवहारमें तो अशुभका त्याग शुभका अंगीकार होता है और निश्चयमें शुभ अशुभ दोनोंका ही त्याग होता है ॥ १९१ ॥

वंदनं निंदनं प्रतिक्रमणं ज्ञानिनां इदं न युक्तं ।
एकमेव मुक्त्वा ज्ञानमयं शुद्धं भावं पवित्रं ॥ १९२ ॥

वंदणु णिंदणु पडिकमणु वंदननिंदनप्रतिक्रमणत्रयं **णाणिहु एहु ण जुत्तु** ज्ञानिनामिदं न युक्तं । किं कृत्वा । **एक्कु जि मेल्लिवि** एकमेव मुक्त्वा । एकं कं । **णाणमउ सुद्धउ भाउ पवित्तु** ज्ञानमयं शुद्धभावं पवित्रमिति । तथाहि । पंचेंद्रियभोगाकांक्षाप्रभृतिसमस्तविभावरहितः शून्यः केवलज्ञानाद्यनंतगुणपरमात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानरूपनिर्विकल्पसमाधिसमुत्पन्नसहजानंदपरमसमरसीभावलक्षणसुखामृतरसास्वादेन भरितावस्थो योसौ ज्ञानमयो भावः तं भावं मुक्त्वाऽन्यद्व्यवहारप्रतिक्रमणप्रत्याख्यानालोचनत्रयं तदनुकूलं वंदननिंदनादिशुभोपयोगविकल्पजालं च ज्ञानिनां युक्तं न भवतीति तात्पर्यं ॥ १९२ ॥

अथ;—

वंदउ णिंदउ पडिकमउ, भाउ असुद्धउ जासु ।
पर तसु संजमु अत्थि णवि, जं मणसुद्धि ण तासु ॥ १९३ ॥

वंदतु निंदतु प्रतिक्रामतु भावः अशुद्धो यस्य ।
परं तस्य संयमोस्ति नैव यस्मात् मनःशुद्धिर्न तस्य ॥ १९३ ॥

वंदउ इत्यादि । **वंदउ णिंदउ पडिकमउ** वंदननिंदनप्रतिक्रमणं करोतु **भाउ असुद्धउ जासु** भावः परिणामः न शुद्धो यस्य परं नियमेन **तसु** तस्य पुरुषस्य **संजमु अत्थि णवि** संयमोस्ति नैव । कस्मान्नास्ति । **जं** यस्मात् कारणात् **मणसुद्धि ण तासु** मनःशुद्धिर्न

आगे इसी कथनको दृढ करते हैं;—[**वंदनं निंदनं प्रतिक्रमणं**] वंदना निंदा और प्रतिक्रमण [**इदं**] ये तीनों [**ज्ञानिनां**] पूर्ण ज्ञानियोंको [**युक्तं न**] ठीक नहीं हैं [**एकमेव**] एक [**ज्ञानमयं**] ज्ञानमय [**शुद्धं पवित्रं भावं**] पवित्र शुद्धभावको [**मुक्त्वा**] छोडकर अर्थात् इसके सिवाय ज्ञानीको कोई कार्य करना योग्य नहीं है । **भावार्थ**—पांच इंद्रियोंके भोगोंकी वांछाको आदि लेकर संपूर्ण विभावोंसे रहित जो केवलज्ञानादि अनंतगुणरूप परमात्मतत्त्व उसके सम्यक् श्रद्धान ज्ञान आचरण रूप निर्विकल्पसमाधिसे उत्पन्न जो परमानंद परमसमरसीभाव वो ही हुआ अमृतरस उसके आस्वादसे पूर्ण जो ज्ञानमयीभाव उसे छोडकर अन्य व्यवहार प्रतिक्रमण प्रत्याख्यान आलोचनाके अनुकूल वंदन निंदनादि शुभोपयोग विकल्प जाल हैं वे पूर्णज्ञानीको करने योग्य नहीं हैं । प्रथम अवस्थामें ही हैं आगे नहीं हैं ॥ १९२ ॥

आगे इसी बातको दृढ करते हैं;—[**वंदतु निंदतु प्रतिक्रामतु**] निःशंक वंदना करो निंदा करो प्रतिक्रमणादि करो लेकिन [**यस्य**] जिसके [**अशुद्धो भावः**] जब तक अशुद्ध परिणाम हैं [**तस्य**] उसके [**परं**] नियमसे [**संयमः**] संयम [**नैव अस्ति**]

तस्येति । तद्यथा । नित्यानंदैकरूपस्वशुद्धात्मानुभूतिप्रतिपक्षैर्विषयकषायाधीनैः ख्याति-पूजालाभादिमनोरथशतसहस्रविकल्पजालमालाप्रपंचोत्पन्नैरपध्यानैर्यस्य चित्तं रंजितं वासितं तिष्ठति तस्य द्रव्यरूपं वंदननिंदनप्रतिक्रमणादिकं कुर्वाणस्यापि भावसंयमो नास्ति इत्यभिप्रायः ॥ १९३ ॥ एवं मोक्षमोक्षफलमोक्षमार्गादिप्रतिपादकद्वितीयमहाधिकारमध्ये निश्चयनयेन पुण्यपापद्वयं समानमित्यादि व्याख्यानमुख्यत्वेन चतुर्दशसूत्रस्थलं समाप्तं । अथानंतरं शुद्धोपयोगादिप्रतिपादनमुख्यत्वेनैकाधिकचत्वारिंशत्सूत्रपर्यंतं व्याख्यानं करोति । तत्रांतरस्थलचतुष्टयं भवति । तद्यथा । प्रथमसूत्रपंचकेन शुद्धोपयोगव्याख्यानं करोति, तदनंतरं पंचदशसूत्रपर्यंतं वीतरागस्वसंवेदनज्ञानमुख्यत्वेन व्याख्यानं, अत ऊर्ध्वं सूत्राष्टकपर्यंतं परिग्रहत्यागमुख्यत्वेन व्याख्यानं, तदनंतरं त्रयोदशसूत्रपर्यंतं केवलज्ञानादिगुणस्वरूपेण सर्वे जीवाः समाना इति मुख्यत्वेन व्याख्यानं करोति । तद्यथा ।

रागादिविकल्पनिवृत्तिस्वरूपशुद्धोपयोगे संयमादयः सर्वे गुणास्तिष्ठंतीति प्रतिपादयति;—

सुद्धहं संजमु सीलु तउ, सुद्धहं दंसणु णाणु ।
सुद्धहं कम्मक्खउ हवइ, सुद्धउ तेण पहाणु ॥ १९४ ॥

शुद्धानां संयमः शीलं तपः शुद्धानां दर्शनं ज्ञानं ।
शुद्धानां कर्मक्षयो भवति शुद्धो तेन प्रधानः ॥ १९४ ॥

नहीं होसकता [**यत्**] क्योंकि [**तस्य**] उसके [**मनःशुद्धिः न**] मनकी शुद्धता नहीं है । जिसका मन शुद्ध नहीं उसके संयम कहांसे होसकता है । **भावार्थ**—नित्यानंद एकरूप निजशुद्धात्माकी अनुभूतिके प्रतिपक्षी (उलटे) जो विषयकषाय उनके आधीन आर्त रौद्र खोटे ध्यानोंकर जिसका चित्त रंगा हुआ है उसके द्रव्यरूप व्यवहार वंदना निदान प्रतिक्रमणादि क्या कर सकते हैं । जो वह बाह्य क्रिया करता है तौभी उसके भावसंयम नहीं है । सिद्धांतमें उसे असंयमी कहते हैं । कैसे हैं वो आर्त रौद्र स्वरूप खोटे ध्यान । अपनी बड़ाई प्रतिष्ठा और लाभादि सैंकडों मनोरथोंके विकल्पोंकी मालाके (पंक्तिके) प्रपंचकर उत्पन्न हुए हैं । जबतक ये चित्तमें हैं तबतक बाह्यक्रिया क्या करसकती है? कुछ नहीं करसकती ॥ १९३ ॥

इसतरह मोक्ष मोक्षफल मोक्षमार्गादिका कथन करनेवाले दूसरे महा अधिकारमें निश्चयनयसे पुण्य पाप दोनों समान हैं इस व्याख्यानकी मुख्यतासे चौदह दोहा कहे । आगे शुद्धोपयोगके कथनकी मुख्यतासे इकतालीस दोहाओंमें व्याख्यान करते हैं । और आठदोहाओंमें परिग्रहत्यागके व्याख्यानकी मुख्यतासे कहते हैं तथा तेरहदोहाओंमें केवल ज्ञानादिगुणस्वरूपकर सब जीव समान हैं ऐसा व्याख्यान है ।

अब प्रथम ही रागादि विकल्पकी निवृत्तिरूप शुद्धोपयोगमें संयमादि सब गुण रहते

सुद्धहं इत्यादि । **सुद्धहं** शुद्धोपयोगिनां **संजमु** इंद्रियसुखाभिलाषनिवृत्तिबलेन षड्जीवनिकायहिंसानिवृत्तिबलेनात्मना आत्मनि संयमनं नियमनं संयमः स पूर्वोक्तः शुद्धोपयोगिनामेव । अथवोपेक्षासंयमापहृतसंयमौ वीतरागसरागापरनामानौ तावपि तेषामेव संभवतः । अथवा सामायिकछेदोपस्थापनपरिहारविशुद्धिसूक्ष्मसांपरायथाख्यातभेदेन पंचधा संयमः सोपि लभ्यते तेषामेव । **सीलु** स्वात्मना कृत्वा स्वात्मनिवृत्तिर्वर्तनं इति निश्चयव्रतं, व्रतस्य रागादिपरिहारेण परिरक्षणं निश्चयशीलं तदपि तेषामेव । **तउ** द्वादशविधतपश्चरणबलेन परद्रव्येच्छानिरोधं कृत्वा शुद्धात्मनि प्रतपनं विजयनं तप इति । तदपि तेषामेव । **सुद्धहं** शुद्धोपयोगिनां **दंसणु** छद्मस्थावस्थायां स्वशुद्धात्मनि रुचिरूपं सम्यग्दर्शनं केवलज्ञानोत्पत्तौ सत्यां तस्यैव फलभूतं अनीहितविपरीताभिनिवेशरहितं परिणामलक्षणं क्षायिकसम्यक्त्वं केवलदर्शनं वा । तेषामेव । **णाणु** वीतरागस्वसंवेदनज्ञानं तस्यैव फलभूतं केवलज्ञानं वा **सुद्धहं** शुद्धोपयोगिनामेव । **कम्मक्खउ** परमात्मस्वरूपोपलब्धिलक्षणो द्रव्यभावकर्मक्षयः **हवइ** तेषामेव भवति **सुद्धहु** शुद्धोपयोगपरिणामस्तदाधारपुरुषो वा **तेण पहाणु** येन कारणेन पूर्वोक्ताः संयमादयो गुणाः शुद्धोपयोगे लभ्यंते तेन कारणेन स एव प्रधान

हैं ऐसा वर्णन करते हैं;—[**शुद्धानां**] शुद्धोपयोगियोंके ही [**संयमः शीलं तपः**] पांच इन्द्री छठें मनको रोकनेरूप संयम, शील और तप [**भवति**] होते हैं [**शुद्धानां**] शुद्धोंके ही [**दर्शनं ज्ञानं**] सम्यग्दर्शन और वीतरागस्वसंवेदनज्ञान और [**शुद्धानां**] शुद्धोपयोगियोंके ही [**कर्मक्षयः**] कर्मोंका नाश होता है [**तेन**] इसलिये [**शुद्धः**] शुद्धोपयोग ही [**प्रधानः**] जगतमें मुख्य है । **भावार्थ**—शुद्धोपयोगियोंके; पांच इंद्री छठे मनका रोकना, विषयाभिलाषकी निवृत्ति और छहकायके जीवोंकी हिंसासे निवृत्ति उसके बलसे आत्मामें निश्चल रहना उसका नाम **संयम** है वह होता है, अथवा उपेक्षा संयम अर्थात् तीनगुप्तिमें आरूढ और अपहृत संयम अर्थात् पांच समितिका पालना, अथवा सराग संयम अर्थात् शुभोपयोगरूपसंयम और वीतरागसंयम अर्थात् शुद्धोपयोगरूप परमसंयम वह उन शुद्ध चेतनोपयोगियोंके ही होता है । **शील** अर्थात् अपनेसे अपने आत्मामें प्रवृत्ति करना यह निश्चयशील, रागादिके त्यागनेसे शुद्धभावकी रक्षा करना वह भी निश्चय शील है, और देवांगना मनुष्यनी तिर्यंचनी तथा काठ पत्थर चित्रामादि अचेतन स्त्री-ऐसे चार प्रकारकी स्त्री उनका मन वचनकाय कृत कारित अनुमोदनासे त्याग करना वह व्यवहार शील ये दोनों शील शुद्धचित्तवालोंके ही होते हैं । **तप** अर्थात् बारह तरहका तप उसके बलसे भावकर्म द्रव्यकर्म नोकर्मरूप सब वस्तुओंमें इच्छा छोडकर शुद्धात्मामें मग्न रहना काम क्रोधादि शत्रुओंके वशमें न होना, प्रतापरूप विजयरूप जितेंद्री रहना है । यह तप शुद्ध चित्तवालोंके ही होता है । **दर्शन** अर्थात् साधक अव-

उपादेयः इति तात्पर्यं । तथा चोक्तं शुद्धोपयोगफलं । "सुद्धस्स य सामण्णं भणियं सुद्धस्स दंसणं णाणं । सुद्धस्स य णिव्वाणं सो वि य सुद्धो णमो तस्स ॥" ॥ १९४ ॥

अथ निश्चयेन स्वकीयशुद्धभाव एव धर्म इति कथयति;—

भाउ विसुद्धउ अप्पणउ, धम्मु भणेविणु लेहु ।
चउगइदुक्खहं जो धरइ, जीउ पडंतउ एहु ॥ १९५ ॥

भावो विशुद्ध आत्मीयः धर्मं भणित्वा गृह्णीथाः ।
चतुर्गतिदुःखेभ्यः यो धरति जीवं पतंतमिमं ॥ १९५ ॥

भाउ इत्यादि । **भाउ** भावः परिणामः । कथंभूतः । **विसुद्धउ** विशेषेण शुद्धो मिथ्यात्वरागादिरहितः **अप्पणउ** आत्मीयः **धम्मु भणेविणु लेहु** धर्मं भणित्वा मत्वा प्रगृह्णीथाः । यो धर्मः किं करोति । **चउगइ दुक्खहं जो धरइ** चतुर्गतिदुःखेभ्यः सकाशात् उद्धृत्य यः कर्ता धरति । कं धरति । **जीउ पडंतउ एहु** जीवमिमं प्रत्यक्षीभूतं संसारे पतंतमिति । तद्यथा । धर्मशब्दस्य व्युत्पत्तिः क्रियते । संसारे पतंतं प्राणिनमुद्धृत्य नरेंद्रनागेंद्रदेवेंद्रवंद्ये मोक्षपदे धरतीति धर्म इति धर्मशब्देनात्र निश्चयेन जीवस्य शुद्धपरिणाम एव

स्थामें तो शुद्धात्मामें रुचिरूप सम्यग्दर्शन और केवली अवस्थामें उस सम्यग्दर्शनका फलरूप संशय विमोह विभ्रम रहित निजपरिणामरूप क्षायिकसम्यक्त्व केवलदर्शन यह भी शुद्धोंके ही होता है । **ज्ञान** अर्थात् वीतरागस्वसंवेदनज्ञान और उसका फल केवलज्ञान वह भी शुद्धोपयोगियोंके ही होता है और कर्मक्षय अर्थात् द्रव्यकर्म भावकर्म और नोकर्मका नाश तथा परमात्मस्वरूपकी प्राप्ति वह भी शुद्धोपयोगियोंके ही होती है । इसलिये शुद्धोपयोग परिणाम और उन परिणामोंका धारण करनेवाला पुरुष ही जगतमें प्रधान है । क्योंकि संयमादि सर्व गुण शुद्धोपयोगमें ही पाये जाते हैं । इसलिये शुद्धोपयोगके समान अन्य नहीं है ऐसा तात्पर्य जानना । ऐसा ही कथन अन्य ग्रंथोंमें हर एक जगह "सुद्ध" इत्यादिसे कहा गया है । उसका भावार्थ यह है कि शुद्धोपयोगीके ही मुनिपद कहा है और उसीके दर्शन ज्ञान कहे हैं । उसीके निर्वाण है और वही शुद्ध अर्थात् रागादि रहित है । उसीको हमारा नमस्कार है ॥ १९४ ॥

आगे यह कहते हैं कि निश्चयसे अपना शुद्धभाव ही धर्म है;—[**विशुद्धः भावः**] मिथ्यात्वरागादिसे रहित जो शुद्ध परिणाम है वही [**आत्मीयः**] अपना है और अशुद्ध परिणाम अपने नहीं हैं सो शुद्ध भावको ही [**धर्मं भणित्वा**] धर्म समझकर [**गृह्णीथाः**] अंगीकार करो । [**यः**] जो आत्मधर्म [**चतुर्गतिदुःखेभ्यः**] चारों गतियोंके दुःखोंसे [**पतंतं**] संसारमें पड़े हुए [**इमं जीवं**] इस जीवको निकालकर [**धरति**] आनंदस्थानमें रखता है ॥ **भावार्थ**—धर्मशब्दका शब्दार्थ ऐसे है कि संसारमें

ग्राह्यः । तस्य तु मध्ये वीतरागसर्वज्ञप्रणीतनयविभागेन सर्वे धर्मांतर्भूता लभ्यंते । तथा अहिंसालक्षणो धर्मः सोपि जीवशुद्धभावं विना न संभवति । सागारानगारलक्षणो धर्मः सोपि तथैव । उत्तमक्षमादिदशविधो धर्मः सोपि जीवशुद्धभावमपेक्षते । सद्दृष्टिज्ञानवृत्तानि धर्मं धर्मेश्वरा विदुरित्युक्तं यद्धर्मलक्षणं तदपि तथैव । रागद्वेषमोहरहितः परिणामो धर्मः सोपि जीवशुद्धभाव एव । वस्तुस्वभावो धर्मः सोपि तथैव । तथा चोक्तं । "धम्मो वत्थुसहावो" इत्यादि । एवं गुणविशिष्टो धर्मश्चतुर्गतिदुःखेषु पतंतं धरतीति धर्मः । अत्राह शिष्यः । पूर्वसूत्रे भणितं शुद्धोपयोगमध्ये संयमादयः सर्वे गुणाः लभ्यंते । अत्र तु भणितमात्मनः शुद्धपरिणाम एव धर्मः सूत्रे सर्वे धर्माश्च लभ्यंते । को विशेषः । परिहारमाह । तत्र शुद्धोपयोगसंज्ञा मुख्या अत्र तु धर्मसंज्ञा मुख्यैतावान् विशेषः । तात्पर्यं तदेव । तेन कारणेन सर्वप्रकारेण शुद्धपरिणाम एव कर्तव्य इति भावार्थः ॥ १९५ ॥

पड़ते हुए प्राणियोंको निकालकर मोक्षपदमें रखै वह धर्म है । वह मोक्षपद देवेंद्र नागेन्द्र नरेंद्रोंकर वंदने योग्य है । जो आत्माका निज स्वभाव है वही धर्म है उसीमें जिनभाषित सब धर्म पाये जाते हैं । जो दयास्वरूप धर्म है वह भी जीवके शुद्धभावोंके विना नहीं होता, यति श्रावकका धर्म भी शुद्धभावोंके विना नहीं होता, उत्तम क्षमादि दक्षलक्षणधर्म भी शुद्धभाव विना नहीं होसकता और रत्नत्रयधर्म भी शुद्धभावोंके विना नहीं हो सकता । ऐसा ही कथन जगह२ ग्रंथोंमें कहा है "सद्दृष्टि" इत्यादि श्लोकसे । उसका अर्थ यह है कि धर्मके ईश्वर भगवानने सम्यग्दर्शन ज्ञान चारित्र इन तीनोंको धर्म कहा है । जिस धर्मके ये ऊपर कहे गये लक्षण हैं वह रागद्वेष मोह रहित परिणाम धर्म है वह जीवका स्वभाव ही है क्योंकि वस्तुका स्वभाव ही धर्म है । ऐसा दूसरी जगह भी "धम्मो" इत्यादि गाथासे कहा है कि जो आत्मवस्तुका स्वभाव है वह धर्म है उत्तमक्षमादि भावरूप दस प्रकारका धर्म है रत्नत्रय धर्म है और जीवोंकी रक्षा वह धर्म है । यह जिन भाषित धर्म चतुर्गतिके दुःखोंमें पडते हुए जीवको उद्धारता है । यहां शिष्यने प्रश्न किया कि जो पहले दोहामें तो तुमने शुद्धोपयोगमें संयमादि सब गुण कहे और यहां आत्माका शुद्ध परिणाम ही धर्म कहा है उसमें धर्म पाये जाते हैं सो पहले दोहेमें और इसमें क्या भेद है । उसका समाधान । पहले दोहामें तो शुद्धोपयोग मुख्य कहा था और इस दोहेमें धर्म मुख्य कहा है । शुद्धोपयोगका ही नाम धर्म है तथा धर्मका ही नाम शुद्धोपयोग है । शब्दका भेद है अर्थका भेद नहीं है दोनोंका तात्पर्य एक है । इसलिये सब तरह शुद्ध परिणाम ही कर्तव्य है वही धर्म है ॥ १९५ ॥

अथ विशुद्धभाव एव मोक्षमार्ग इति दर्शयति;—

सिद्धिहिं केरा, पंथडा, भाउ विसुद्धउ एकु ।
जो तसु भावहं मुणि चलइ, सो किम होइ विमुक्कु ॥ १९६ ॥

सिद्धेः संबंधी पंथाः भावो विशुद्ध एकः ।
यः तस्माद्भावात् मुनिश्चलति स कथं भवति विमुक्तः ॥ १९६ ॥

सिद्धिहिं इत्यादि । **सिद्धिहिं केरा** सिद्धेर्मुक्तेः संबंधी **पंथडा** पंथा मार्गः । कोसौ । **भाउ** भावः परिणामः । कथंभूतः । **विसुद्धउ** विशुद्धः **एकु** एक एवाद्वितीयः । **जो तसु भावहं मुणि चलइ** यस्तस्माद्भावान्मुनिश्चलति **सो किम होइ विमुक्कु** स मुनिः कथं मुक्तो भवति न कथमपीति । तद्यथा । योसौ समस्तशुभाशुभसंकल्पविकल्परहितो जीवस्य शुद्धभावः स एव निश्चयरत्नत्रयात्मको मोक्षमार्गः । यस्तस्मात् शुद्धात्मपरिणामान्मुनिश्च्युतो भवति स कथं मोक्षं लभते किं तु नैव । अत्र येन कारणेन निजशुद्धात्मानुभूतिपरिणाम एव मोक्षमार्गस्तेन कारणेन मोक्षार्थिना स एव निरंतरं कर्तव्य इति तात्पर्यार्थः ॥ १९६ ॥

अथ क्वापि देशे गच्छ किमप्यनुष्ठानं कुरु तथापि चित्तशुद्धिं विना मोक्षो नास्तीति प्रकटयति;—

जहिं भावइ तहिं जाहि जिय, जं भावइ करि तं जि ।
केम्वइ मोक्खु ण अत्थि पर, चित्तहं सुद्धि ण जं जि ॥ १९७ ॥

यत्र भाति तत्र याहि जीव यद् भाति कुरु तदेव ।
कथमपि मोक्षः नास्ति परं चित्तस्य शुद्धिर्न यदेव ॥ १९७ ॥

जहिं भावइ इत्यादि । **जहिं भावइ तहिं** यत्र देशे प्रतिभाति तत्र **जाहि** गच्छ **जिय**

आगे शुद्धभाव ही मोक्षका मार्ग है ऐसा दिखलाते हैं;—[**सिद्धेः संबंधी**] मुक्तिका [**पंथाः**] मार्ग [**एकः विशुद्धः भावः**] एक शुद्ध भाव ही है [**यः मुनिः**] जो मुनि [**तस्मात् भावात्**] उस शुद्ध भावसे [**चलति**] चलायमान होजावे [**सः**] वह [**कथं**] कैसे [**विमुक्तः**] मुक्त [**भवति**] होसकता है किसीप्रकार नहीं होसकता । **भावार्थ**—जो समस्त शुभाशुभ संकल्प विकल्पोंसे रहित जीवका शुद्ध भाव है वही निश्चय रत्नत्रयस्वरूप मोक्षका मार्ग है । जो मुनि शुद्धात्मपरिणामसे च्युत होजावे वह किसतरह मोक्षको पासकता है नहीं पासकता । मोक्षका मार्ग एक शुद्ध भाव ही है, इसलिये मोक्षके इच्छकको वही भाव हमेशा करना चाहिये ॥ १९६ ॥

आगे यह प्रकट करते हैं कि किसी देशमें जावो चाहे जो तप करो तौभी चित्तकी शुद्धिके विना मोक्ष नहीं है;—[**हे जीव**] हे जीव [**यत्र**] जहां [**भाति**] तेरी इच्छा

हे जीव जं भावइ करि तं जि यदनुष्ठानं प्रतिभाति कुरु तदेव केम्वइ मोक्खु ण अत्थि कथमपि केनापि प्रकारेण मोक्षो नास्ति परं नियमेन । कस्मात् । चित्तहं सुद्धि ण चित्तस्य शुद्धिर्न जं जि यस्मादेव कारणात् इति । तथाहि । ख्यातिपूजालाभदृष्टश्रुतानुभूतभोगाकांक्षारूपदुर्ध्यानैः शुद्धात्मानुभूतिप्रतिपक्षभूतैर्यावत्कालं चित्तं रंजितं मूर्छितं तन्मयं तिष्ठति तावत्कालं हे जीव कापि देशांतरे गच्छ किमप्यनुष्ठानं कुरु तथापि मोक्षो नास्तीति । अत्र कामक्रोधादिभिरपध्यानैर्जीवो भोगानुभवं विनापि शुद्धात्मभावनाच्युतः सन् भावेन कर्माणि बध्नाति तेन कारणेन निरंतरं चित्तशुद्धिः कर्तव्येति भावार्थः ॥ तथा चोक्तं । "कंखिदकुलुखिदभूदो हु कामभोगेहिं मुच्छिदो जीवो । णवि भुंजंतो भोगे बंधदि भावेण कम्माणि" १९७

अथ शुभाशुभशुद्धोपयोगत्रयं कथयति;—

सुहपरिणामें धम्मु पर, असुहें होइ अहम्मु ।
दोहिंवि एहिं विवज्जियउ, सुद्धु ण बंधइ कम्मु ॥ १९८ ॥

शुभपरिणामेन धर्मः परं अशुभेन भवति अधर्मः ।
द्वाभ्यामपि एताभ्यां विवर्जितः शुद्धो न बध्नाति कर्म ॥ १९८ ॥

सुह इत्यादि पदखंडनारूपेण व्याख्यानं क्रियते । सुहपरिणामें धम्मु पर शुभपरिणामेन धर्मः पुण्यं भवति मुख्यवृत्त्या असुहें होइ अहम्मु अशुभपरिणामेन भवत्यधर्मः

हो [तत्र] उसीदेशमें [याहि] जा और [यत्] जो [भाति] अच्छा लगे [तदेव] वही [कुरु] कर [परं] लेकिन [यदेव] जब तक [चित्तस्य शुद्धिः न] मनकी शुद्धि नहीं है तब तक [कथमपि] किसीतरह [मोक्षो नास्ति] मोक्ष नहीं होसकती । **भावार्थ**—बडाई प्रतिष्ठा परवस्तुका लाभ और देखे सुने भोगे हुए भोगों की वांछारूप खोटे ध्यान 'जो कि शुद्धात्मज्ञानके शत्रु हैं' इनसे जबतक यह चित्त रंगा हुआ है अर्थात् विषयकषायोंसे तन्मई है तबतक हे जीव किसी देशमें जा तीर्थादिकोंमें भ्रमणकर अथवा चाहे जैसा आचरणकर किसीप्रकार मोक्ष नहीं है । सारांश यह है कि कामक्रोधादि खोटेध्यानसे यह जीव भोगोंके सेवने विना भी शुद्धात्मभावनासे च्युत हुआ अशुद्ध भावों करके कर्मोंको बांधता है । इसलिये हमेशा चित्तकी शुद्धता रखनी चाहिये । ऐसा ही कथन दूसरी जगह भी "कंखिद" इत्यादि गाथासे कहा है । कि इस लोक और परलोकके भोगोंका अभिलाषी और कषायोंसे कालिमारूप हुआ अवर्तमान विषयोंका वांछक और वर्तमान विषयोंमें अत्यंत आसक्त हुआ अति मोहित होनेसे भोगोंको नहीं भोगता हुआ भी अशुद्ध भावोंसे कर्मोंको बांधता है ॥ १९७ ॥

आगे शुभ अशुभ और शुद्ध इन तीन उपयोगोंको कहते हैं;—[शुभपरिणामेन] दानपूजादि शुभपरिणामोंसे [धर्मः] पुण्यरूप व्यवहारधर्म [परं] मुख्यतासे [भवति]

पापं **दोहिंवि एहिं विवज्जियउ** द्वाभ्यां एताभ्यां शुभाशुभपरिणामाभ्यां विवर्जितः । कोसौ । **सुद्धु** शुद्धो मिथ्यात्वरागादिरहितपरिणामस्तत्परिणतपुरुषो वा । किंकरोति । **ण बंधइ** न बध्नाति । किं । **कम्मु** ज्ञानावरणादिकर्मेति । तद्यथा । कृष्णोपाधिपीतोपाधिस्फटिकवदयमात्मा क्रमेण शुभाशुभशुद्धोपयोगरूपेण परिणामत्रयं परिणमति । तेन तु मिथ्यात्वविषयकषायाद्यवलंबनेन पापं बध्नाति । अर्हत्सिद्धाचार्योपाध्यायसाधुगुणस्मरणदानपूजादिना संसारस्थितिछेदपूर्वकं तीर्थकरनाम–कर्मादिविशिष्टगुणपुण्यमनीहितवृत्त्या बध्नाति । शुद्धात्मावलंबनेन शुद्धोपयोगेन तु केवलज्ञानाद्यनंतगुणरूपं मोक्षं च लभते इति । अत्रोपयोगत्रयमध्ये मुख्यवृत्त्या शुद्धोपयोग एवोपादेय इत्यभिप्रायः ॥ १९८ ॥ एवमेकचत्वारिंशत्सूत्रप्रमितमहास्थलमध्ये सूत्रपंचकेन शुद्धोपयोगव्याख्यानमुख्यत्वेन प्रथमांतरस्थलं गतं । अत ऊर्ध्वं तस्मिन्नेव महास्थलमध्ये पंचदशसूत्रपर्यंतं वीतरागस्वसंवेदनज्ञानमुख्यत्वेन व्याख्यानं क्रियते ।

तद्यथा;—

दाणिं लब्भइ भोउ पर, इंदत्तणु वि तवेण ।
जम्मणमरणविवज्जियउ, पउ लब्भइ णाणेण ॥ १९९ ॥

होता है [**अशुभेन**] विषय कषायादि अशुभ परिणामोंसे [**अधर्मः**] पाप होता है [**अपि**] और [**एताभ्यां**] इन [**द्वाभ्यां**] दोनोंसे [**विवर्जितः**] रहित [**शुद्धः**] मिथ्यात्वरागादिरहित शुद्ध परिणाम अथवा परिणामधारी पुरुष [**कर्म**] ज्ञानावरणादि कर्मको [**न**] नहीं [**बध्नाति**] बांधता । **भावार्थ**— जैसे स्फटिकमणि शुद्ध उज्वल है उसके जो काला डंक लगावें तो काली मालूम होती है और पीला डंक लगावें तो पीली भासती है तथा यदि कुछ भी न लगावें तो शुद्ध स्फटिक ही है उसी तरह यह आत्मा क्रमसे अशुभ शुभ शुद्ध इन परिणामोंसे परिणत होता है । उनमेंसे मिथ्यात्व और विषय कषायादि अशुभके अवलंबन (सहायता)से तो पापको ही बांधता है उसके फलसे नरकनिगोदादिके दुःखोंको भोगता है । और अरहंत सिद्ध आचार्य उपाध्याय साधु इन पांच परमेष्ठियोंके गुणस्मरण और दानपूजादि शुभक्रियाओंसे संसारकी स्थितिका छेदनेवाला जो तीर्थंकर नामकर्म उसको आदिले विशिष्टगुणरूप पुन्यप्रकृतियोंको अवांछीक वृत्तिसे बांधता है तथा केवल शुद्धात्माके अवलंबनरूप शुद्धोपयोगसे उसीभवमें केवलज्ञानादि अनंतगुणरूप मोक्षको पाता है । इन तीन प्रकारके उपयोगोंमेंसे सर्वथा उपादेय तो शुद्धोपयोग ही है अन्य नहीं है । और शुभ अशुभ इन दोनोंमेंसे अशुभ तो सब प्रकारसे निषिद्ध है नरकनिगोदका कारण है किसीतरह उपादेय नहीं है हेय है तथा शुभोपयोग प्रथम अवस्थामें उपादेय है और परम अवस्थामें उपादेय नहीं है हेय है ॥ १९८ ॥

दानेन लभ्यंते भोगाः परं इंद्रत्वमपि तपसा ।
जन्ममरणविवर्जितं पदं लभ्यते ज्ञानेन ॥ १९९ ॥

दाणिं इत्यादि । **दाणिं लब्भइ भोउ** दानेन लभ्यंते पंचेंद्रियभोगाः परं नियमेन **इंदत्तणुवि तवेण** इंद्रत्वमपि तपसा लभ्यते **जम्मणमरणविवज्जियउ** जन्ममरणविवर्जितं **पउ** पदं स्थानं **लब्भइ** लभ्यते प्राप्यते । केन । **णाणेण** वीतरागस्वसंवेदनज्ञानेनेति । तथाहि । आहारभयभैषज्यशास्त्रदानेन सम्यक्त्वरहितेन भोगो लभ्यते । सम्यक्त्वसहितेन तु यद्यपि परंपरया निर्वाणं लभ्यते तथापि विविधाभ्युदयरूपः पंचेंद्रियभोग एव । सम्यक्त्वसहितेन तपसा तु यद्यपि निर्वाणं लभ्यते तथापि देवेंद्रचक्रवर्त्यादिविभूतिपूर्वकेणैव । वीतरागस्वसंवेदनसम्यग्ज्ञानेन सविकल्पेन यद्यपि देवेंद्रचक्रवर्त्यादिविभूतिविशेषो भवति तथापि निर्विकल्पेन मोक्ष एवेति । अत्राह प्रभाकरभट्टः । हे भगवन् यदि विज्ञानमात्रेण मोक्षो भवति तर्हि सांख्यादयो वदंति ज्ञानमात्रादेव मोक्षः तेषां किमिति दूषणं दीयते भवद्भिरिति । भगवानाह । अत्र वीतरागनिर्विकल्पस्वसंवेदनसम्यग्ज्ञानमिति भणितं तिष्ठति तेन वीतरागविशेषणेन चारित्रं लभ्यते सम्यग्विशेषणेन सम्यक्त्वमपि लभ्यते पानकवदेकस्यापि मध्ये त्रयमस्ति । तेषां मते तु वीतरागविशेषणं नास्ति सम्यग्विशेषणं च नास्ति ज्ञानमात्रमेव । तेन दूषणं भवतीति भावार्थः ॥ १९९ ॥

इस प्रकार इकतालीस दोहाओंके महास्थलमें पांच दोहाओंमें शुद्धोपयोगका व्याख्यान किया । आगे पंद्रह दोहाओंमें वीतराग स्वसंवेदन ज्ञानकी मुख्यतासे व्याख्यान करते हैं;— [**दानेन**] दानसे [**परं**] नियमकरके [**भोगाः**] पांच इंद्रियोंके भोग [**लभ्यंते**] प्राप्त होते हैं [**अपि**] और [**तपसा**] तपसे [**इंद्रत्वं**] इंद्रपद मिलता है तथा [**ज्ञानेन**] वीतरागस्वसंवेदनज्ञानसे [**जन्ममरणविवर्जितं**] जन्म जरा मरणसे रहित [**पदं**] जो मोक्षपद वह [**लभ्यते**] मिलता है ॥ **भावार्थ**—आहार अभय औषध और शास्त्र इन चार तरहके दानोंको यदि सम्यक्त्वरहित करे तो भोगभूमिके सुख पाता है तथा सम्यक्त्वसहित दान करे तो परंपराय मोक्ष पाता है । यद्यपि प्रथम अवस्थामें देवेंद्रचक्रवर्ती आदिकी विभूति भी पाता है, तौ भी निर्विकल्प स्वसंवेदन ज्ञानकर मोक्ष ही है । यहां प्रभाकर भट्टने प्रश्न किया कि हे भगवन् जो ज्ञानमात्रसे ही मोक्ष होती है तो सांख्यादिक भी ऐसे ही कहते हैं कि ज्ञानसे ही मोक्ष है उनको क्यों दूषण देते हो । तब श्रीगुरुने कहा । इस जिनशासनमें वीतरागनिर्विकल्प स्वसंवेदन सम्यग्ज्ञान कहा गया है सो वीतराग कहनेसे वीतराग चारित्र भी आ जाता है और सम्यक् पदके कहनेसे सम्यक्त्व भी आ जाता है । जैसे एक चूर्णमें अथवा पाकमें अनेक औषधि आ जाती हैं परंतु वस्तु एक ही कहलाती है उसीतरह वीतरागनिर्विकल्पस्वसंवेदन ज्ञानके

अथ तमेवार्थं विपक्षदूषणद्वारेण दृढयति;—

देउ णिरंजणु इउं भणइ, णाणिं मुक्खु ण भंति ।
णाणविहीणा जीवडा, चिरु संसारु भमंति ॥ २०० ॥

देवः निरंजन एवं भणति ज्ञानेन मोक्षो न भ्रांतिः ।
ज्ञानविहीना जीवाः चिरं संसारं भ्रमंति ॥ २०० ॥

देउ इत्यादि । **देउ** देवः । किंविशिष्टः । **णिरंजणु** निरंजनः अनंतज्ञानादिगुणसहितोष्टादशदोषरहितश्च **इउं भणइ** एवं भणति । एवं किं । **णाणिं मुक्खु** वीतरागनिर्विकल्पस्वसंवेदनरूपेण सम्यग्ज्ञानेन मोक्षो भवति । **ण भंति** न भ्रांतिः संदेहो नास्ति । **णाणविहीणा जीवडा** पूर्वोक्तस्वसंवेदनज्ञानेन विहीना जीवाः **चिरु संसारु भमंति** चिरं बहुतरं कालं संसारं परिभ्रमंति इति । अत्र वीतरागस्वसंवेदनज्ञानमध्ये यद्यपि सम्यक्त्वादित्रयमस्ति तथापि सम्यग्ज्ञानस्यैव मुख्यता । विवक्षितो मुख्य इति वचनादिति भावार्थः ॥ २०० ॥

अथ पुनरपि तमेवार्थं दृष्टांतदार्ष्टांतिकाभ्यां निश्चिनोति;—

णाणविहीणहं मोक्खपउ, जीव म कासुवि जोइ ।
बहुएं सलिलविरोलियइं, करु चोप्पडउ ण होइ ॥ २०१ ॥

ज्ञानविहीनस्य मोक्षपदं जीव मा कस्यापि अद्राक्षीः ।
बहुना सलिलविलोडितेन करः चिक्कणो न भवति ॥ २०१ ॥

णाण इत्यादि । **णाणविहीणहं** ख्यातिपूजालाभादिदुष्टभावपरिणतचित्तं मम कोपि न

कहनेसे सम्यग्दर्शन ज्ञान चारित्र-ये तीनों आजाते हैं । सांख्यादिकके मतमें वीतराग विशेषण नहीं है और सम्यक् विशेषण नहीं है केवल ज्ञानमात्र ही कहते हैं सो वह मिथ्याज्ञान है इसलिये दूषण देते हैं । यह जानना ॥ १९९ ॥

आगे उसी अर्थको विपक्षीको दूषण देकर दृढ करते हैं;—[**निरंजनः**] अनंत ज्ञानादि गुण सहित और अठारह दोष रहित जो [**देवः**] सर्वज्ञ वीतरागदेव हैं वे [**एवं**] ऐसा [**भणति**] कहते हैं कि [**ज्ञानेन**] वीतरागनिर्विकल्प स्वसंवेदनरूप सम्यग्ज्ञानसे ही [**मोक्षः**] मोक्ष है इसमें [**न भ्रांतिः**] इसमें संदेह नहीं है । और [**ज्ञानविहीनाः**] स्वसंवेदनज्ञानकर रहित जो [**जीवाः**] जीव हैं वे [**चिरं**] बहुत काल तक [**संसारं**] संसारमें [**भ्रमंति**] भटकते हैं । **भावार्थ**—यहां वीतरागस्वसंवेदनज्ञानमें यद्यपि सम्यक्त्वादि तीनों हैं तौभी मुख्यता सम्यग्ज्ञानकी ही है । क्योंकि श्रीजिन वचनमें ऐसा कथन किया है कि जिसका कथन किया जावे वह मुख्य होता है और अन्य गौण होता है । ऐसा जानना ॥ २०० ॥

आगे फिरभी इसी कथनको दृष्टांत और दार्ष्टांतसे निश्चय करते हैं;—[**ज्ञानविही-**

जानातीति मत्त्वा वीतरागपरमानंदैकसुखरसानुभवरूपं चित्तशुद्धिमकुर्वाणस्य बहिरंगबकवेषेण लोकरंजनं मायास्थानं तदेव शल्यं तत्प्रभृतिसमस्तविकल्पकल्लोलमालात्यागेन निजशुद्धात्मसंवित्तिनिश्चयेन संज्ञासम्यग्ज्ञानेन विना **मोक्खपउ** मोक्षपदं स्वरूपं **जीव** हे जीव **म काहुवि जोइ** मा कस्याप्यद्राक्षीः । दृष्टांतमाह । **बहुयइं सलिलविलोरियइं** बहुनापि सलिलेन मथितेन **करु** करो हस्तः **चुप्पडउ ण होइ** चिक्कणः स्निग्धो न भवतीति । अत्र यथा बहुतरमपि सलेले मथितेपि हस्तः स्निग्धो न भवतीति तथा वीतरागशुद्धात्मानुभूतिलक्षणेन ज्ञानेन विना बहुनापि तपसा मोक्षो न भवतीति तात्पर्यं ॥ २०१ ॥

अथ निश्चयनयेन निजात्मबोधज्ञानबाह्यं ज्ञानं तेन प्रयोजनं नास्तीत्यभिप्रायं मनसि संप्रधार्य सूत्रमिदं प्रतिपादयति;—

जं णियबोहहं बाहिरउ, णाणु जि कज्जु ण तेण ।
दुक्खहं करणु जेण तउ, जीवहं होइ खणेण ॥ २०२ ॥

यत् निजबोधाद्बाह्यं ज्ञानमपि कार्यं न तेन ।
दुःखस्य कारणं येन तपः जीवस्य भवति क्षणेन ॥ २०२ ॥

जं इत्यादि । **जं** यत् **णियबोहहं बाहिरउ** दानपूजातपश्चरणादिकं कृत्वापि दृष्टश्रुतानुभूतभोगाकांक्षावासितचित्तेन रूपलावण्यसौभाग्यबलदेववासुदेवकामदेवेंद्रादिपदप्राप्तिरूपभा-

---

नस्य] जो सम्यग्ज्ञानकर रहित मलिन चित्त है अर्थात् अपनी बड़ाई प्रतिष्ठालाभादि दुष्टभावोंसे जिसका चित्त परिणत हुआहै और मनमें ऐसा जानता है कि हमारी दुष्टताको कोई नहीं जान सकता ऐसा समझकर वीतराग परमानंदसुखरसके अनुभवरूप चित्तकी शुद्धिको नहीं करता, तथा बाहरसे बगुलाकासा भेष मायाचाररूप लोकरंजनकेलिये धारण किया है यही सत्य है इसी भेषसे हमारा कल्याण होगा इत्यादि अनेक विकल्पोंकी कल्लोलोंसे अपवित्र है ऐसे [**कस्यापि**] किसी अज्ञानीके [**मोक्षपदं**] मोक्षपदवी [**जीव**] हे जीव [**मा द्राक्षीः**] मत देखै अर्थात् विना सम्यग्ज्ञानके मोक्ष नहीं होती । उसका दृष्टांत कहते हैं [**बहुना**] बहुत [**सलिलविलोडितेन**] पानीके मथनेसे भी [**करः**] हाथ [**चिक्कणः**] चीकना [**न भवति**] नहीं होता । क्योंकि जलमें चिकनापन है ही नहीं । जैसे जलमें चिकणाई नहीं है वैसे बाहिरी भेषमें सम्यग्ज्ञान नहीं है । सम्यग्ज्ञानके विना महान तप करो तौभी मोक्ष नहीं होती । क्योंकि सम्यग्ज्ञानका लक्षण वीतराग शुद्धात्माकी अनुभूति है वही मोक्षका मूल है । वह सम्यग्ज्ञान सम्यग्दर्शनादिसे भिन्न नहीं है, तीनों एक हैं ॥ २०१ ॥

आगे निश्चयकर आत्मज्ञानसे बहिर्मुख बाह्यपदार्थोंका ज्ञान है उससे प्रयोजन नहीं सधता ऐसा अभिप्राय मनमें रखकर कहते हैं;—[**यत्**] जो [**निजबोधात्**] आत्म-

विभोगाशाकरणं यन्निदानबंधस्तदेव शल्यं तत्प्रभृतिसमस्तमनोरथविकल्पज्वालावलीरहितत्वेन विशुद्धज्ञानदर्शनस्वभावनिजात्मावबोधो निजबोधः तस्मान्निजबोधाद्बाह्यं यत् **णाणु जि कज्जु ण तेण** शास्त्रादिजनितं ज्ञानमपि यत्तेन कार्यं नास्ति । कस्मादितिचेत् । **दुक्खहं कारणु** दुःखस्य कारणं **जेण** येन कारणेन **तउ** वीतरागस्वसंवेदनरहितं तपः **जीवहं** जीवस्य **होइ** भवति **खणेण** क्षणमात्रेण कालेनेति । अत्र यद्यपि शास्त्रजनितं ज्ञानं स्वशुद्धात्मपरिज्ञानरहितं तपश्चरणं च मुख्यवृत्त्या पुण्यकारणं भवति तथापि मुक्तिकारणं न भवतीत्यभिप्रायः ॥ २०२ ॥

अथ येन मिथ्यात्वरागादिवृद्धिर्भवति तदात्मज्ञानं न भवतीति निरूपयति;—

तं णियणाणु जि होइ णवि, जेण पवड्ढइ राउ ।
दिणयरकिरणहं पुरउ जिय, किं विलसइ तमराउ ॥ २०३ ॥

तत् निजज्ञानमेव भवति नापि येन प्रवर्धते रागः ।
दिनकरकिरणानां पुरतः जीव किं विलसति तमोरागः ॥ २०३ ॥

ज्ञानसे [**बाह्यं**] बाहर (रहित) [**ज्ञानमपि**] शास्त्रवगैरः का ज्ञान भी है [**तेन**] उस ज्ञानसे [**कार्यं न**] कुछ काम नहीं [**येन**] क्योंकि [**तपः**] वीतरागस्वसंवेदनज्ञानरहित तप [**क्षणेण**] शीघ्र ही [**जीवस्य**] जीवको [**दुःखस्य कारणं**] दुःखका कारण [**भवति**] होता है । **भावार्थ**—निदानबंध आदि तीन शल्योंको आदि ले समस्त विषयाभिलाषरूप मनोरथोंके विकल्पजालरूपी अग्निकी ज्वालाओंसे रहित जो निज सम्यग्ज्ञान है उससे रहित बाह्यपदार्थोंका शास्त्रद्वारा ज्ञान है उससे कुछ काम नहीं । कार्य तो एक निज आत्माके जाननेसे है । यहां शिष्यने प्रश्न किया कि निदानबंधरहित आत्मज्ञान तुमने बतलाया उसमें निदानबंध किसे कहते हैं । उसका समाधान । जो देखे सुने और भोगे हुए इंद्रियोंके भोगोंसे जिसका चित्त रंग रहा है ऐसा अज्ञानी जीव रूपलावण्य सौभाग्यका अभिलाषी वासुदेव चक्रवर्तीपदके भोगोंकी वांछा करे, दान पूजा तपश्चरणादिकर भोगोंकी अभिलाषा करे वह निदानबंध है सो बडी सल्य (कांटा) है । इस शल्यसे रहित जो आत्मज्ञान उसके विना शब्दशास्त्रादिका ज्ञान मोक्षका कारण नहीं है । क्योंकि वीतरागस्वसंवेदनज्ञानरहित तप भी दुःखका कारण है । ज्ञानरहित तपसे जो संसारकी संपदायें मिलती हैं वे क्षणभंगुर हैं । इसलिये यह निश्चय हुआ कि आत्मज्ञानसे रहित जो शास्त्रका ज्ञान और तपश्चरणादि हैं उनसे मुख्यताकर पुन्यका बंध होता है । उस पुन्यके प्रभावसे जगतकी विभूति पाता है वह क्षणभंगुर है । इसलिये अज्ञानियोंका तप और श्रुत यद्यपि पुन्यका कारण है तौभी मोक्षका कारण नहीं है ॥ २०२ ॥

आगे जिससे मिथ्यात्वरागादिककी वृद्धि हो वह आत्मज्ञान नहीं है ऐसा निरूपण

तमित्यादि । तं तत् णियणाणु जि होइ णवि निजज्ञानमेव न भवति वीतरागनित्यानंदैकस्वभावनिजपरमात्मतत्त्वपरिज्ञानमेव न भवति । येन ज्ञानेन किं भवति । जेण पवड्ढइ येन प्रवर्धते । कोसौ । राउ शुद्धात्मभावनासमुत्पन्नवीतरागपरमानंदप्रतिबंधकपंचेंद्रियविषयाभिलाषरागः । अत्र दृष्टांतमाह । दिणयरकिरणहं पुरउ जिव दिनकरकिरणानां पुरतो हे जीव किं विलसइ किं विलसति किं शोभते अपि तु नैव । कोसौ । तमराउ तमोरागस्तमोव्याप्तिरिति । अत्रेदं तात्पर्यं । यस्मिन् शास्त्राभ्यासज्ञाने जातेप्यनाकुलत्वलक्षणपारमार्थिकसुखप्रतिपक्षभूता आकुलत्वोत्पादका रागादयो वृद्धिं गच्छंति तन्निश्चयेन ज्ञानं न भवति । कस्मात् । विशिष्टमोक्षफलाभावादिति ॥ २०३ ॥

अथ ज्ञानिनां निजशुद्धात्मस्वरूपं विहाय नान्यत्किमप्युपादेयमिति दर्शयति;—

अप्पा मिल्लिवि णाणियहं, अण्णु ण सुंदरु वत्थु ।
तेण ण विसयहं मणु रमइ, जाणतहं परमत्थु ॥ २०४ ॥

आत्मानं मुक्त्वा ज्ञानिनां अन्यन्न सुंदरं वस्तु ।
तेन न विषयाणां मनो रमते जानतां परमार्थं ॥ २०४ ॥

अप्पा इत्यादि । अप्पा मिल्लिवि शुद्धबुद्धैकस्वभावं परमात्मपदार्थं मुक्त्वा णाणियहं ज्ञानिनां मिथ्यात्वरागादिपरिहारेण निजशुद्धात्मद्रव्यपरिज्ञानपरिणतानां अण्णु ण सुंदरु

करते हैं;—[जीव] हे जीव [तत्] वह [निजज्ञानं एव] वीतरागनित्यानंदअखंडस्वभाव परमात्मतत्त्वका परिज्ञान ही [नापि] नहीं [भवति] है [येन] जिससे [रागः] परद्रव्यमें प्रीति [प्रवर्धते] बढै [दिनकरकिरणानां पुरतः] सूर्यकी किरणोंके आगे [तमोरागः] अंधकारका फैलाव [किं विलसति] कैसे शोभायमान होसकता है नहीं हो सकता । **भावार्थ**—शुद्धात्माकी भावनासे उत्पन्न जो वीतराग परम आनंद उसके शत्रु पंचेन्द्रियोंके विषयोंका अभिलाष जिसमें हो वह निज (आत्म) ज्ञान नहीं है अज्ञान ही है । जिस जगह वीतराग भाव है वही सम्यग्ज्ञान है । इसी बातको दृष्टांत देकर दृढ करते हैं सो सुनो । हे जीव जैसे सूर्यके प्रकाशके आगे अंधेरा नहीं शोभा देता वैसे ही आत्मज्ञानमें विषयोंकी अभिलाषा (इच्छा) नहीं शोभती । यह निश्चयसे जानना । शास्त्रका ज्ञान होनेपर भी जो निराकुलता न हो और आकुलताके उपजानेवाले आत्मीकसुखके वैरी रागादिक जो वृद्धिको प्राप्त हों तो वह ज्ञान किसकामका । ज्ञान तो वह है जिससे आकुलता मिट जावे । इससे यह निश्चय हुआ कि बाह्य पदार्थोंका ज्ञान मोक्षफलके अभावसे कार्यकारी नहीं है ॥ २०३ ॥

आगे ज्ञानी जीवोंके निजशुद्धात्मभावके विना अन्य कुछ भी आदरने योग्य नहीं है ऐसा दिखलाते हैं;—[आत्मानं] आत्माको [मुक्त्वा] छोडकर [ज्ञानिनां] ज्ञानि-

वत्थु अन्यत् सुंदरं समीचीनं वस्तु प्रतिभाति येन कारणेन तेण ण विसयहं मणु रमइ तेन कारणेन शुद्धात्मोपलब्धिप्रतिपक्षभूतेषु पंचेंद्रियविषयकामभोगेषु मनो न रमते । किं कुर्वतां । जाणंतहं जानतां परमत्थु वीतरागसहजानंदैकपारमार्थिकसुखाविनाभूतं परमात्मानमेवेति तात्पर्यं ॥ २०४ ॥

अथ तमेवार्थं दृष्टांतेन समर्थयति;—

अप्पा मिल्लिवि णाणमउ, चित्ति ण लग्गइ अण्णु ।
मरगउ जें परियाणियउ, तहुं कच्चें कउ गण्णु ॥ २०५ ॥

आत्मानं मुक्त्वा ज्ञानमयं चित्ते न लगति अन्यत् ।
मरकतः येन परिज्ञातः तस्य काचेन किं गहनं ॥ २०५ ॥

अप्पा इत्यादि । अप्पा मिल्लिवि आत्मानं मुक्त्वा । कथंभूतं । णाणमउ ज्ञानमयं केवलज्ञानांतर्भूतानंतगुणमयं चित्ते मनसि ण लग्गइ न लगति न रोचते न प्रतिभाति । किं । अण्णु निजपरमात्मस्वरूपादन्यत् । अत्रार्थे दृष्टांतमाह । मरगउ जेण वियाणियउ मरकतरत्नविशेषो येन परिज्ञातः तहुं तस्य रत्नपरीक्षापरिज्ञानसहितस्य पुरुषस्य कच्चें कउ गण्णु काचेन किं गहनं किमपेक्षा तस्येत्यभिप्रायः ॥ २०५ ॥

योंको [अन्यत् वस्तु] अन्य वस्तु [सुंदरं न] अच्छी नहीं लगती [तेन] इसलिये [परमार्थं जानतां] परमात्मपदार्थको जाननेवालोंका [मनः] मन [विषयाणां] विषयोंमें [न रमते] नहीं लगता । भावार्थ—मिथ्यात्वरागादिकके छोडनेसे निजशुद्धात्मद्रव्यके यथार्थ ज्ञानकर जिनका चित्त परिणत होगया है ऐसे ज्ञानियोंको शुद्ध बुद्ध परम स्वभाव परमात्माको छोड़के दूसरी कोई भी वस्तु सुंदर नहीं भासती । इसीलिये उनका मन कभी विषयवासनामें नहीं रमता । वे विषय कैसे हैं । जोकि शुद्धात्माकी प्राप्तिके शत्रु हैं । ऐसे ये भवभ्रमणके कारण काम भोगरूप पांच इंद्रियोंके विषय उनमें मूढ जीवोंका ही मन रमता है सम्यग्दृष्टीका मन नहीं रमता । कैसे हैं सम्यग्दृष्टि, जिन्होंने वीतराग सहजानंद अखंड सुखमें तन्मय परमात्मतत्त्वको जान लिया है । इसलिये यह निश्चय हुआ कि जो विषयवासनाके अनुरागी हैं वे अज्ञानी हैं, और जो ज्ञानीजन हैं वे विषयविकारसे सदा विरक्त ही हैं ॥ २०४ ॥

आगे इसी कथनको दृष्टांतसे दृढ करते हैं;—[ज्ञानमयं आत्मानं] केवल ज्ञानादि अनंतगुणमई आत्माको [मुक्त्वा] छोड़कर [अन्यत्] दूसरी वस्तु [चित्ते] ज्ञानियोंके मनमें [न लगति] नहीं रुचती । उसका दृष्टांत यह है कि [येन] जिसने [मरकतः] मरकतमणि (रत्न) [परिज्ञातः] जानलिया [तस्य] उसको [काचेन] कांचसे [किं गहनं] क्या प्रयोजन है । भावार्थ—जिसने रत्न पा लिया उसको कांचके खंडोंकी

अथ कर्मफलं भुंजानस्सन् योसौ रागद्वेषं करोति स कर्म बध्नातीति कथयति;—

भुंजंतुवि णियकम्मफलु, मोहइं जो जि करेइ ।
भाउ असुंदरु सुंदरुवि, सो पर कम्मु जणेइ ॥ २०६ ॥

भुंजानोपि निजकर्मफलं मोहेन य एव करोति ।
भावं असुंदरं सुंदरमपि स परं कर्म जनयति ॥ २०६ ॥

भुंजंतुवि इत्यादि । **भुंजंतुवि** भुंजानोपि । किं । **णियकम्मफलु** वीतरागपरमाह्लादरूपशुद्धात्मानुभूतिविपरीतं निजोपार्जितं शुभाशुभकर्मफलं **मोहइं** निर्मोहशुद्धात्मप्रतिकूलमोहोदयेन **जो जि करेइ** ए एव पुरुषः करोति । कं । **भाउ** भावं परिणामं । किं विशिष्टं । **असुंदरु सुंदरुवि** अशुभं शुभमपि **सो पर** स एव भावः **कम्मु जणेइ** शुभाशुभं कर्म जनयति । अयमत्र भावार्थः । उदयागते कर्मणि योसौ स्वस्वभावच्युतः सन् रागद्वेषौ करोति स एव कर्म बध्नाति ॥ २०६ ॥

अथ उदयागते कर्मानुभवे योसौ रागद्वेषौ न करोति स कर्म न बध्नातीति कथयति;—

भुंजंतुवि णियकम्मफलु, जो तहिं राउ ण जाइ ।
सो णवि बंधइ कम्मु पुणु, संचिउ जेण विलाइ ॥ २०७ ॥

भुंजानोपि निजकर्मफलं यः तत्र रागं न याति ।
स नैव बध्नाति कर्म पुनः संचितं येन विलीयते ॥ २०७ ॥

भुंजंतुवि इत्यादि । **भुंजंतुवि** भुंजानोपि । किं । **णियकम्मफलु** निजकर्मफलं निजशु-

---

क्या जरूरत है उसी तरह जिसका चित्त आत्मामें लग गया उसके दूसरे पदार्थोंकी वांछा नहीं रहती ॥ २०५ ॥

आगे कर्मफलको भोगता हुआ जो राग द्वेष करता है वह कर्मोंको बांधता है;—[**य-एव**] जो जीव [**निजकर्मफलं**] अपने कर्मोंके फलको [**भुंजानोपि**] भोगता हुआ भी [**मोहेन**] मोहसे [**असुंदरं सुंदरं अपि**] भले और बुरे [**भावं**] परिणामोंको [**करोति**] करता है [**सः**] वह [**परं**] केवल [**कर्म जनयति**] कर्मको उपजाता (बांधता) है । **भावार्थ**—वीतराग परम आह्लादरूप शुद्धात्माकी अनुभूतिसे विपरीत जो अशुद्धरागादिक विभाव उनसे उपार्जन किये गये शुभ अशुभकर्म उनके फलको भोगता हुआ जो अज्ञानी जीव मोहके उदयसे हर्ष विषाद भाव करता है वह नवे कर्मोंका बंध करता है । सारांश यह है कि जो निजस्वभावसे च्युत हुआ उदयमें आये हुए कर्मोंमें राग द्वेष करता है वही कर्मोंको बांधता है ॥ २०६ ॥

आगे जो उदयप्राप्त कर्मोंमें राग द्वेष नहीं करता वह कर्मोंको भी नहीं बांधता ऐसा

द्धात्मोपलंभावावेनोपार्जितं पूर्वं यत् शुभाशुभं कर्म तस्य फलं **जो** यो जीवः **तहिं** तत्र कर्मानुभवप्रस्तावे **राउ ण जाइ** रागं न गच्छति वीतरागचिदानंदैकस्वभावशुद्धात्मतत्त्वभावनोत्पन्नसुखामृततृप्तः सन् रागद्वेषौ न करोति **सो** स जीवः **णवि बंधइ** नैव बध्नाति । किं न बध्नाति । **कम्मु** ज्ञानावरणादि कर्म **पुणु** पुनरपि । येन कर्मबंधाभावपरिणामेन किं भवति । **संचिउ जेण विलाइ** पूर्वसंचितं कर्म येन वीतरागपरिणामेन विलयं विनाशं गच्छतीति । अत्राह प्रभाकरभट्टः । कर्मोदयफलं भुंजानोपि ज्ञानी कर्मणापि न बध्यते इति सांख्यादयोपि वदंति तेषां किमिति दूषणं दीयते भवद्भिरिति । भगवानाह । ते निजशुद्धात्मानुभूतिलक्षणं वीतरागचरित्रनिरपेक्षा वदंति तेन कारणेन तेषां दूषणमिति तात्पर्यं ॥ २०७ ॥

अथ यावत्कालमणुमात्रमपि रागं न मुंचति तावत्कालं कर्मणा न मुच्यते इति प्रतिपादयति;—

जो अणुमित्तुवि राउ मणि, जाम ण मिल्लइ एत्थु ।
सो णवि मुच्चइ ताम जिय, जाणंतुवि परमत्थु ॥ २०८ ॥

कहते हैं;—[**निजकर्मफलं**] अपने बांधे हुए कर्मोंके फलको [**भुंजानोपि**] भोगता हुआ भी [**तत्र**] उस फलके भोगनेमें [**यः**] जो जीव [**रागं**] राग द्वेषको [**न याति**] नहीं प्राप्त होता [**सः**] वह [**पुनः कर्म**] फिर कर्मको [**नैव**] नहीं [**बध्नाति**] बांधता [**येन**] जिस कर्मबंधाभावपरिणामसे [**संचितं**] पहले बांधे हुए कर्म भी [**विलीयते**] नाश होजाते हैं । **भावार्थ**—निजशुद्धात्माके ज्ञानके अभावसे उपार्जन किये जो शुभ अशुभ कर्म उनके फलको भोगता हुआ भी वीतराग चिदानंद परमस्वभावरूप शुद्धात्मतत्त्वकी भावनासे उत्पन्न अतींद्रियसुखरूप अमृतसे तृप्तहुआ जो रागी द्वेषी नहीं होता वह जीव फिर ज्ञानावरणादि कर्मोंको नहीं बांधता है और नवे कर्मोंके बंधका अभाव होनेसे प्राचीन कर्मोंकी निर्जरा ही होती है । यह संवरपूर्वक निर्जरा ही मोक्षका मूल है । ऐसा कथन सुनकर प्रभाकर भट्टने प्रश्न किया कि हे प्रभो "कर्मके फलको भोगता हुआ भी ज्ञानसे नहीं बंधता" ऐसा सांख्य आदिक भी कहते हैं उनको तुम दोष क्यों देते हो । उसका समाधान श्रीगुरु कहते हैं—जो हम तो आत्मज्ञान संयुक्त ज्ञानी जीवोंकी अपेक्षा कहते हैं, वे ज्ञानके प्रभावसे कर्मफल भोगते हुए भी रागद्वेषभाव नहीं करते । इसलिये उनके नवे बंधका अभाव है । और जो मिथ्यादृष्टि ज्ञानभावसे बाह्य पूर्वोपार्जितकर्मफलको भोगते हुए रागी द्वेषी होते हैं उनके अवश्य बंध होता है । इस तरह सांख्य नहीं कहता वह वीतराग चारित्रसे रहित कथन करता है । इसलिये उन सांख्यादिकोंको दूषण दिया जाता है । यह तात्पर्य जानना ॥ २०७ ॥

यः अणुमात्रमपि रागं मनसि यावत् न मुंचति अत्र ।
स नैव मुच्यते तावत् जीव जानन्नपि परमार्थं ॥ २०८ ॥

जो इत्यादि । **जो** यः कर्ता **अणुमित्तुवि** अणुमात्रमपि सूक्ष्ममपि **राउ** रागं वीतराग-सदानंदैकशुद्धात्मनो विलक्षणं पंचेंद्रियविषयसुखाभिलाषरागं **मणि** मनसि **जाम ण मिल्लइ** यावंतं कालं न मुंचति **एत्थु** अत्र जगति **सो णवि मुच्चइ** स जीवो नैव मुच्यते ज्ञानावर-णादिकर्मणा **ताव** तावंतं कालं **जिय** हे जीव । किं कुर्वन्नपि । **जाणंतुवि** वीतरागानुष्ठान-रहितः सन् शब्दमात्रेण जानन्नपि । कं जानन् । **परमत्थु** परमार्थशब्दवाच्यनिजशुद्धात्म-तत्त्वमिति । अयमत्र भावार्थः । निजशुद्धात्मस्वभावज्ञातेपि शुद्धात्मोपलब्धिलक्षणवीतराग-चारित्रभावनां विना मोक्षं न लभत इति ॥ २०८ ॥

अथ निर्विकल्पात्मभावनाशून्यः शास्त्रं पठन्नपि तपश्चरणं कुर्वन्नपि परमार्थं न वेत्तीति कथयति;—

बुज्झइ सत्थइं तउ चरइ, पर परमत्थु ण वेइ ।
ताव ण मुंचइ जाम णवि, इहु परमत्थु मुणेइ ॥ २०९ ॥

बुध्यते शास्त्राणि तपः चरति परं परमार्थं न वेत्ति ।
तावत् न मुच्यते यावंतं नैव एनं परमार्थं मनुते ॥ २०९ ॥

बुज्झइ इत्यादि । **बुज्झइ** बुध्यते । कानि । **सत्थइं** शास्त्राणि न केवलं शास्त्राणि बुध्यते **तउ चरइ** तपश्चरति **पर** परं किंतु **परमत्थु ण वेइ** परमार्थं न वेत्ति न जानाति । कस्मान्न वेत्ति । यद्यपि व्यवहारेण परमात्मप्रतिपादकशास्त्रेण ज्ञायते तथापि निश्चयेन वीतरागस्वसं-वेदनज्ञानेन परिच्छिद्यते । यद्यप्यनशनादिद्वादशविधतपश्चरणेन बहिरंगसहकारिकारणभूतेन

आगे जब तक परमाणूमात्र भी रागको नहीं छोड़ता—धारण करता है तब तक कर्मोंसे नहीं छूटता ऐसा कथन करते हैं;—[**यः**] जो जीव [**अणुमात्रं अपि**] थोड़ा भी [**रागं**] राग [**मनसि**] मनमेंसे [**यावत्**] जबतक [**अत्र**] इस संसारमें [**न मुंचति**] नहीं छोड़ देता है [**तावत्**] तबतक [**जीव**] हे जीव [**परमार्थं**] निजशु-द्धात्मतत्त्वको [**जानन्नपि**] शब्दसे केवल जानता हुआ भी [**नैव**] नहीं [**मुच्यते**] मुक्त होता । **भावार्थ**—जो वीतराग सदा आनंदरूप शुद्धात्मभावसे रहित पंचेंद्रियोंके विषयोंकी इच्छा रखता है मनमें थोड़ासा भी राग रखता है वह आगमज्ञानसे आत्माको शब्दमात्र जानता हुआ भी वीतराग चारित्रकी भावनाके विना मोक्षको नहीं पाता ॥२०८॥

आगे जो निर्विकल्प आत्मभावनासे शून्य है वह शास्त्रको पढता हुआ भी तथा तपश्च-रण करता हुआ भी परमार्थको नहीं जानता है ऐसा कहते हैं;—[**शास्त्राणि**] शास्त्रोंको [**बुध्यते**] जानता है [**तपः चरति**] और तपस्या करता है [**परं**] लेकिन [**परमार्थं**]

साध्यते तथापि निश्चयेन निर्विकल्पशुद्धात्मविश्रांतिलक्षणवीतरागचारित्रसाध्यो योसौ परमार्थशब्दवाच्यो निजशुद्धात्मा तत्र निरंतरानुष्ठानाभावात् **ताव ण मुंचइ** तावंतं कालं न मुच्यते । केन । कर्मणा **जाम णवि इहु परमत्थु मुणेइ** यावंतं कालं नैवैनं पूर्वोक्तलक्षणं परमार्थं मनुते जानाति श्रद्धत्ते सम्यगनुभवतीति । इदमत्र तात्पर्यं । यथा प्रदीपेन विवक्षितं वस्तु निरीक्ष्य गृहीत्वा च प्रदीपस्त्यज्यते तथा शुद्धात्मतत्त्वप्रतिपादकशास्त्रेण शुद्धात्मतत्त्वं ज्ञात्वा गृहीत्वा च प्रदीपस्थानीयः शास्त्रविकल्पस्त्याज्यत इति ॥ २०९ ॥

अथ योसौ शास्त्रं पठन्नपि विकल्पं न मुंचति निश्चयेन देहस्थं शुद्धात्मानं न मन्यते स जडो भवतीति प्रतिपादयति;—

सत्थु पढंतुवि होइ जडु, जो ण हणेइ वियप्पु ।
देहि वसंतुवि णिम्मलउ, णवि मण्णइ परमप्पु ॥ २१० ॥

शास्त्रं पठन्नपि भवति जडः यः न हंति विकल्पं ।
देहे वसंतमपि निर्मलं नैव मन्यते परमात्मानं ॥ २१० ॥

परमात्माको [**न वेत्ति**] नहीं जानता है [**यावत्**] और जबतक [**एवं**] पूर्व कहे हुए [**परमार्थं**] परमात्माको [**नैव मनुते**] नहीं जानता व श्रद्धान व अच्छीतरह अनुभव करता है [**तावत्**] तबतक [**न मुच्यते**] नहीं छूटता । **भावार्थ**—यद्यपि व्यवहार नयसे आत्मा अध्यात्मशास्त्रोंसे जाना जाता है तौभी निश्चयनयसे वीतरागस्वसंवेदन ज्ञानहीसे जानने योग्य है, यद्यपि बाह्य सहकारी कारण अनशनादि बारह प्रकारके तपसे साधा जाता है तौभी निश्चयनयसे निर्विकल्पवीतराग चारित्रहीसे आत्माकी सिद्धि है । जिस वीतरागचारित्रका शुद्धात्मामें विश्राम होना ही लक्षण है । सो विना वीतरागचारित्रके आगमज्ञानसे तथा बाह्य तपसे आत्मज्ञानकी सिद्धि नहीं है । जबतक निजशुद्धात्मतत्त्वके स्वरूपका आचरण नहीं है तबतक कर्मोंसे नहीं छूट सकता । यह निःसंदेह जानना जबतक परमतत्त्वको न जानें न श्रद्धा करै न अनुभवै तबतक कर्मबंधसे नहीं छूटता । इससे यह निश्चय हुआ कि कर्मबंधसे छूटनेका कारण एक आत्मज्ञान ही है । और शास्त्रका ज्ञान भी आत्मज्ञानकेलिये ही किया जाता है, जैसे दीपकसे वस्तुको देखकर वस्तुको उठा लेते हैं और दीपकको छोड़ देते हैं उसी तरह शुद्धात्मतत्त्वके उपदेश करनेवाले जो अध्यात्मशास्त्र उनसे शुद्धात्मतत्त्वको जानकर उस शुद्धात्मतत्त्वका अनुभव करना चाहिये और शास्त्रका विकल्प छोड़ना चाहिये । शास्त्र तो दीपकके समान है तथा आत्मवस्तु रत्न समान है ॥ २०९ ॥

आगे जो शास्त्रको पढकरके भी विकल्पको नहीं छोड़ता और निश्चयसे शुद्धात्माको नहीं मानता जो कि शुद्धात्मदेव देहरूपी देवालेमें मौजूद है उसे न ध्यावता है वह मूर्ख

सत्थु इत्यादि । **सत्थु पढंतुवि** शास्त्रं पठन्नपि **होइ जडु** स जडो भवति । यःकिं करोति । **जो ण हणेइ वियप्पु** यः कर्ता शास्त्राभ्यासफलभूतस्य रागादिविकल्परहितस्य निजशुद्धात्मस्वभावस्य प्रतिपक्षभूतं मिथ्यात्वरागादिविकल्पं न हंति । न केवलं विकल्पं न हंति । **देहि वसंतुवि** देहे वसंतमपि **णिम्मलउ** निर्मलं कर्ममलरहितं **णवि मण्णइ** नैव मन्यते न श्रद्धत्ते । कं । **परमप्पु** निजपरमात्मानमिति । अत्रेदं व्याख्यानं ज्ञात्वा त्रिगुप्तसमाधिं कृत्वा च स्वयं भावनीयं । यदा तु त्रिगुप्तिगुप्तसमाधिं कर्तुं नायाति तदा विषयकषायवंचनार्थं शुद्धात्मभावनास्मरणदृढीकरणार्थं च बहिर्विषये व्यवहारज्ञानवृद्ध्यर्थं च परेषां कथनीयं किंतु तथापि परप्रतिपादनव्याजेन मुख्यवृत्त्या स्वकीयजीव एव संबोधनीयः । कथमिति चेत् । इदमनुपपन्नमिदं व्याख्यानं न भवति मदीयमनसि यदि समीचीनं न प्रतिभाति तर्हि त्वमेव स्वयं किं न भावयसीति तात्पर्यं ॥ २१० ॥

अथ बोधार्थं शास्त्रं पठन्नपि यस्य विशुद्धात्मप्रतीतिलक्षणो बोधो नास्ति स मूढो भवतीति प्रतिपादयति;—

बोहणिमित्तें सत्थु किल, लोइ पढिज्जइ इत्थु ।
तेणवि बोहु ण जासु वरु, सो किं मूढु ण तत्थु ॥ २११ ॥

बोधनिमित्तेन शास्त्रं किल लोके पठ्यते अत्र ।
तेनैव बोधो न यस्य वरः सः किं मूढो न तथ्यं ॥ २११ ॥

है ऐसा कहते हैं;—[**यः**] जो जीव [**शास्त्रं**] शास्त्रको [**पठन्नपि**] पढता हुआ भी [**विकल्पं**] विकल्पको [**न हंति**] नहीं दूर करता (मेंटता) वह [**जडो भवति**] मूर्ख है जो विकल्प नही मेंटता वह [**देहे**] शरीरमें [**वसंतमपि**] रहते हुए भी [**निर्मलं परमात्मानं**] निर्मल परमात्माको [**नैव मन्यते**] नहीं श्रद्धानमें लाता । **भावार्थ**— शास्त्रके अभ्यासका तो फल यह है कि रागादि विकल्पोंको दूर करना और निज शुद्धात्माको ध्यावना । इसलिये इस व्याख्यानको जानकर तीनगुप्तिमें अचल हो परम समाधिमें आरूढ होके निजस्वरूपका ध्यान करना । लेकिन जब तक तीन गुप्ति न हों परमसमाधि न आवे (होसके) तब तक विषयकषायोंके हटानेकेलिये परजीवोंको धर्मोपदेश देना उसमें भी परके उपदेशके बहानेसे मुख्यताकर अपना जीव ही संबोधना । वो इस तरह है कि परको उपदेश देते अपनेको समझावे । जो मार्ग दूसरोंको छुड़ावै वह आप कैसे करे । इससे मुख्य संबोधन अपना ही है । परजीवोंको ऐसा ही उपदेश है जो यह बात मेरे मनमें अच्छी नहीं लगती तो तुमको भी भली नहीं लगती होगी तुम भी अपने मनमें विचार करो ॥ २१० ॥

आगे ज्ञानके लिये शास्त्रको पढते हुए भी जिसके आत्मज्ञान नहीं है वह मूर्ख है ऐसा

बोधनिमित्तेन किल शास्त्रं लोके पठ्यते अत्र तेनैव कारणेन बोधो न यस्य । कथंभूतो, वरो विशिष्टः स किं मूढो न भवति किंतु भवत्येव तथ्यमिति । तद्यथा । अत्र यद्यपि लोकव्यवहारेण कविगमकवादिवाग्मित्वादिलक्षणशास्त्रजनितो बोधो भण्यते तथापि निश्चयेन परमात्मप्रकाशकाध्यात्मशास्त्रोत्पन्नो वीतरागस्वसंवेदनरूपः स एव बोधो ग्राह्यो न चान्यः । तेनानुबोधेन विना शास्त्रे पठितेपि मूढो भवतीति । अत्र यः कोपि परमात्मबोधजनकमल्पशास्त्रं ज्ञात्वापि वीतरागभावनां करोति स सिद्ध्यतीति । तथा चोक्तं । "वीरा[1] वेरग्गपरा थोवंपि हु सिक्खिऊण सिज्झंति । ण हु सिज्झंति विरागेण विणा पढिदेसुवि सव्वसत्थेसु" । परं किंतु । "अक्खेडा[2] जोयंतु ठिउ अप्पि ण दिण्णउ चित्तु । कणविरहियउ पलालु जिमु पर संगहिउ बहुत्तु" । इत्यादि पाठमात्रं गृहीत्वा परेषां बहुशास्त्रज्ञानिनां दूषणा न कर्तव्या । तैर्बहुश्रुतैरप्यन्येषामल्पश्रुततपोधनानां दूषणा न कर्तव्या । कस्मादिति चेत् । दूषणे कृते सति परस्परं रागद्वेषोत्पत्तिर्भवति तेन ज्ञानतपश्चरणादिकं नश्यतीति भावार्थः ॥ २११ ॥

कथन करते हैं;—[**अत्र लोके**] इस लोकमें [**किल**] नियमसे [**बोधनिमित्तेन**] ज्ञानके निमित्त [**शास्त्रं**] शास्त्र [**पठ्यते**] पढे जाते हैं [**तेनैव**] परंतु शास्त्रके पढनेसे भी [**यस्य**] जिसको [**वरः बोधः न**] उत्तमज्ञान नहीं हुआ [**सः**] वह [**किं**] क्या [**मूढः न**] मूर्ख नहीं है [**तथ्यं**] ठीक मूर्ख ही है इसमें संदेह नहीं । **भावार्थ**—इस लोकमें यद्यपि लोकव्यवहारसे नवीन कविताका कर्ता कवि, प्राचीनकाव्योंकी टीका कर्ता गमक, जिससे वादमें कोई न जीतसके ऐसा वादित्व, और श्रोताओंके मनको अनुरागी करनेवाला शास्त्रका वक्ता होनारूप वाग्मित्व इत्यादि लक्षणोंवाला शास्त्रजनित ज्ञान होता है तौभी निश्चयनयसे वीतरागस्वसंवेदनरूप ही ज्ञान अध्यात्मशास्त्रोंमें प्रशंसा किया गया है । इसलिये स्वसंवेदन ज्ञानके विना शास्त्रके पढते हुए भी मूर्ख है । और जो कोई परमात्मज्ञानके उत्पन्न करनेवाले छोटे थोड़े शास्त्रको भी जानकर वीतराग स्वसंवेदन ज्ञानकी भावना करते हैं वे मुक्त होजाते हैं । ऐसा ही कथन ग्रंथोंमें हर एक जगह कहा है कि—वैराग्यमें लगे हुए जो मोह शत्रुको जीतनेवाले हैं वे थोड़े शास्त्रको ही पढकर सुधर जाते हैं मुक्त हो जाते हैं और वैराग्यके विना सब शास्त्रोंको पढते हुए भी मुक्त नहीं होते । यह निश्चय जानना परंतु यह कथन अपेक्षासे है । इस बहानेसे शास्त्र पढनेका अभ्यास नहीं छोडना, और जो विशेष शास्त्रके पाठी हैं उनको दूषण न देना ॥ जो शास्त्रके अक्षर बता रहा है और आत्मामें चित्त नहीं लगाया वह ऐसे जानना कि

---

१. वीरा वैराग्यपराः स्तोकमपि हि शिक्षयित्वा सिद्ध्यंति । न खलु सिद्ध्यंति विरागेण विना पठितेष्वपि सर्वशास्त्रेषु ॥ २. अक्षराणि पश्यन् स्थितः आत्मनि न दत्तं चित्तं । कणविरहितः पलालो यथा परं संगृहीतो बहुतरं ॥

अथ वीतरागस्वसंवेदनज्ञानरहितानां तीर्थभ्रमणेन मोक्षो न भवतीति कथयति;—

तित्थइं तित्थु भमंताहं, मूढहं मोक्खु ण होइ ।
णाणविवज्जिउ जेण जिय, मुणिवरु होइ ण सोइ ॥ २१२ ॥

तीर्थं तीर्थं भ्रमतां मूढानां मोक्षो न भवति ।
ज्ञानविवर्जितो येन जीव मुनिवरो भवति न स एव ॥ २१२ ॥

तीर्थं तीर्थं प्रति भ्रमतां मूढात्मनां मोक्षो न भवति । कस्मादिति चेत् । ज्ञानविवर्जितो येन कारणेन हे जीव मुनिवरो न भवति स एवेति । तथाहि । निर्दोषिपरमात्मभावनोत्पन्नवीतरागपरमाह्लादस्पंदिसुंदरानंदरूपनिर्मलनीरपूरप्रवाहनिर्झरज्ञानदर्शनादिगुणसमूहचंदनादिद्रुमवनराजितं देवेन्द्रचक्रवर्तिगणधरादिभव्यजीवतीर्थयात्रिकसमूहश्रवणसुखकरदिव्यध्वनिरूपराजहंसप्रभृतिविविधपक्षिकोलाहलमनोहरं यदर्हद्वीतरागसर्वज्ञस्वरूपं तदेव निश्चयेन गंगादितीर्थं न लोकव्यवहारप्रसिद्धं गंगादिकं । परमनिश्चयेन तु जिनेश्वरपरमतीर्थसदृशं संसारतरणोपायकारणभूतत्वाद्वीतरागनिर्विकल्पपरमसमाधिरतानां निजशुद्धात्मतत्त्वस्मरणमेव तीर्थं, व्यवहारेण तु तीर्थकरपरमदेवादिगुणस्मरणहेतुभूतं मुख्यवृत्त्या पुण्यबंधका-

---

जैसे किसीने कण रहित बहुत भूसेका ढेर कर लिया हो ॥ वह किसी कामका नहीं है । इत्यादि पीठिकामात्र सुनकर जो विशेष शास्त्रज्ञ हैं उनकी निंदा नहीं करनी, और जो बहुश्रुत हैं उनको भी अल्पशास्त्रज्ञोंकी निंदा नहीं करनी चाहिये । क्योंकि परके दोष ग्रहण करनेसे रागद्वेषकी उत्पत्ति होती है उससे ज्ञान और तपका नाश होता है यह निश्चयसे जानना ॥ २११ ॥

आगे वीतरागस्वसंवेदन ज्ञानसे रहित जीवोंको तीर्थ भ्रमण करनेसे भी मोक्ष नहीं है ऐसा कहते हैं;—[**तीर्थं तीर्थं**] तीर्थ तीर्थ प्रति [**भ्रमतां**] भ्रमण करनेवाले [**मूढानां**] मूर्खोंको [**मोक्षः**] मुक्ति [**न भवति**] नहीं होती [**जीव**] हे जीव [**येन**] क्योंकि जो [**ज्ञानविवर्जितः**] ज्ञान रहित है [**स एव**] वह [**मुनिवरः न भवति**] मुनीश्वर नहीं है संसारी है । मुनीश्वर तो वे ही हैं जो समस्त विकल्पजालोंसें रहित होके अपने स्वरूपमें रमें, वे ही मोक्ष पाते हैं । **भावार्थ**—निर्दोषपरमात्माकी भावनासे उत्पन्न हुआ जो वीतरागपरम आनंदरूप निर्मलजल उसके धारण करनेवाले और ज्ञान दर्शनादिगुणोंके समूहरूपी चंदनादि वृक्षोंके वनोंसे शोभित तथा देवेंद्रचक्रवर्ति गणधरादि भव्यजीवरूपी तीर्थयात्रियोंके कानोंको सुखकारी ऐसी दिव्यध्वनिसे शोभायमान और अनेकमुनिजनरूपी राजहंसोंको आदि लेके नाना तरहके पक्षियोंके शब्दोंसे महामनोहर जो अरहंत वीतराग सर्वज्ञ वेही निश्चयसे महातीर्थ हैं, उनके समान अन्य तीरथ नहीं है । वे ही संसारके तरनेके कारण परमतीर्थ हैं । जो परमसमाधिमें लीन महामुनि हैं उनके वे ही

रणं तन्निर्वाणस्थानादिकं च तीर्थमिति । अयमत्र भावार्थः । पूर्वोक्तं निश्चयतीर्थं श्रद्धानपरिज्ञानानुष्ठानरहितानामज्ञानिनां शेषतीर्थं मुक्तिकारणं न भवतीति ॥ २१२ ॥

अथ ज्ञानिनां तथैवाज्ञानिनां च यतीनामंतरं दर्शयति;—

णाणिहिं मूढहं मुणिवरहं, अंतरु होइ महंतु ।
देहु जि मिल्लइ णाणियउं, जीवहं भिण्णु मुणंतु ॥ २१३ ॥

ज्ञानिनां मूढानां मुनिवराणां अंतरं भवति महत् ।
देहमपि मुंचति ज्ञानी जीवाद्भिन्नं मन्यमानः ॥ २१३ ॥

ज्ञानिनां मूढानां च मुनिवराणां अंतरं विशेषो भवति । कथंभूतं । महत् । कस्मादिति चेत् । देहमपि मुंचति । कोसौ । ज्ञानी । किं कुर्वन् सन् । जीवात्सकाशाद्भिन्नं मन्यमानो जानन् इति । तथा च । वीतरागस्वसंवेदनज्ञानी पुत्रकलत्रादि बहिर्द्रव्यं तावद्दूरे तिष्ठतु शुद्धबुद्धैकस्वभावात् स्वशुद्धात्मस्वरूपात्सकाशात् पृथग्भूतं जानन् स्वकीयदेहमपि त्यजति । मूढात्मा पुनः स्वीकरोति इति तात्पर्यम् ॥ २१३ ॥ एवमेकचत्वारिंशत्सूत्रप्रमितमहास्थलमध्ये पंचदशसूत्रैर्वीतरागस्वसंवेदनज्ञानमुख्यत्वेन द्वितीयमंतरस्थलं समाप्तम् । तदनंतरं तस्यैव महास्थलमध्ये सूत्राष्टकपर्यंतं परिग्रहत्यागव्याख्यानमुख्यत्वेन तृतीयमंतरस्थलं प्रारभ्यते ।

तीर्थ हैं निश्चयनयसे निजशुद्धात्मतत्त्वके ध्यानके समान दूसरा कोई तीर्थ नहीं हैं और व्यवहारनयसे तीर्थंकरपरमदेवादिके गुणस्मरणके कारण मुख्यतासे शुभबंधके कारण ऐसे जो कैलाश सम्मेदशिखर आदि निर्वाणस्थान हैं वे भी व्यवहारमात्र तीर्थ कहे हैं । जो तीर्थ तीर्थ प्रति भ्रमण करै और निज तीर्थका जिसके श्रद्धान परिज्ञान आचरण नहीं है वह अज्ञानी है । उसके तीर्थ भ्रमनेसे मोक्ष नहीं होसकती ॥ २१२ ॥

आगे ज्ञानी और अज्ञानी यतियोंमें बहुत बड़ा भेद दिखलाते हैं;—[**ज्ञानिनां**] सम्यग्दृष्टी भावलिंगी [**मूढानां**] मिथ्यादृष्टि द्रव्यलिंगी [**मुनिवराणां**] मुनियोंमें [**महत् अंतरं**] बड़ा भारी भेद [**भवति**] है । [**ज्ञानी**] क्योंकि ज्ञानीमुनि तो [**देहं अपि**] शरीरको भी [**जीवाद्भिन्नं**] जीवसे जुदा [**मन्यमानः**] जानकर [**मुंचति**] छोड देते हैं अर्थात् शरीरका भी ममत्व छोड़ देते हैं तो पुत्र स्त्री आदिका क्या कहना है ये तो प्रत्यक्षसे जुदे हैं और द्रव्यलिंगी मुनि लिंग (भेष) में आत्मबुद्धिको रखता है । **भावार्थ**—वीतरागस्वसंवेदनज्ञानी महामुनी मनवचनकाय इन तीनोंसे अपनेको भिन्न जानता है द्रव्यकर्म भावकर्म नोकर्मादिकसे जिसको ममता नहीं है, पिता माता पुत्र कलत्रादिकी तो बात अलग रहो जो अपने आत्मस्वभावसे निजदेहको ही जुदा जानता है । जिसके पर वस्तुमें आत्मभाव नहीं है और मूढात्मा परभावोंको अपने जानता है । यही ज्ञानी और अज्ञानीमें अंतर है । परको अपना मानें वह बंधता है और न मानें वह मुक्त

तद्यथा;—

लेणहं इच्छइ मूढु पर, भुवणुवि एहु असेसु ।
बहुविहधम्ममिसेण जिय, दोहिमि एहु विसेसु ॥ २१४ ॥

लातुं इच्छति मूढः परः भुवनमपि एतत् अशेषं ।
बहुविधधर्ममिषेण जीव द्वयोः एष विशेषः ॥ २१४ ॥

लातुं गृहीतुं इच्छति । कोसौ । मूढो बहिरात्मा परः । कोर्थः, नियमेन । किं । भुवनमप्येतत्तु अशेषं समस्तं । केन कृत्वा । बहुविधधर्ममिषेण व्याजेन । हे जीव द्वयोरप्येष विशेषः । कयोर्द्वयोः । पूर्वोक्तसूत्रकथितज्ञानिजीवस्यात्रसूत्रोक्तपुनरज्ञानिजीवस्य च । तथाहि । वीतरागसहजानंदैकसुखास्वादरूपः स्वशुद्धात्मैव उपादेय इति रुचिरूपं सम्यग्दर्शनं, तस्यैव परमात्मनः समस्तमिथ्यात्वरागाद्यास्रवेभ्यः पृथग्रूपेण परिच्छित्तिरूपं सम्यग्ज्ञानं, तत्रैव रागादिपरिहाररूपेण निश्चलचित्तवृत्तिः सम्यक्चारित्रं इत्येव निश्चयरत्नत्रयस्वरूपं तत्रयात्मकमात्मानमरोचमानस्तथैवाजानन्नभावयंश्च मूढात्मा । किं करोति । समस्तं जगद्धर्मव्याजेन गृहीतुमिच्छति, पूर्वोक्तज्ञानी तु त्यक्तुमिच्छतीति भावार्थः ॥ २१४ ॥

अथ शिष्यकरणाद्यनुष्ठानेन पुस्तकाद्युपकरणेनाज्ञानी तुष्यति, ज्ञानी पुनर्बंधहेतुं जानन् सन् लज्जां करोतीति प्रकटयति;—

होता है । यह निश्चय जानना ॥ २१३ ॥ इस प्रकार इकतालीस दोहाओंके महास्थलके मध्यमें पंद्रहदोहाओंमें वीतरागस्वसंवेदनज्ञानकी मुख्यतासे दूसरा अंतरस्थल समाप्त हुआ ।

अब परिग्रहत्यागके व्याख्यानको आठदोहाओंसे कहते हैं;—[**द्वयोः**] ज्ञानी और अज्ञानी इन दोनोंमें [**एष विशेषः**] इतना ही भेद है कि [**मूढः**] अज्ञानीजन [**बहुविधधर्ममिषेण**] अनेकतरहके धर्मके बहानेसे [**एतत् अशेषं**] इस समस्त [**भुवनं अपि**] जगतको ही [**परः**] नियमसे [**लातुं इच्छति**] लेनेकी इच्छा करता है अर्थात् सब संसारके भोगोंकी इच्छा करता है तपश्चरणादिकायक्लेशसे स्वर्गादिके सुखोंको चाहता है और ज्ञानीजन कर्मोंके क्षयकेलिये तपश्चरणादि करता है भोगोंका अभिलाषी नहीं है । **भावार्थ**—वीतरागसहजानंद अखंडसुखका आस्वादरूप जो शुद्धात्मा वही आराधने योग्य है ऐसी जो रुचि वह सम्यग्दर्शन, समस्तमिथ्यात्वरागादि आस्रवसे भिन्नरूप उसी परमात्माका जो ज्ञान वह सम्यग्ज्ञान और उसीमें निश्चलचित्तकी वृत्ति वह सम्यक्चारित्र यह निश्चयरत्नत्रयरूप जो शुद्धात्माकी रुचि जिसके नहीं ऐसा मूढजन आत्माको नहीं जानता हुआ और नहीं अनुभवताहुआ जगतके समस्तभोगोंको धर्मके बहानेसे लेना चाहता है तथा ज्ञानीजन समस्तभोगोंसे उदास है जो विद्यमान भोग थे वे सब छोड़ दिये और आगामी वांछा नहीं है ऐसा जानना ॥ २१४ ॥

चिल्लाचिल्लीपुत्थियहिं, तूसइ मूढु णिभंतु ।
एयहिं लज्जइ णाणियउ, बंधहं हेउ मुणंतु ॥ २१५ ॥

शिष्यार्जिकापुस्तकैः तुष्यति मूढो निर्भ्रांतः ।
एतैः लज्जते ज्ञानी बंधस्य हेतुं जानन् ॥ २१५ ॥

शिष्यार्जिकादीक्षादानेन पुस्तकप्रभृत्युपकरणैश्च तुष्यति संतोषं करोति । कोसौ । मूढः । कथंभूतो । निर्भ्रांतः । एतैर्बहिर्द्रव्यैर्लज्जां करोति । कोसौ । ज्ञानी । किं कुर्वन्नपि । पुण्यबंधहेतुं जानन्नपि । तथा च । पूर्वसूत्रोक्तसम्यग्दर्शनज्ञानचारित्रलक्षणं निजशुद्धात्मस्वभावमश्रद्दधानो विशिष्टभेदज्ञानेनाजानंश्च तथैव वीतरागचारित्रेणाभावयंश्च मूढात्मा । किंकरोति । पुण्यबंधकारणमपि जिनदीक्षादानादि शुभानुष्ठानं पुस्तकाद्युपकरणं वा मुक्तिकारणं मन्यते । ज्ञानी तु यद्यपि साक्षात्पुण्यबंधकारणं मन्यते परंपरया मुक्तिकारणं च तथापि निश्चयेन मुक्तिकारणं न मन्यते इति तात्पर्यं ॥ २१५ ॥

अथ चट्टपट्टकुंडिकाद्युपकरणैर्मोहमुत्पाद्य मुनिवराणां उत्पथे पात्यते इति प्रतिपादयति;—

चट्टहिं पट्टहिं कुंडियहिं, चेल्लाचेल्लियएहिं ।
मोहु जणेविणु मुणिवरहं, उप्पहिं पाडिय तेहिं ॥ २१६ ॥

चट्टैः पट्टैः कुंडिकाभिः शिष्यार्जिकाभिः ।
मोहं जनयित्वा मुनिवराणां उत्पथे पातितास्तैः ॥ २१६ ॥

आगे शिष्योंका करना पुस्तकादिका संग्रह करना इन बातोंसे अज्ञानी प्रसन्न होता है और ज्ञानीजन इनको बंधके कारण जानता हुआ इनसे रागभाव नहीं करता इनके संग्रहमें लज्जावान् होता है;—[**मूढः**] अज्ञानीजन [**शिष्यार्जिकापुस्तकैः**] चेला चेली पुस्तकादिकसे [**तुष्यति**] हर्षित होता है [**निर्भ्रांतः**] इसमें कुछ संदेह नहीं है [**ज्ञानी**] और ज्ञानीजन [**एतैः**] इन बाह्यपदार्थोंसे [**लज्जते**] शरमाता है क्योंकि इन सबोंको [**बंधस्य हेतुं**] बंधका कारण [**जानन्**] जानता है । **भावार्थ**—सम्यग्दर्शन सम्यग्ज्ञान सम्यक्चारित्ररूप जो निजशुद्धात्मा उसको न श्रद्धान करता न जानता और न अनुभवकरता जो मूढात्मा वह पुन्यबंधके कारण जिनदीक्षा दानादि शुभ आचरण और पुस्तकादि उपकरण उनको मुक्तिके कारण मानता है, और ज्ञानीजन इनको साक्षात् पुन्यबंधके कारण जानता है परंपराय मुक्तिके कारण मानता है । यद्यपि व्यवहारनयकर बाह्य सामग्रीको धर्मका साधन जानता है तौभी ऐसा मानता है कि निश्चयनयसे ये मुक्तिके कारण नहीं हैं ॥ २१५ ॥

आगे कमंडलु पीछी पुस्तकादि उपकरण और शिष्यादिका संघ ये मुनियोंको मोह

चट्टपट्टकुंडिकाद्युपकरणैः शिष्यार्जिकादिपरिवारैश्च कर्तृभूतैर्मोहं जनयित्वा । केषां । मुनिवराणां पश्चादुन्मार्गे पातिता तैस्तु तैः । तथाहि । यथा कश्चिदजीर्णभयेन विशिष्टाहारं त्यक्त्वा लंघनं कुर्वन्नास्ते पश्चादजीर्णप्रतिपक्षभूतं किमपि मिष्टौषधं गृहीत्वा जिह्वालांपट्येनौषधेनापि अजीर्णं करोत्यज्ञानी इति, न च ज्ञानीति, तथा कोपि तपोधनो विनीतवनितादिकं मोहभयेन त्यक्त्वा जिनदीक्षां गृहीत्वा च शुद्धबुद्धैकस्वभावनिजशुद्धात्मतत्त्वसम्यक्श्रद्धानज्ञानानुष्ठानरूपनीरोगत्वप्रतिपक्षभूतमजीर्णरोगस्थानीयं मोहमुत्पाद्यात्मनः । किंकृत्वा । किमौषधस्थानीयमुपकरणादिकं गृहीत्वा । कोसावज्ञानी न तु ज्ञानीति । इदमत्र तात्पर्यं । परमोपेक्षासंयमधरेण शुद्धात्मानुभूतिप्रतिपक्षभूतस्सर्वोपि तावत्परिग्रहस्त्याज्यः । परमोपेक्षासंयमाभावे तु वीतरागशुद्धात्मानुभूतिभावसंयमरक्षणार्थं विशिष्टसंहननादिशक्त्यभावे सति यद्यपि तपःपर्यायशरीरसहकारिभूतमन्नपानसंयमशौचज्ञानोपकरणतृणमयप्रावरणादिकं किमपि गृह्णाति तथापि ममत्वं न करोतीति । तथा चोक्तं । "रम्येषु वस्तुवनितादिषु वीतमोहो मुह्येद्वृथा किमिति संयमसाधनेषु । धीमान् किमामयभयात्परिहृत्य भुक्तिं पीत्वौषधं व्रजति जातुचिदप्यजीर्णं" ॥ २१६ ॥

उत्पन्न कराके खोटे मार्गमें पटक देते हैं;—[**चट्टैः पट्टैः कुंडिकाभिः**] पीछी कमंडलु पुस्तक और [**शिष्यार्जिकाभिः**] मुनि श्रावकरूप चेला, अर्जिका श्राविका इत्यादि चेली—ये संघ [**मुनिवराणां**] मुनिवरोंको [**मोहं जनयित्वा**] मोह उत्पन्न कराके [**तैः**] वे [**उत्पथे**] उन्मार्गमें (खोटेमारगमें) [**पातिताः**] डाल देते हैं । **भावार्थ**—जैसे कोई अजीर्णके भयसे मनोज्ञ आहारको छोड़कर लंघन करता है पीछे अजीर्णकी दूर करनेवाली कोई मीठी औषधिको लेकर जिह्वाका लंपटी होके मात्रासे अधिक लेके औषधिका ही अजीर्ण करता है, उसी तरह अज्ञानी कोई द्रव्यलिंगी यती विनयवान पतिव्रतास्त्री आदिको मोहके डरसे छोडकर जिनदीक्षा लेके अजीर्ण समान मोहके दूर करनेकेलिये वैराग्य धारणकरके औषधि समान जो उपकरणादि उनको ही ग्रहणकरके उन्हींका अनुरागी (प्रेमी) होता है, उनकी वृद्धिसे सुख मानता है वह औषधिका ही अजीर्ण करता है। मात्रा प्रमाण औषधि लेवे तो वह रोगको हर सकै। यदि औषधिका ही अजीर्ण करै मात्रासे अधिक लेवै तो रोग नहीं जाता उलटी रोगकी वृद्धि ही होती है। यह निःसंदेह जानना । इससे यह निश्चय हुआ जो परमोपेक्षासंयम अर्थात् निरविकल्प परमसमाधिरूप तीन गुप्तिमई परम शुद्धोपयोगरूप संयमके धारक हैं उनके शुद्धात्माकी अनुभूतिसे विपरीत सब ही परिग्रह त्यागने योग्य है । शुद्धोपयोगिमुनियोंके कुछ भी परिग्रह नहीं है । और जिनके परमोपेक्षा संयम नहीं लेकिन व्यवहारसंयम है उनके भावसंयमकी रक्षाके निमित्त हीनसंहननके होनेपर उत्कृष्ट शक्तिके अभावसे यद्यपि तपका साधन शरीरकी रक्षाके निमित्त अन्न जलका ग्रहण होता है, उस अन्नजलके लेनेसे मल-

अथ केनापि जिनदीक्षां गृहीत्वा शिरोलुंचनं कृत्वापि सर्वसंगपरित्यागमकुर्वतात्मानं वंचितमिति निरूपयति;—

केणवि अप्पउ वंचियउ, सिरुलुंचिवि छारेण ।
सयलवि संग ण परिहरिय, जिणवरलिंगधरेण ॥ २१७ ॥

केनापि आत्मा वंचितः शिरो लुंचित्वा क्षारेण ।
सकल[1] अपि संगा न परिहृताः जिनवरलिंगधरेण ॥ २१७ ॥

केनाप्यात्मा वंचितः । किंकृत्वा । शिरोलुंचनं कृत्वा । केन । भस्मना । कस्मादितिचेत् । यतः सर्वेपि संगा न परिहृताः । कथंभूतेन भूत्वा । जिनवरलिंगधारकेणेति । तद्यथा । वीतरागनिर्विकल्पनिजानंदैकरूपसुखरसास्वादपरिणतपरमात्मभावनास्वभावेन तीक्ष्णशस्त्रोपकरणेन बाह्याभ्यंतरपरिग्रहकांक्षारूपप्रभृतिसमस्तमनोरथकल्लोलमालात्यागरूपं मनोमुंडनं पूर्वमकृत्वा जिनदीक्षारूपं शिरोमुंडनं कृत्वापि केनाप्यात्मानं वंचितं । कस्मात् । सर्वसंगपरित्यागाभावादिति । अत्रेदं व्याख्यानं ज्ञात्वा स्वशुद्धात्मभावनोत्थवीतरागपरमानंदपरिग्रहं

मूत्रादिकी बाधा भी होती है इसलिये शौचका उपकरण कमंडलु और संयमोपकरण पीछी और ज्ञानोपकरण पुस्तक इनको ग्रहण करते हैं तौभी इनमें ममता नहीं है प्रयोजनमात्र प्रथम अवस्थामें धारते हैं । ऐसा दूसरी जगह "रम्येषु" इत्यादिसे कहा है कि, मनोज्ञ स्त्री आदिक वस्तुओंमें जिसने मोह छोड दिया है ऐसा महामुनि संयमके साधन पुस्तक पीछी कमंडल आदि उपकरणोंमें वृथा मोहको कैसे कर सकता है कभी नहीं करसकता । जैसे कोई बुद्धिमान पुरुष रोगके भयसे अजीर्णको दूर करना चाहे और अजीर्णके दूर करनेके लिये औषधिका सेवन करे तो क्या मात्रासे अधिक ले सकता है ऐसा कभी नहीं, मात्राप्रमाण ही लेगा ॥ २१६ ॥

आगे ऐसा कहते हैं कि जिसने जिनदीक्षा धरके केशोंका लोंच किया और सकल परिग्रहका त्याग नहीं किया उसने अपना आत्मा ही वंचित किया;—[**केनापि**] जिसकिसीने [**जिनवरलिंगधरेण**] जिनवरका भेष धारण करके [**क्षारेण**] भस्मसे [**शिरः**] शिरके केश [**लुंचित्वा**] लौंच किये (उखाड़े) लेकिन [**सकला अपि संगाः**] सब परिग्रह [**न परिहृताः**] नहीं छोड़े उसने [**आत्मा**] अपना आत्मा [**वंचितः**] ठगलिया । **भावार्थ**—वीतरागनिर्विकल्पनिजानंद अखंडरूप सुखरसका जो आस्वाद उसरूप परिणमी जो परमात्माकी भावना वही हुआ तीक्ष्ण शस्त्र उससे बाहिरके और अंतरके परिग्रहोंकी वांच्छा आदि ले समस्त मनोरथ उनकी कल्लोलमालाओंका त्यागरूप मनका मुंडन वह तो नहीं किया और जिनदीक्षारूप शिरोमुंडनकर भेष रखा सब परिग्रहका त्याग नहीं किया उसने अपना आत्मा ठगा । ऐसा कथन समझकर

कृत्वा तु जगत्त्रये कालत्रयेपि मनोवचनकायैः कृतकारितानुमतैश्च दृष्टश्रुतानुभूतनिःपरिग्रह-शुद्धात्मानुभूतिविपरीतपरिग्रहकांक्षां त्यजेत्यभिप्रायः ॥ २१७ ॥

अथ ये सर्वसंगपरित्यागरूपं जिनलिंगं गृहीत्वापीष्टपरिग्रहान् गृह्णंति ते छर्दिं कृत्वा पुनरपि गिलंति तामिति प्रतिपादयति;—

जे जिणलिंगु धरेवि मुणि, इट्ठपरिग्गह लिंति ।
छद्दि करेविणु ते जि जिय, सा पुणु छद्दि गिलंति ॥ २१८ ॥

ये जिनलिंगं धृत्वापि मुनय इष्टपरिग्रहान् लांति ।
छर्दिं कृत्वा ते एव जीव तां पुनः छर्दिं गिलंति ॥ २१८ ॥

ये केचन जिनलिंगं गृहीत्वापि मुनयस्तपोधना इष्टपरिग्रहान् लांति गृह्णंति । ते किं कुर्वंति । छर्दिं कृत्वा त एव हे जीव तां पुनश्छर्दिं गिलंतीति । तथापि गृहस्थापेक्षया चेतनपरिग्रहः पुत्रकलत्रादिः, सुवर्णादिः पुनरचेतनः, साभरणवनितादि पुनर्मिश्रः । तपोधनापेक्षया छात्रादिः सचित्तः पिच्छकमंडलादिः पुनरचित्तः उपकरणसहितश्छात्रादिस्तु मिश्रः । अथवा मिथ्यात्वरागादिरूपः सचित्तः द्रव्यकर्मनोकर्मरूपः पुनरचित्तः द्रव्यकर्मभावकर्मरूपस्तु मिश्रः । वीतरागत्रिगुप्तसमाधिस्थपुरुषापेक्षया सिद्धरूपः सचित्तः पुद्गलादिपंच द्रव्यरूपः पुनरचित्तः गुणस्थानमार्गणास्थानजीवस्थानादिपरिणतः संसारी जीवस्तु मिश्रश्चेति ।

निजशुद्धात्माकी भावनासे उत्पन्न वीतराग परम आनंदस्वरूपको अंगीकार करके तीनोंकाल तीनों लोकमें मनवचनकाय कृतकारितअनुमोदनाकर देखे सुने अनुभवे जो परिग्रह उनकी वांछा सर्वथा त्यागनी चाहिये । ये परिग्रह शुद्धात्माकी अनुभूतिसे विपरीत हैं ॥ २१७ ॥

आगे जो सर्व संगके त्यागरूप जिनमुद्राको ग्रहणकर फिर परिग्रहको धारण करता है वह वमनकरके पीछे निगलता है ऐसा कथन करते हैं;—[**ये**] जो [**मुनयः**] मुनि [**जिनलिंगं**] जिनलिंगको [**धृत्वापि**] ग्रहणकर [**इष्टपरिग्रहान्**] फिरभी इच्छित परिग्रहोंको [**लांति**] ग्रहण करते हैं [**जीव**] हे जीव [**ते एव**] वे ही [**छर्दिं कृत्वा**] वमन करके [**पुनः**] फिर [**तां छर्दिं**] उस वमनको पीछे [**गिलंति**] निगलते हैं । **भावार्थ**—परिग्रहके तीन भेदोंमें गृहस्थकी अपेक्षा चेतन परिग्रह पुत्र कलत्रादि, अचेतन परिग्रह आभरणादि और मिश्र परिग्रह आभरण सहित स्त्री पुत्रादि; साधुकी अपेक्षा सचित्त परिग्रह शिष्यादि, अचित्त परिग्रह पीछी कमंडलु पुस्तकादि और मिश्र परिग्रह पीछी कमंडलु पुस्तकादि सहित शिष्यादि अथवा साधुके भावोंकी अपेक्षा सचित्त परिग्रह मिथ्यात्वरागादि, अचित्त परिग्रह द्रव्यकर्म नोकर्म और मिश्रपरिग्रह द्रव्यकर्म भावकर्म दोनों मिले हुए । अथवा वीतराग त्रिगुप्तिमें लीन ध्यानी पुरुषकी अपेक्षा सचित्त-

एवंविधबाह्याभ्यंतरपरिग्रहरहितं जिनलिंगं गृहीत्वापि ये शुद्धात्मानुभूतिविलक्षणमिष्टपरिग्रहं गृह्णंति ते छर्दिताहारग्राहकपुरुषसदृशा भवंतीति भावार्थः । तथा चोक्तं । "त्यक्त्वा स्वकीय-पितृमित्रकलत्रपुत्रान् सक्तोन्यगेहवनितादिषु निर्मुमुक्षुः । दोर्भ्यां पयोनिधिसमुद्गतनक्रचक्रं प्रोत्तीर्य गोष्पदजलेषु निमग्नवान् सः" ॥ २१८ ॥

अथ ये ख्यातिपूजालाभनिमित्तं शुद्धात्मानं त्यजंति ते लोहकीलनिमित्तं देवं देवकुलं च दहंतीति कथयति;—

लाहहं कित्तिहि कारणिण, जे सिवसंगु चयंति ।
खीलालग्गिवि तेवि मुणि, देउलु देउ डहंति ॥ २१९ ॥

लाभस्य कीर्तेः कारणेन ये शिवसंगं त्यजंति ।
कीलानिमित्तं तेपि मुनयः देवकुलं देवं दहंति ॥ २१९ ॥

लाभकीर्तिकारणेन ये केचन शिवसंगं शिवशब्दवाच्यं निजपरमात्मध्यानं त्यजंति ते मुनयस्तपोधनाः । किं कुर्वंति । लोहकीलकाप्रायं निःसारेन्द्रियसुखनिमित्तं देवशब्दवाच्यं निजपरमात्मपदार्थं दहंति देवकुलशब्दवाच्यं दिव्यपरमौदारिकशरीरं च दहंतीति ।

परिग्रह सिद्धपरमेष्ठीका ध्यान, अचित्त परिग्रह पुद्गलादि पांच द्रव्यका विचार और मिश्रपरिग्रह गुणस्थान मार्गणास्थान जीवसमासादिरूप संसारी जीवका विचार । इस तरह बाहिरके और अंतरके परिग्रहसे रहित जो जिनलिंग उसे ग्रहण कर जो अज्ञानी शुद्धात्माकी अनुभूतिसे विपरीत परिग्रहको ग्रहण करते हैं वे वमन करके पीछे आहार करनेवालोंके समान निंदाके योग्य होते हैं । ऐसा दूसरी जगह भी कहा है कि जो जीव अपने माता पिता पुत्र मित्र कलत्र—इनको छोड़कर परके घर और पुत्रादिकमें मोह करते हैं अर्थात् अपना परिवार छोड़कर शिष्यसाखाओंमें राग करते हैं वे भुजाओंसे समुद्रको तैरके गायके खोदे जलमें डूबते हैं । कैसा है समुद्र , जिसमें जलचरोंके समूह प्रगट हैं ऐसे अथाह समुद्रको तो बाहोंसे तिर जाता है लेकिन गायके खोजके जलमें डूबता है । यह बड़ा अचंभा है । घरका ही संबंध छोडदिया तो पराये पुत्रोंसे क्या राग करना ? नहीं करना ॥ २१८ ॥

आगे जो अपनी प्रसिद्धि (बडाई) प्रतिष्ठा और पर वस्तुका लाभ इन तीनोंकेलिये आत्मध्यानको छोडते हैं वे लोहके कीलेकेलिये देव तथा देवालयको जलाते हैं;—[**ये**] जो कोई [**लाभस्य**] लाभ [**कीर्तेः कारणेन**] और कीर्तिके कारण [**शिवसंगं**] परमात्माके ध्यानको [**त्यजंति**] छोड़ देते हैं [**ते अपि मुनयः**] वे ही मुनि [**कीलानिमित्तं**] लोहेके कीलेकेलिये अर्थात् कीलेके समान असार इंद्रियसुखके निमित्त [**देवकुलं**] मुनिपद योग्य शरीररूपी देवस्थानको तथा [**देवं**] आत्मदेवको [**दहंति**]

कथमिति चेत् । यदा ख्यातिपूजालाभार्थं शुद्धात्मभावनां त्यक्त्वा वर्तते तदा ज्ञानावरणादिकर्मबंधो भवति तेन ज्ञानावरणकर्मणा केवलज्ञानं प्रच्छाद्यते केवलदर्शनावरणेन केवलदर्शनं प्रच्छाद्यते वीर्यांतरायेण केवलवीर्यं प्रच्छाद्यते मोहोदयेनानंतसुखं च प्रच्छाद्यत इति । एवंविधानंतचतुष्टयस्यालाभे परमौदारिकशरीरं च न लभंत इति । यदि पुनरनेकभवे परिच्छेद्यं कृत्वा शुद्धात्मभावनां करोति तदा संसारस्थितिं छित्वाऽयकालेपि स्वर्गं गत्वागत्य शीघ्रं शास्वतसुखं प्राप्नोतीति तात्पर्यं । तथा चोक्तं । "सग्गो तवेण सव्वो वि पावए किं तु झाणजोएण । जो पावइ सो पावइ परभवे सासयं सोक्खं" ॥ २१९ ॥

अथ यो बाह्याभ्यंतरपरिग्रहेणात्मानं महांतं मन्यते स परमार्थं न जानातीति दर्शयति;—

अप्पउ मण्णइ जो जि मुणि, गरुयउ गंथहि तत्थु ।
सो परमत्थें जिणु भणइ, णवि बुज्झइ परमत्थु ॥ २२० ॥

आत्मानं मन्यते य एव मुनिः गुरुकं ग्रंथैः तथ्यं ।
स परमार्थेन जिनो भणति नैव बुध्यते परमार्थं ॥ २२० ॥

आत्मानं मन्यते य एव मुनिः । कथंभूतं मन्यते । गुरुकं महांतं । कैः । ग्रंथैर्बाह्याभ्यंतर-

---

भवकी आतापसे भस्म कर देते हैं । **भावार्थ**—जिस समय ख्याति पूजा लाभके अर्थ शुद्धात्माकी भावनाको छोडकर अज्ञानभावोंमें प्रवर्त होते हैं उस समय ज्ञानावरणादि कर्मोंका बंध होता है । उस ज्ञानावरणादिके बंधसे ज्ञानादि गुणका आवरण होता है । केवल ज्ञानावरणसे केवल ज्ञान ढका जाता है, मोहके उदयसे अनंतसुख, वीर्यांतरायके उदयसे अनंतबल और केवलदर्शनावरणसे केवलदर्शन आच्छादित होता है । इस प्रकार अनंत चतुष्टयका आवरण होरहा है । उस अनंत चतुष्टयके अलाभमें परमौदारिक शरीरको नहीं पाता क्योंकि जो उसी भवमें मोक्ष जाता है उसीके परमौदारिक शरीर होता है । इसलिये जो कोई सम भावमें शुद्धात्माकी भावना करे तो अभी स्वर्गमें जाकर पीछे विदेहोंमें मनुष्य होकर मोक्ष पाता है । ऐसा ही कथन दूसरी जगह शास्त्रोंमें लिखा है कि तपसे स्वर्ग तो सभी पाते हैं परंतु जो कोई ध्यानके योगसे स्वर्ग पाता है वह परभवमें सासते (अविनाशी) सुखको (मोक्षको) पाता है । अर्थात् स्वर्गसे आकर मनुष्य होके मोक्ष पाता है उसीका स्वर्ग पाना सफल है और जो कोरे (अकेले) तपसे स्वर्ग पाके फिर संसारमें भ्रमता है उसका स्वर्ग पाना वृथा है ॥ २१९ ॥

आगे जो बाह्य अभ्यंतर परिग्रहसे अपनेको महंत मानता है वह परमार्थको नहीं जानता ऐसा दिखलाते हैं;—[**य एव**] जो [**मुनिः**] मुनि [**ग्रंथैः**] बाह्य परिग्रहसे [**आत्मानं**] अपनेको [**गुरुकं**] महंत (बड़ा) [**मन्यते**] मानता है अर्थात् परिग्र-

---

१ स्वर्गस्तपसा सर्वोपि प्राप्नोति किंतु ध्यानयोगेन । यः प्राप्नोति स प्राप्नोति परभवे शाश्वतं सौख्यं ॥

परिग्रहैस्तथ्यं सत्यं स पुरुषः परमार्थेन वस्तुवृत्त्या नैव बुध्यते परमार्थमिति जिनो वदति । तथाहि । निर्दोषिपरमात्मविलक्षणैः पूर्वसूत्रोक्तसचित्ताचित्तमिश्रपरिग्रहैर्ग्रंथरचनारूपशब्दशास्त्रैर्वा आत्मानं महांतं मन्यते यः स परमार्थशब्दवाच्यं वीतरागपरमानंदैकस्वभावं परमात्मानं न जानातीति तात्पर्यं ॥ २२० ॥

ग्रंथेनात्मानं महांतं मन्यमानः सन् परमार्थं कस्मान्न जानातीति चेत्;—

बुज्झंतह परमत्थु जिय, गुरु लहु अत्थि ण कोइ ।
जीवा सयलवि बंभु परु, जेण वियाणइं सोइ ॥ २२१ ॥

बुध्यमानानां परमार्थं जीव गुरुः लघुः अस्ति न कोपि ।
जीवाः सकला अपि ब्रह्म परं येन विजानाति सोपि ॥ २२१ ॥

बुध्यमानानां । कं । परमार्थं हे जीव गुरुत्वं लघुत्वं वा नास्ति । कस्मान्नास्ति । जीवाः सर्वेपि परमब्रह्मस्वरूपाः । तदपि कस्मात् । येन कारणेन ब्रह्मशब्दवाच्यो मुक्तात्मा केवलज्ञानेन सर्वं जानाति यथा तथा निश्चयनयेन सोप्येको विवक्षितो जीवः संसारी सर्वं जानातीत्यभिप्रायः ॥ २२१ ॥ एवमेकचत्वारिंशत्सूत्रप्रमितमहास्थलमध्ये परिग्रहपरित्यागव्याख्या-

---

हसे ही गौरव जानता है [**तथ्यं**] निश्चयसे [**सः**] वही पुरुष [**परमार्थेन**] वास्तवमें [**परमार्थं**] परमार्थको [**नैव बुध्यते**] नहीं जानता [**जिनः भणति**] ऐसा जिनेश्वरदेव कहते हैं । **भावार्थ**—निर्दोषि परमात्मासे परान्मुख जो पूर्वसूत्रमें कहे गये सचित्त अचित्त मिश्र परिग्रह हैं उनसे अपनेको महंत मानता है जो मैं बहुत पढा हूं । ऐसा जिसके अभिमान है वह परमार्थ यानी वीतरागपरमानंदस्वभाव निज आत्माको नहीं जानता । आत्मज्ञानसे रहित है यह निःसंदेह जानो ॥ २२० ॥

आगे शिष्य प्रश्न करता है कि जो ग्रंथसे अपनेको महंत मानता है वह परमार्थको क्यों नहीं जानता? इसका समाधान आचार्य कहते हैं;—[**हे जीव**] हे जीव [**परमार्थं**] परमार्थको [**बुध्यमानानां**] समझनेवालोंके [**कोपि**] कोई जीव [**गुरुः लघुः**] बडा छोटा [**न अस्ति**] नहीं है [**सकला अपि**] सभी [**जीवाः**] जीव [**परब्रह्म**] परम ब्रह्मस्वरूप हैं [**येन**] क्योंकि निश्चयनयसे [**सोपि**] वह सम्यग्दृष्टि एक भी जीव [**विजानाति**] सबको जानता है । **भावार्थ**—जो परमार्थको नहीं जानता वह परिग्रहसे तो गुरुता समझता है और परिग्रहके न होनेसे लघुपना जानता है यही भूल है । यद्यपि गुरुता लघुता कर्मके आवरणसे जीवोंमें पायी जाती है तौभी शुद्धनयसे सब समान हैं, तथा ब्रह्म अर्थात् सिद्धपरमेष्टी केवलज्ञानसे सबको जानते हैं सबको देखते हैं उसीप्रकार निश्चयनयसे सम्यग्दृष्टी सब जीवोंको शुद्धरूप ही देखता है ॥ २२१ ॥ इस तरह इकतालीस दोहाओंके महास्थलमें परिग्रह त्यागके व्याख्यानकी मुख्यतासे आठ दोहा-

नमुख्यतया सूत्राष्टकेन तृतीयमंतरस्थलं समाप्तं । अथ ऊर्ध्वं त्रयोदशसूत्रपर्यंतं शुद्धनिश्चयेन सर्वे जीवाः केवलज्ञानादिगुणैः समानास्तेन कारणेन षोडशवर्णिकासुवर्णवद्भेदो नास्तीति प्रतिपादयति ।

तद्यथा;—

जो भत्तउ रयणत्तयहं, तसु मुणि लक्खणु एउ ।
अत्थउ कहिवि कुडिल्लियइं, सो तसु करइ ण भेउ ॥ २२२ ॥

यः भक्तः रत्नत्रयस्य तस्य मन्यस्व लक्षणं इदं ।
तिष्ठतु कस्यामपि कुट्यां स तस्य करोति न भेदं ॥ २२२ ॥

जो इत्यादि पदखंडनारूपेण व्याख्यानं क्रियते । **जो** यः **भत्तउ** भक्तः । कस्य । **रयत्तयहं** रत्नत्रयस्य **तसु** तस्य पुरुषस्य **मुणि** मन्यस्व जानीहि । किं । **लक्खणु एउ** लक्षणं इदं प्रत्यक्षीभूतं । इदं किं । **अत्थउ कहिवि कुडिल्लियइ** तिष्ठतु कस्यामपि कुट्यां शरीरे **सो तसु करइ ण भेउ** स ज्ञानी तस्य जीवस्य देहभेदेन भेदं न करोति । तथाहि । योसौ वीतरागस्वसंवेदनज्ञानी निश्चयस्य निश्चयरत्नत्रयलक्षणपरमात्मनो वा भक्तः तस्येदं लक्षणं जानीहि हे प्रभाकरभट्ट । कापि देहे तिष्ठतु जीवस्तथापि शुद्धनिश्चयेन षोडशवर्णिकासुवर्णवत्केवलज्ञानादिगुणैर्भेदं न करोतीति । अत्राह प्रभाकरभट्टः । हे भगवन् जीवानां यदि

ओंका तीसरा अंतरस्थल पूर्ण हुआ । आगे तेरह दोहाओंतक शुद्धनिश्चयनयसे सब जीव केवलज्ञानादिगुणसे समान हैं इसलिये सोलह वान (ताव) के सुवर्णकी तरह भेद नहीं है सब जीव समान हैं ऐसा निश्चय करते हैं ।

वह ऐसे है;—[**यः**] जो मुनि [**रत्नत्रयस्य**] रत्नत्रयकी [**भक्तः**] आराधना (सेवा) करनेवाला है [**तस्य**] उसके [**इदं लक्षणं**] यह लक्षण [**मन्यस्व**] जानना कि [**कस्यामपि कुट्यां**] किसी शरीरमें जीव [**तिष्ठतु**] रहे [**सः**] वह ज्ञानी [**तस्य भेदं**] उस जीवका भेद [**न करोति**] नहीं करता अर्थात् देहके भेदसे गुरुता लघुताका भेद करता है परंतु ज्ञानदृष्टिसे सबको समान देखता है । **भावार्थ**—वीतराग स्वसंवेदन ज्ञानी निश्चयरत्नत्रयका आराधकका ये लक्षण हे प्रभाकरभट्ट तू निःसंदेह जान, जो किसी शरीरमें कर्मके उदयसे जीव रहे परंतु निश्चयसे शुद्ध बुद्ध (ज्ञानी) ही है । जैसे सोनेमें वानभेद है वैसे जीवोंमें वानभेद नहीं है केवलज्ञानादि अनंतगुणोंसे सब जीव समान हैं । ऐसा कथन सुनकर प्रभाकरभट्टने प्रश्न किया । हे भगवन् जो जीवोंमें देहके भेदसे भेद नहीं हैं सब समान हैं तब जो वेदांती एक ही आत्मा मानते हैं उनको क्यों दोष देते हो । तब श्रीगुरु उसका समाधान करते हैं कि शुद्धसंग्रहनयसे सेना एक ही कही जाती है लेकिन सेनामें अनेक हैं तौभी ऐसे कहते हैं कि सेना आई सेना गई, उसी

देहभेदेन भेदो नास्ति तर्हि यथा केचन वदंत्येक एव जीवस्तन्मतमायातं । भगवानाह । शुद्धसंग्रहनयेन सेनावनादिवज्जात्यपेक्षया भेदो नास्ति व्यवहारनयेन पुनर्व्यक्त्यपेक्षया वने भिन्नभिन्नवृक्षवत् सेनायां भिन्नभिन्नहस्त्यश्वादिवद्भेदोऽस्तीति भावार्थः ॥ २२२ ॥

अथ त्रिभुवनस्थजीवानां मूढा भेदं कुर्वंति ज्ञानिनस्तु भिन्नभिन्नसुवर्णानां षोडशवर्णिकैकत्ववत्केवलज्ञानलक्षणेनैकत्वं जानंतीति दर्शयति;—

जीवहं तिहुयण संठियहं, मूढा भेउ करंति ।
केवलणाणिं णाणि फुडु, सयलुवि एकु मुणंति ॥ २२३ ॥

जीवानां त्रिभुवनसंस्थितानां मूढा भेदं कुर्वंति ।
केवलज्ञानेन ज्ञानिनः स्फुटं सकलमपि एकं मन्यंते ॥ २२३ ॥

जीवहं इत्यादि । **जीवहं तिहुयण संठियहं** श्वेतकृष्णरक्तादिभिन्नभिन्नवस्त्रैर्वेष्टितानां षोडशवर्णिकानां भिन्नभिन्नसुवर्णानां यथा व्यवहारेण वस्त्रवेष्टनभेदेन भेदः तथा त्रिभुवनसंस्थितानां जीवानां व्यवहारेण भेदं दृष्ट्वा निश्चयनयेनापि **मूढा भेउ करंति** मूढात्मानो भेदं कुर्वंति । **केवलणाणिं** वीतरागसदानंदैकसुखाविनाभूतकेवलज्ञानेन **णाणि** वीतरागस्वसंवेदनज्ञानिनः **फुडु** स्फुटं निश्चितं **सयलुवि** समस्तमपि जीवराशिं **इकु मुणंति** संग्रहनयेन समुदायं प्रत्येकं मन्यंत इति अभिप्रायः ॥ २२३ ॥

प्रकार जातिकी अपेक्षासे जीवोंमें भेद नहीं है सब एक जाति हैं और व्यवहारनयसे व्यक्तिकी अपेक्षा भिन्न भिन्न है अनंत जीव हैं एक नहीं है । जैसे वन एक कहा जाता है और वृक्ष जुदे २ हैं उसी तरह जातिसे जीवोंमें एकता है लेकिन द्रव्य जुदे २ हैं तथा जैसे सेना एक है परंतु हाथी घोड़े रथ सुभट अनेक हैं उसी तरह जीवोंमें जानना ॥ २२२ ॥

आगे तीन लोकमें रहनेवाले जीवोंका अज्ञानी भेद करते हैं सबको समान नहीं जानते और ज्ञानीजन केवलज्ञानलक्षणसे सबको समान जानते हैं । जीवपनेसे कोई कम बढ नहीं है कर्मके उदयसे शरीर भेद है परंतु द्रव्यकर सब समान हैं । जैसे सोनेमें वानभेद है वैसे ही परके संयोगसे भेद मालूम होता है तौभी सुवर्णपनेसे सब समान हैं ऐसा दिखलाते हैं;—[**त्रिभुवनसंस्थितानां**] तीन भुवनमें रहनेवाले [**जीवानां**] जीवोंका [**मूढाः**] मूर्ख ही [**भेदं**] भेद [**कुर्वंति**] करते हैं और [**ज्ञानिनः**] ज्ञानी जीव [**केवलज्ञानेन**] केवलज्ञानसे [**स्फुटं**] प्रगट [**सकलमपि**] सब जीवोंको [**एकं मन्यंते**] समान जानते हैं । **भावार्थ**—व्यवहारनयकर सोलहवानके सुवर्ण भिन्न २ वस्त्रमें लपेटें तो वस्त्रके भेदसे भेद है परंतु सुवर्णपनेसे भेद नहीं है, उसी प्रकार तीन लोकमें तिष्ठे हुए जीवोंका व्यवहारनयसे शरीरके भेदसे भेद है परंतु जीवपनेसे भेद नहीं

अथ केवलज्ञानादिलक्षणेन शुद्धसंग्रहनयेन सर्वे जीवाः समाना इति कथयति;—

जीवा सयलवि णाणमय, जम्मणमरणविमुक्क ।
जीवपएसहिं सयल सम, सयलवि सगुणहिं एक ॥ २२४ ॥

जीवाः सकला अपि ज्ञानमया जन्ममरणविमुक्ताः ।
जीवप्रदेशैः सकलाः समाः सकला अपि स्वगुणैरेके ॥ २२४ ॥

जीवा इत्यादि । **जीवा सयलवि णाणमय** व्यवहारेण लोकालोकप्रकाशकं निश्चयेन स्वशुद्धात्मग्राहकं यत्केवलज्ञानं तज्ज्ञानं यद्यपि व्यवहारेण केवलज्ञानावरणेन झंपितं तिष्ठति तथापि शुद्धनिश्चयेन तदावरणाभावात् पूर्वोक्तलक्षणकेवलज्ञानेन निर्वृत्तत्वात्सर्वेपि जीवा ज्ञानमयाः **जम्मणमरणविमुक्क** व्यवहारनयेन यद्यपि जन्ममरणसहितास्तथापि निश्चयेन वीतरागनिजानंदैकरूपसुखामृतमयत्वादनाद्यनिधनत्वाच्च शुद्धात्मस्वरूपाद्विलक्षणस्य जन्ममरणनिर्वर्तकस्य कर्मण उदयाभावाज्जन्ममरणविमुक्ताः । **जीवपएसहिं सयल सम** यद्यपि संसारावस्थायां व्यवहारेणोपसंहारविस्तारयुक्तत्वादेहमात्रा मुक्तावस्थायां तु किंचिदूनचरमशरीरप्रमाणास्तथापि निश्चयनयेन लोकाकाशप्रमितासंख्येयप्रदेशत्वहानिवृद्धयभावात् स्वकीयस्वकीयजीवप्रदेशैः सर्वे समानाः । **सयलवि सगुणहिं एक** यद्यपि व्यवहारेणाव्याबाधानंतसुखादिगुणाः संसारावस्थायां कर्मझंपितास्तिष्ठंति तथापि निश्चयेन कर्मा-

---

है । देहका भेद देखकर मूढ जीव भेद मानते हैं और वीतराग स्वसंवेदनज्ञानी जीवपनेसे सब जीवोंको समान मानता है । सभी जीव केवल ज्ञान वेलिके कंद सुख पंक्ति हैं कोई कम बढ नहीं है ॥ २२३ ॥

आगे केवलज्ञानादि लक्षणसे शुद्धसंग्रहनयकर सब जीव एक हैं ऐसा कहते हैं;— [**सकला अपि**] सभी [**जीवाः**] जीव [**ज्ञानमयाः**] ज्ञानमई हैं और [**जन्ममरणविमुक्ताः**] जन्ममरणसे रहित हैं [**जीवप्रदेशैः**] अपने २ प्रदेशोंसे [**सकलाः समाः**] सब समान हैं [**अपि**] और [**सकलाः**] सब जीव [**स्वगुणैः एके**] अपने केवलज्ञानादि गुणोंसे समान हैं । **भावार्थ**—व्यवहारसे लोक अलोकका प्रकाशक और निश्चयनयसे निजशुद्धात्मद्रव्यका ग्रहण करनेवाला जो केवलज्ञान वह यद्यपि व्यवहारनयसे केवलज्ञानावरणकर्मसे ढंका हुआ है तौभी शुद्ध निश्चयसे केवलज्ञानावरणका अभाव होनेसे केवलज्ञानस्वभावसे सभी जीव केवलज्ञानमई हैं । यद्यपि व्यवहारनयकर सब संसारी जीव जन्ममरण सहित हैं तौभी निश्चयनयकर वीतराग निजानंदरूप अतींद्रिय सुखमई हैं जिनकी आदि भी नहीं और अंत भी नहीं ऐसे हैं, शुद्धात्मस्वरूपसे विपरीत जन्ममरणके उत्पन्न करनेवाले जे कर्म उनके उदयके अभावसे जन्ममरणरहित हैं । यद्यपि संसार अवस्थामें व्यवहारनयकर प्रदेशोंका संकोचविस्तारको धारण करते हुए देह प्रमाण हैं

भावात्सर्वेपि स्वगुणैरेकप्रमाणा इति । अत्र यदुक्तं शुद्धात्मनः स्वरूपं तदेवोपादेयमिति तात्पर्यं ॥ २२४ ॥

अथ जीवानां ज्ञानदर्शनलक्षणं प्रतिपादयति;—

जीवहं लक्खणु जिणवरहिं, भासिउ दंसणु णाणु ।
तेण ण किज्जइ भेउ तहं, जइ मणि जाउ विहाणु ॥ २२५ ॥

जीवानां लक्षणं जिनवरैः भाषितं दर्शनं ज्ञानं ।
तेन न क्रियते भेदः तेषां यदि मनसि जातो विभातः ॥ २२५ ॥

जीवहं इत्यादि । **जीवहं लक्खणु जिणवरहिं भासिउ दंसणु णाणु** यद्यपि व्यवहारेण संसारावस्थायां मत्यादि ज्ञानं चक्षुरादि दर्शनं जीवानां लक्षणं भवति तथापि निश्चयेन केवलदर्शनं केवलज्ञानं च लक्षणं भाषितं । कैः । जिनवरैः । **तेण ण किज्जइ भेउ तहं** तेन कारणेन व्यवहारेण देहभेदेपि केवलज्ञानदर्शनरूपनिश्चयलक्षणेन तेषां न क्रियते भेदः । यदि किं । **जइ मणि जाउ विहाणु** यदि चेन्मनसि वीतरागनिर्विकल्पस्वसंवेदनज्ञानादित्योदयेन जातः । कोसौ । प्रभातसमय इति । अत्र यद्यपि षोडशवर्णिकालक्षणं बहूनां सुवर्णानां मध्ये समानं तथाप्येकस्मिन सुवर्णे गृहीते शेषसुवर्णानि सहैव नायांति । कस्मात् । भिन्नभिन्नप्रदेशत्वात् । तथा यद्यपि केवलज्ञानदर्शनलक्षणं समानं सर्वजीवानां तथाप्येकस्मिन विवक्षितजीवे पृथक्कृते शेषजीवाः सहैव नायांति । कस्मात् । भिन्नप्रदे-

---

और मुक्त अवस्थामें चरम (अंतिम) शरीरसे कुछ कम देह प्रमाण हैं तौभी निश्चयनयकर लोकाकाशप्रमाण असंख्यातप्रदेशी हैं हानि वृद्धि न होनेसे अपने प्रदेशोंकर सब समान हैं । और यद्यपि व्यवहारनयसे संसारअवस्थामें इन जीवोंके अव्याबाध अनंत सुखादिगुण कर्मोंसे ढके हुए हैं तौभी निश्चयनयकर कर्मके अभावसे सभी जीव गुणोंकर समान हैं । ऐसा जो शुद्ध आत्माका स्वरूप है वही ध्यान करने योग्य है ॥ २२४ ॥

आगे जीवोंका ज्ञान-दर्शन लक्षण कहते हैं;—[**जीवानां लक्षणं**] जीवोंका लक्षण [**जिनवरैः**] जिनेंद्रदेवने [**दर्शनं ज्ञानं**] दर्शन और ज्ञान [**भाषितं**] कहा है [**तेन**] इसलिये [**तेषां**] उन जीवोंमें [**भेदः**] भेद [**न क्रियते**] मत कर [**यदि**] अगर [**मनसि**] तेरे मनमें [**विभातः जातः**] ज्ञानरूपसूर्यका उदय होगया है अर्थात् हे शिष्य तू सबको समान जान । **भावार्थ**—यद्यपि व्यवहारनयसे संसारअवस्थामें मत्यादि ज्ञान और चक्षुरादि दर्शन जीवके लक्षण कहे हैं तौभी निश्चयनयकर केवल दर्शन केवलज्ञान येही लक्षण हैं ऐसा जिनेंद्रदेवने वर्णन किया है । इसलिये व्यवहारनयकर देहभेदसे भी भेद नहीं है, केवलज्ञानदर्शनरूप निजलक्षणकर सब समान हैं कोई भी बड़ा छोटा नहीं है । जो तेरे मनमें वीतराग निर्विकल्प स्वसंवेदन ज्ञानरूप

शत्वात् । तेन कारणेन ज्ञायते यद्यपि केवलज्ञानदर्शनलक्षणं समानं तथापि प्रदेशभेदोस्तीति भावार्थः ॥ २२५ ॥

अथ शुद्धात्मनां जीवजातिरूपेणैकत्वं दर्शयति;—

बंभहं भुवणि वसंताहं, जे णवि भेउ करंति ।
ते परमप्पपयासयर, जोइय विमलु मुणंति ॥ २२६ ॥

ब्रह्मणः भुवने वसतः ये नैव भेदं कुर्वंति ।
ते परमात्मप्रकाशकराः योगिन् विमलं मन्यंते ॥ २२६ ॥

बंभहं इत्यादि । **बंभहं** ब्रह्मणः शुद्धात्मनः । किं कुर्वतः । **भुवणि वसंताहं** भुवने त्रिभुवने वसतः तिष्ठतः **जे णवि भेउ करंति** ये नैव भेदं कुर्वंति । केन । शुद्धसंग्रहनयेन **ते परमप्पपयासयर** ते ज्ञानिनः परमात्मस्वरूपस्य प्रकाशकाः संतः **जोइय** हे योगिन् अथवा बहुवचनेन हे योगिनः । किं कुर्वंति । **विमलु मुणंति** विमलं संशयादिरहितं शुद्धात्मस्वरूपं मन्यंते जानंतीति । तद्यथा । यद्यपि जीवराश्यपेक्षया तेषामेकत्वं भण्यते तथापि व्यक्त्यपेक्षया प्रदेशभेदेन भिन्नत्वं नगरस्य गृहादिपुरुषादिभेदवत् । कश्चिदाह । यथैकोपि चंद्रमा बहुजलघटेषु भिन्नभिन्नरूपेण दृश्यते तथैकोपि जीवो बहुशरीरेषु भिन्नभिन्नरूपेण दृश्यत इति । परिहारमाह । बहुषु जलघटेषु चंद्रकिरणोपाधिवशेन जलपुद्गला एव चंद्रा-

---

सूर्यका उदय हुआ है और मोहनिद्राके अभावसे आत्मबोधरूप प्रभात हुआ है तो तू सबोंको समान देख । जैसे यद्यपि सोलहवानीके सोने सब समान वृत्त हैं तौभी उन सुवर्णराशियोंमेंसे एक सुवर्णको ग्रहण किया तो उसके ग्रहणकरनेसे सब सुवर्ण साथ नहीं आते क्योंकि सबके प्रदेश भिन्न हैं, उसी प्रकार यद्यपि केवलज्ञानदर्शनलक्षण सब जीव समान हैं तौभी एक जीवका ग्रहण करनेसे सबका ग्रहण नहीं होता । क्योंकि प्रदेश सबके भिन्न २ हैं । इससे यह निश्चय हुआ कि यद्यपि केवलज्ञानदर्शनलक्षणसे सब जीव समान हैं तौभी प्रदेश सबके जुदे २ हैं यह तात्पर्य जानना ॥ २२५ ॥

आगे जातिके कथनसे सब जीवोंकी एक जाति है परंतु द्रव्य अनंत हैं ऐसा दिखलाते हैं;—[**भुवने**] इस लोकमें [**वसतः**] रहनेवाले [**ब्रह्मणः**] जीवोंका [**भेदं**] भेद [**ये**] जो [**नैव**] नहीं [**कुर्वंति**] करते हैं [**ते**] वे [**परमात्मप्रकाशकराः**] परमात्माके प्रकाशकरनेवाले [**योगिन्**] हे योगी [**विमलं**] अपने निर्मल आत्माको [**मन्यंते**] जानते हैं । इसमें संदेह नहीं है । **भावार्थ**—यद्यपि जीवराशिकी अपेक्षा जीवोंकी एकता है तौभी प्रदेशभेदसे प्रगटरूप सब जुदे २ हैं । जैसे वृक्षजातिकर वृक्षोंका एकपना है तौभी सब वृक्ष जुदे २ हैं और पहाड़जातिसे सब पहाडोंका एकत्व है तौभी सब जुदे २ हैं तथा रत्नजातिसे रत्नोंका एकत्व है परंतु सब रत्न पृथक् २ हैं,

कारेण परिणता न चाकाशस्थचंद्रमाः । अत्र दृष्टांतमाह । यथा देवदत्तमुखोपाधिवशेन नानादर्पणानां पुद्गला एव नानामुखाकारेण परिणमंति न च देवदत्तमुखं नानारूपेण परिणमति । यदि परिणमति तदा दर्पणस्थं मुखप्रतिविंबं चेतनत्वं प्राप्नोति न च तथा, तथैकचंद्रमा अपि नानारूपेण न परिणमतीति । किं च न चैको ब्रह्मनामा कोपि दृश्यते प्रत्यक्षेण यश्चंद्रवन्नानारूपेण भविष्यति इत्यभिप्रायः ॥ २२६ ॥

अथ सर्वजीवविषये समदर्शित्वं मुक्तिकारणमिति प्रकटयति;—

रायदोसवे परिहरेवि, जे सम जीव णियंति ।
ते समभावि परिट्ठिया, लहु णिव्वाणु लहंति ॥ २२७ ॥

रागद्वेषौ परिहृत्य ये समा जीवा निर्गच्छंति ।
ते समभावे प्रतिष्ठिताः लघु निर्वाणं लभंते ॥ २२७ ॥

राय इत्यादि पदखंडनारूपेण व्याख्यानं क्रियते । **रायदोसवे परिहरेवि** वीतराग-निजानंदैकस्वरूपस्वशुद्धात्मद्रव्यभावनाविलक्षणौ रागद्वेषौ परिहृत्य **जे** ये केचन **सम जीव**

घटजातिकी अपेक्षा सब घटोंका एकपना है परंतु सब जुदे २ हैं और पुरुषजातिकर सबकी एकता है परंतु सब अलग २ हैं । उसी प्रकार जीवजातिकी अपेक्षासे सब जीवोंका एकपना है तौभी प्रदेशोंके भेदसे सब ही जीव जुदे जुदे हैं । इहां पर कोई परवादी प्रश्न करता है कि जैसे एक ही चंद्रमा जलके भरे बहुत घड़ोंमें जुदा जुदा भासता है उसीप्रकार एक ही जीव बहुत शरीरोंमें भिन्न २ भास रहा है । उसका श्रीगुरु समाधान करते हैं—जो बहुत जलके घडोंमें चंद्रमाकी किरणोंकी उपाधिसे जलजातिके पुद्गल ही चंद्रमाके आकार परिणत होगये हैं लेकिन आकाशमें स्थित चंद्रमा तो एक ही है कुछ चंद्रमा तो बहुत स्वरूप नहीं होगया । उसका दृष्टांत कहते हैं । जैसे कोई देवदत्तनामा पुरुष उसके मुखकी उपाधि (निमित्त) से अनेक प्रकारके दर्पणोंसे शोभायमान जो काचका महल उसमें वे काचरूप पुद्गल ही अनेकमुखके आकार परिणत हुए हैं कुछ देवदत्तका मुख अनेकरूप नहीं परिणत हुआ है, मुख एक ही है । जो कदाचित देवदत्तका मुख अनेकरूप परिणमन करे तो दर्पणमें तिष्ठते हुए मुखोंके प्रतिविंब चेतन हो जावें । परंतु चेतन नहीं होते, जड़ ही रहते हैं । उसीप्रकार एक चंद्रमा भी अनेकरूप नहीं परिणमता । वे जलरूप पुद्गल ही चंद्रमाके आकार परिणत हो जाते हैं । इसलिये ऐसा निश्चय समझना कि जो कोई ऐसे कहते हैं कि एक ही ब्रह्म नानारूप दीखता है । यह कहना ठीक नहीं है । जीव जुदे २ हैं ॥ २२६ ॥

आगे ऐसा कहते हैं कि सब ही जीव द्रव्यसे तो जुदे २ हैं परंतु जातिसे एक हैं और गुणोंकर समान हैं ऐसी धारणा करना मुक्तिका कारण है;—[**ये**] जो [**रागद्वेषौ**]

णियंति सर्वसाधारणकेवलज्ञानदर्शनलक्षणेन समाना सदृशाः जीवा निर्गच्छंति जानंति ते पुरुषाः । कथंभूताः । **समभावि परिट्ठिया** जीवितमरणलाभालाभसुखदुःखादिसमताभावनारूपे समभावे प्रतिष्ठिताः संतः **लहु णिव्वाणु लहंति** लघु शीघ्रं आत्यंतिकस्वभावैकाचिंत्याद्भुतकेवलज्ञानादिगुणास्पदं निर्वाणं लभंत इति । अत्रेदं व्याख्यानं ज्ञात्वा रागद्वेषौ त्यक्त्वा च शुद्धात्मानुभूतिरूपा समभावना कर्तव्येत्यभिप्रायः ॥ २२७ ॥

अथ सर्वजीवसाधारणं केवलज्ञानदर्शनलक्षणं प्रकाशयति;—

जीवहं दंसणु णाणु जिय, लक्खणु जाणइ जो जि ।
देहविभेएं भेउ तहं, णाणि किं मण्णइ सो जि ॥ २२८ ॥

जीवानां दर्शनं ज्ञानं जीव लक्षणं जानाति य एव ।
देहविभेदेन भेदं तेषां ज्ञानी किं मन्यते तमेव ॥ २२८ ॥

जीवहं इत्यादि । **जीवहं** जीवानां **दंसणु णाणु** जगत्त्रयकालत्रयवर्तिसमस्तद्रव्यगुणपर्यायाणां क्रमकरणव्यवधानरहितत्वेन परिच्छित्तिसमर्थं विशुद्धदर्शनं ज्ञानं च । **जिय** हे जीव **लक्खणु जाणइ जो जि** लक्षणं जानाति य एव **देह विभेएं भेउ तहं** देहविभेदेन भेदं तेषां जीवानां, देहोद्भवविषयसुखरसास्वादविलक्षणशुद्धात्मभावनारहितेन जीवेन यान्युपा-

---

राग और द्वेषको [**परिहृत्य**] दूर करके [**जीवाः समाः**] सब जीवोंको समान [**निर्गच्छंति**] जानते हैं [**ते**] वे साधु [**समभावे**] समभावमें [**प्रतिष्ठिताः**] विराजमान [**लघु**] शीघ्र ही [**निर्वाणं**] मोक्षको [**लभंते**] पाते हैं । **भावार्थ**—वीतराग निजानंदस्वरूप जो निज आत्मद्रव्य उसकी भावनासे विमुख जो राग द्वेष उनको छोड़कर जो महान पुरुष केवलज्ञान दर्शन लक्षणकर सब ही जीवोंको समान गिनते हैं वे पुरुष समभावमें स्थित शीघ्र ही शिवपुरको पाते हैं । **समभावका** लक्षण ऐसा है कि जीवित मरण लाभ–अलाभ सुख दुःखादि सबको समान जानें । जो अनंत सिद्ध हुए और होवेंगे यह सब समभाव का प्रभाव है । समभावसे मोक्ष मिलती है । कैसा है वह मोक्षस्थान, जो अत्यंत अद्भुत अचिंत्य केवलज्ञानादि अनंत गुणोंका स्थान है । यहां यह व्याख्यान जानकर राग द्वेषको छोडके शुद्धात्माके अनुभवरूप जो समभाव वे सदा करने चाहिये । यही इस ग्रंथका अभिप्राय है ॥ २२७ ॥

आगे सब जीवोंमें केवलज्ञान और केवल दर्शन साधारण लक्षण हैं इनके विना कोई जीव नहीं है । ये गुण शक्तिरूप सब जीवोंमें पाये जाते हैं ऐसा कहते हैं;—[**जीवानां**] जीवोंके [**दर्शनं ज्ञानं**] दर्शन और ज्ञान [**लक्षणं**] निज लक्षणको [**य एव**] जो कोई [**जानाति**] जानता है [**हे जीव**] हे जीव [**स एव ज्ञानी**] वही ज्ञानी [**देहविभेदेन**] देहके भेदसे [**तेषां भेदं**] उन जीवोंके भेदको [**किं मन्यते**] क्या मान

र्जितानि कर्माणि तदुदयेनोत्पन्नेन देहभेदेन जीवानां भेदं **णाणि किमण्णइ** वीतरागस्वसंवेदनज्ञानी किं मन्यते । नैव । कं । **सो जि** तमेव पूर्वोक्तं देहभेदमिति । अत्र ये केचन ब्रह्माद्वैतवादिनो नानाजीवान्न मन्यंते तन्मतेन विवक्षितैकजीवस्य जीवितमरणसुखदुःखादिके जाते सर्वजीवानां तस्मिन्नेव क्षणे जीवितमरणसुखदुःखादिकं प्राप्नोति । कस्मादिति चेत् । एकजीवत्वादिति । न च तथा दृश्यते इति भावार्थः ॥ २२८ ॥

अथ जीवानां निश्चयनयेन योसौ देहभेदेन भेदं करोति स जीवानां दर्शनज्ञानचारित्रलक्षणं न जानातीत्यभिप्रायं मनसि धृत्वा सूत्रमिदं कथयति;—

देहविभेयइं जो कुणइ, जीवहं भेउ विचित्तु ।
सो णवि लक्खणु मुणइ तहं, दंसणु णाणु चरित्तु ॥ २२९ ॥

देहविभेदेन यः करोति जीवानां भेदं विचित्रं ।
स नैव लक्षणं मनुते तेषां दर्शनं ज्ञानं चारित्रं ॥ २२९ ॥

देह इत्यादि । **देह विभेयहं** देहममत्वमूलभूतानां ख्यातिपूजालाभस्वरूपादीनां अपध्यानानां विपरीतस्य स्वशुद्धात्मध्यानस्याभावे यानि कृतानि कर्माणि तदुदयजनितेन देहभेदेन

सकता है नहीं मानसकता । **भावार्थ**—तीनलोक और तीन काल वरती समस्त द्रव्य गुण पर्यायोंको एक ही समयमें जानने समर्थ जो केवल दर्शन केवल ज्ञान हैं इन निज लक्षणोंको जो कोई जानता है वही सिद्ध पद पाता है । जो ज्ञानी अच्छीतरह इन निज लक्षणोंको जान लेवै वह देहके भेदसे जीवोंका भेद नहीं मानसकता । अर्थात् देहसे उत्पन्न जो विषयसुख उनके रसके आस्वादसे विमुख शुद्धात्माकी भावनासे रहित जो जीव उसने उपार्जन किये जो ज्ञानावरणादि कर्म उनके उदयसे उत्पन्न हुए देहादिकके भेदसे जीवोंका भेद वीतरागस्वसंवेदन ज्ञानी कदापि नहीं मानसकता । देहमें भेद हुआ तो क्या, गुणसे सब समान हैं और जीव जातिकर एक हैं । यहां पर जो कोई ब्रह्माद्वैतवादी वेदांती नाना जीवोंको नहीं मानते हैं, एक ही जीव मानते हैं, ऐसी बात अप्रमाण है । उनके मतमें एक ही जीवके माननेसे बड़ा भारी दोष होता है । वह इस तरह है कि एक जीवके जीने मरने सुख दुःखादिके होनेपर सब जीवोंके उसी समय जीवना मरना सुख दुःखादि होने चाहिये, क्योंकि उनके मतमें वस्तु एक है । परंतु ऐसा देखनेमें नहीं आता । इसलिये उनका वस्तु एक मानना वृथा है ऐसा जानो ॥ २२८ ॥

आगे जीवहीको जानते हैं परंतु उसके लक्षण नहीं जानते यह अभिप्राय मनमें रखकर व्याख्यान करते हैं;—[**यः**] जो [**देहविभेदेन**] शरीरोंके भेदसे [**जीवानां**]

जो कुणइ यः करोति । कं । **जीवहं भेउ विचित्तु** जीवानां भेदं विचित्रं नरनारकादिदेहरूपं **सो णवि लक्खणु मुणइ तहं** स नैव लक्षणं मनुते तेषां जीवानां । किं लक्षणं । **दंसणु णाणु चरित्तु** सम्यग्दर्शनज्ञानचारित्रमिति । अत्र निश्चयेन सम्यग्दर्शनज्ञानचारित्रलक्षणानां जीवानां ब्राह्मणक्षत्रियवैश्यचांडालादिदेहभेदं दृष्ट्वा रागद्वेषौ न कर्तव्याविति तात्पर्यं ॥ २२९ ॥

अथ शरीराणि बादरसूक्ष्माणि विधिवशेन भवंति न च जीवा इति दर्शयति;—

अंगइं सुहुमइं बादरइं, विहिवसिं हुंति जि बाल ।
जिय पुणु सयलुवि तित्तडा, सव्वत्थवि सयकाल ॥ २३० ॥

अंगानि सूक्ष्माणि बादराणि विधिवशेन भवंति ये बालाः ।
जीवाः पुनः सकला अपि तावंतः सर्वत्रापि सर्वकाले ॥ २३० ॥

अंगइं इत्यादि पदखंडनारूपेण व्याख्यानं क्रियते । **अंगइं सुहुमइं बादरइं** अंगानि सूक्ष्मबादराणि जीवानां **विहिवसि होंति** विधिवशाद्भवंति अंगोद्भवपंचेंद्रियविषयकांक्षामूलभूतानि दृष्टश्रुतानुभूतभोगवांछारूपनिदानबंधादीनि यान्यपध्यानानि तद्विलक्षणा यासौ

